No. 13604. अरिष्टनवनीतम्.
ARIṢṬANAVANĪTAM.

Pages, 25. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 13489.

Complete in the following six Paricchēdas :—

१. साधारणपरिच्छेदः	४. सर्वारिष्टम्.
२. मातारिष्टम्.	५. सुतारिष्टम्.
३. पितारिष्टम्.	६. अरिष्टभङ्गः.

Explains the astrological conditions and circumstances in a horoscope under which evils befall to a person's mother, father and other relations and the way in which these evils can be averted. According to the initial stanza and the colophon of the MS. described under the next number the author is Navanītanartanakavi.

Beginning:

सुनिश्चितानिश्चितयोगजाख्यं रिष्टं तथा निश्चितमायुषो(न्तः) ।
अनिश्चितक्रूरदशास्वयादि येनोद्भवं जन्मनि खेटगत्याम् ॥
द्रेक्काणनक्षत्रनवांशखेटैश्चतुर्विधं जन्मविधावरिष्टम् ।
पाकोऽष्टभेदस्तनये बहोर्थे पित्रोश्च तद्भ्रातृतदीश्वरेषु ॥

Colophon:

इति प्रथमपरिच्छेदः ।

* * * *

Colophon:

इत्यरीष्टनवनीते मातारिष्टपरिच्छेदः द्वितीयः ॥

End:

तीर्थाभिषेकग्रहयज्ञक्लृप्त्या यन्त्रादिरक्ष्याद्विनिहन्त्यरिष्टम् ।
दिक्कुस्थानकादीनि पृथग्भवानि रिष्टे च तद्भञ्जनयोर्विनश्यति (?) ॥
यस्याधिकं तत्फलमेव योग्यं समानतायामपि रिष्टमेव ।

Colophon:

इत्यरिष्टनवनीते अरिष्टभङ्गपरिच्छेदः ॥ अरिष्टनवनीतं सम्पूर्णम् ॥

No. 13605. अरिष्टनवनीतम्.
ARIṢṬANAVANĪTAM.

Substance, (Śrītāla). Size, 14 × $2\frac{1}{8}$ inches. Pages, 15. Lines, 8 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 64*b*. The other works herein are Aṣṭakavarga 1*a*, Bṛhajjātaka 7*a*, 48*b* and 70*b*, Satphalagrantha 8*b*, Kalacakra 10*b*, Daśāphalagrantha 13*a*, Pañcāṅgavākya 25*a*, Jyautiṣaviṣaya 28*a*, Hōrāsāra 47*a* and 51*b*, Ariṣṭaviṣaya 71*b*, Hōrāpradīpa 77*a*.

Complete.

Same work as the above but with the following additional stanza in the beginning. This and the colophon quoted below give the name of the author.

Beginning :

नत्वा श्रीरङ्गेशं होराशास्त्राम्बुधिं समालोड्य ।
नवनीतनर्तनकविररिष्टनवनीतमाजह्रे ॥

Colophon :

इति नवनीतनर्तनकविविरचितं नवनीतारिष्टं समाप्तः(प्तम्) ॥

No. 13606. अरिष्टनवनीतम्.

ARIṢṬANAVANĪTAM.

Substance, palm-leaf. Size, 19⅛ × 1¼ inches. Pages, 9. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 30*a*. The other works herein are Kēralarājayōgasāra 1*a*, Kārakanighaṇṭu 1*b*, Jātakacandrikā 2*a*, Rathacakra 4*b*, Bṛhajjātakavyākhyā 7*a*, Jātakamañjarī 12*a*, Praśnaphalaprāptikālanirṇaya 19*a*, Āyurviniścaya 20*b*, Aṣṭaiśvaryaphalagrantha 24*a*, Uḍudaśāphalādiviṣaya (with Telugu meaning) 34*a*, Jātakālaṅkāra 40*b*, Jyautiṣaviṣaya 43*a*, Jātakaviṣaya 59*a*, Kālacakragati 56*b*, Bhārgavasūtra 74*a*, Candrāṁśalagnādiyōgaphala 80*a*, Kōṭiyuddhacakra 87*a*.

Contains the Paricchēdas 1 to 6; but wants the beginning in the first Paricchēda and the end in the sixth Paricchēda.

Same work as the above.

No. 13607. अरिष्टनवनीतम्—सव्याख्यानम्.

ARIṢṬANAVANĪTAM WITH COMMENTARY.

Pages, 42. Lines, 9 on a page.

Begins on fol. 9*a* of the MS. described under No. 13601.

Breaks off in the 6th Paricchēda.

Same text as that described above and together with a commentary thereon entitled Śrīdharā. The commentator quotes Vāgbhaṭa, Dēvakīrti, Dēvala and others.

Beginning :

अरिष्टनवनीतं यद्धोराशास्त्रात्समुद्धृतम् ।
व्याख्या विरच्यते येन श्रीधराख्या मनोरमा ॥

प्रथमं प्रथमारम्भे अभिमतदेवतां नमस्कृत्य प्रबन्धसंज्ञां कर्तृसंज्ञां च प्रकाशयति—

श्रीरङ्गेशं नत्वा होराशास्त्राम्बुधिं समालोड्य ।
नवनीतनर्तककविररिष्टनवनीतमाजह्रे ॥

678-A

अरिष्टनवनीतमरिष्टसारम् अरिष्टमिति मरणसूचकमशुभम् । तथोक्तं वैजयन्त्याम्—रिष्टारिष्टे शुभाशुभे इति । अथ श्लोकेनारिष्टस्य त्रैविध्यमाह—

सुनिश्चितानिश्चितयोगजाख्यं रिष्टं त्रिधानिश्चितमायुषोऽन्तः ।
अनिश्चितं क्रूरवशानुयोगाद्योगोद्भवं जन्मनि खेटगत्या ॥

रिष रुष हिंसायामित्यस्माद्धातोर्निष्ठान्तम् तन्मरणसूचकमित्युक्तं वाग्भटे—

अरिष्टं नास्ति मरणं दृष्टं रिष्टश्च जीवितमिति । तदरिष्टं त्रिविधम्—सुनिश्चितमनिश्चितं योगजमिति । तेषु त्रिषु योगजं रिष्टं तावदुच्यत इति । तदाह देवकीर्तिः—

आयुर्ज्ञानाभावे सर्वं विफलं हि कीर्त्यते यस्मात् ।
तस्मात्तज्ज्ञानार्थं रिष्टाध्यायं प्रवक्ष्यामि ॥

End:

कुलीरगौ पूर्णशशाङ्कजीवौ लग्ने चतुर्थे दशमे भवेताम् ।
जूकस्थितौ शुक्रबुधौ च शेषा लाभत्रिषष्ठेष्वमितं तदायुः ॥

जातस्य यस्य लग्नभूते चतुर्थभूते दशमभूते वा कटकराशौ पूर्णचन्द्रो गुरुश्च स्थितौ तुलागतौ शुक्रबुधौ शेषा ग्रहास्त्रिषडायस्थिताश्चेत्तस्यायुरमितं भवेदिति ।

देवलः—

बन्धवास्पदोदयविलग्नगतः कुलीरगीर्वाणनाथसचिवः सकलश्च चन्द्रः ।
जूके सितेन्दुतनयावपरे च लाभदुश्चिक्यशत्रुभवनेष्वमितं तदायुः ॥

No. 13608. अरिष्टलक्षणम्.
ARIṢṬALAKṢAṆAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 40*a* of the MS. described under No. 13489. Incomplete.

States what relations are affected with ailments when a child happens to be born under certain astrologically bad conditions.

Similar to the above.

Beginning:

अरिष्टलक्षणं वक्ष्ये सर्वशास्त्रानुसारतः ।
पुत्रे जाते पिता श्रुत्वा सचेलः स्नानमाचरेत् ॥

उत्तराभिमुखो भूत्वा नद्यां वा दवघा(खा)तके ।
तटाके पुष्करे वापि ब्राह्मणैरनुमन्त्रितः ॥
दत्वा गोभूहिरण्यादि पश्चाल्लग्नं परीक्षयेत् ।
लग्नमेव प्रशंसन्ति ज्योतिश्शास्त्रप्रयोजकाः ॥
अरिक्तपाणिर्दैवज्ञं शृणुयात्पुत्रजन्मनि ।
ततश्शीर्षोदयं विद्यादायुः कालवशाद्यतः ॥

* * * *

अरिष्टसंहितायाम्—

रेवत्यश्विनियोर्मध्ये गण्डान्तं हि विधीयते ।
गण्डान्तस्य प्रमाणोऽयं घटिकानां चतुष्टयम् ॥
द्वे द्वे घटिकदान्त्यादौ(?) गण्डान्तमिति कथ्यते ।
आद्यनाड्यां तु जातस्य मातुर्मरणमाप्नुयात् ॥
द्वितीयायां पिता चैव तृतीयायां सहोदरः ।

End:

अभिजिल्लग्नम्—

सूर्यश्चतुर्थलग्नं च साभिजित्संज्ञिकं च तत् ।
सर्वदोषं निहन्त्याशु पिनाकी त्रिपुरं यथा ॥
सूर्यात्सप्तमलग्नं यद्गोधूलिकमिति स्मृतम् ।
सर्वदोषहरं यद्वा पापं गङ्गाजलं यथा ॥
गोधूलिकं च यो लग्नं भावलग्नं च कल्पितम् ।
गन्धर्वादिविवाहेषु वैश्योद्वाहे च योजयेत् ॥

No. 13609. अरिष्टलक्षणम्.
ARIṢṬALAKṢAṆAM.

Substance, palm-leaf. Size, 15¾ × 1⅝ inches. Pages, 7. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 96*a*. The other works herein are Trailōkyadīpikā 1*a*, Dvādaśabhāvaphala 9*a*, Aṣṭakavarga (with Telugu meaning) 22*a*, Jyautiṣaviṣaya 36*a*, Savyāpasavyavākyanirūpaṇa 41*a*, Kālacakra 45*a*, Kōṭicakrayuddhayātrāyōgaphala 47*a*, Mahādaśāntardaśāphala 59*a*, Uḍudaśādiphala (with Telugu meaning) 75*a*, Jyautiṣaviṣaya 82*a*,

Kālacakrasāra 190*a*, Nakṣatranighaṇṭu 93*a*, Dēvamānuṣarākṣasagaṇādiphala 95*a*, Svaracintāmaṇi 100*a*.

Incomplete.

Similar to the above.

Beginning:

अरिष्टलक्षणं वक्ष्ये सर्वशास्त्रानुसारिणम् (तत्) ।
पूर्वाषाढे च पुष्ये च पितरं मातरं सुतम्(ः) ॥
मातुलं च मृधे हन्यात् प्रथमाद्याशतक . . . ।
पितरं त्वाद्यपापांशे द्वितीये मातरं तथा ॥

* * * *

पापाः त्रिकोणकेन्द्रस्थाः शुभाः षष्ठव्ययाष्टगाः ।
आदित्योदयवेलायां जातो यमपुरं व्रजेत् ॥

End:

इत्याह ब्रह्मशाण्डिल्याख्यः —

राहुश्चतुरष्टस्थो मरणाय निरीक्षितः ।
पापैर्वदन्ति वर्षैर्दशभिरेचिवाचार्यैः ॥

* * * *

वक्रस्थो भूमिजश्चैव दक्षिणापार्श्ववेदतः ।
नवमे च चतुर्विंशस्सप्तविंशं भवेत्तथा ।
शुभानि शीघ्रविज्ञेयवामवेदो भवेत्तथा (?) ॥

No. 13610. अरिष्टविषयः.
ARIṢṬAVIṢAYAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 71*b* of the MS. described under No. 13605.

Complete.

Similar to the above.

Beginning:

फलनिर्देशार्थमन्यत्रोक्ता ग्रन्था लिख्यन्ते—

बृहस्पतिर्भौमगृहेऽष्टमस्थः सूर्येन्दुसौम्यार्कजदृष्टमूर्तिः ।
अब्दैस्त्रिभिर्भार्गवदृष्टिहीनो लोकान्तरं प्रापयति स्म जातम् ॥
वक्री शनिर्भौमगृहं प्रपन्नः लग्ने च षष्ठे च चतुष्टये वा ।
कुजेन सम्प्राप्तबलेन दृष्टो वर्षद्वयं जीवयति प्रसूतम् ॥

* * * *

उडुपतिकृतरिष्टानां भङ्गस्तावन्निरूप्यते पूर्वम् ।
सम्य . . . . . शेषाणामपि यथामतं ब्रह्मपूर्वाणाम् ॥
सर्वैर्गगनभ्रमणैः दृष्टश्चन्द्रो विनाशयति रिष्टम् ।
आपूर्यमाणमूर्तिः यथानृपस्तनयकृतदोषम् ॥

End:

यत्नेन भङ्गमपरे सरोजजन्म इति विस्मयं कुरुते ।
तज्ज्ञः कष्टमनिष्टं समकटदेशे यदाशदः ॥
बहवो यदि शुभफलदा रोगाप्ता हीयतेऽरिष्टम् ।
सूर्यत्रिकोण इन्दौ यथाभियात्रा नरेन्द्रस्य ॥
इत्येतेऽन्यग्रन्थाः.

Colophon:

इतिरिष्टोक्तिभङ्गौ ॥

No. 13611. अष्टकवर्गः.
AṢṬAKAVARGAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 71*a* of the MS. described under No. 6470.

Wants the beginning and the end.

Same work as that described under R. No. 371(*d*) of the Triennial Catalogue of MSS., Vol. I, Part I-B.

No. 13612. अष्टकवर्गः.
AṢṬAKAVARGAḤ.

Substance, palm-leaf. Size, 12¼ × 1 inches. Pages, 9. Lines, 4 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nakṣatranighaṇṭu 6*a*, Rāśinighaṇṭu 7*b*, Bhāvanighaṇṭu 8*a*, Lagnādyadhipatiphalanirūpaṇa 9*a*, Grahanighaṇṭu 10*a*, Jyautiṣa 12*a*.

Wants the beginning and the end.

Same work as the above. A small portion at the end is in Tamil.

No. 13613. अष्टकवर्गः.
AṢṬAKAVARGAḤ.

Pages, 43. **Lines**, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 2479.
Wants the beginning and the end.
Same work as the above.

No. 13614. अष्टकवर्गः, आन्ध्रटीकासहितः.
AṢṬAKAVARGAḤ WITH TELUGU MEANING.

Pages, 28. **Lines**, 9 on a page.

Begins on fol. 22*a* of the MS. described under No. 13609.
Incomplete.
Similar to the work described above. The first four leaves contain some of the diagrams of the Aṣṭakavarga.

Beginning:

सूर्यस्य पुत्रवासो दधानोऽयम् । चन्द्रस्य गोसानये । कुजः पुत्रवान् सदाधनाढ्यः

* * * *

ग्रहप्रभृतिसंस्थानं निर्दिशेदक्षरैः क्रमात् ।
राशिचक्रं लिखेद्भूमौ संयोज्याक्षरसङ्ख्यया ॥
शून्याक्षरेण शमं निर्दिशेद्विधिवत्ततः ।
सूर्यादिलग्नपर्यन्तमेतैर्वाक्यैस्सुयोजयेत् ॥
स्वेषु स्वेषु च वर्गेषु गणानां च पृथक् पृथक् ।
दशा द्वादश संभिन्ना योजयेत्तत्र तत्र हि ॥
ग्रहादीनां फलं हित्वा निर्देशश्च पृथक् पृथक् ।
दशायां शून्यभागेषु शत्रुनीचग्रहेषु च ॥

End:

मन्दे नीचांशहीनेऽपि स्त्रीवित्तनिधिवृद्धिकृत् ।
एकद्विबिन्दुसंयुक्ते लग्ने सौरिबलेऽपि च ॥
सर्वसौभाग्यनाशः स्याज्जन्मप्रभृति दुःखवान् ।
नीचे वा शत्रुभे कुम्भे पञ्चमाधिपसंयुते ।
लग्ने वा पञ्चमे वापि गलरोगं विनिर्दिशेत् ॥

No. 13615. अष्टकवर्गः, आन्ध्रटीकासहितः.

AṢṬAKAVARGAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 16⅜ × 1 inches. Pages, 14. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bṛhajjātakavivṛti (Jagaccandrikā) 8*a*, Vāñchānāthīya 140*a*.

Incomplete.

Same work as the above.

No. 13616. अष्टकवर्गः.

AṢṬAKAVARGAḤ.

Pages, 56. Lines, 6 on a page.

Begins on fol. 78*a* of the MS. described under No. 13425.

Complete.

Similar to the work described above.

Beginning :

प्रणम्य भास्करं भक्त्या गुरूं भक्त्या प्रणम्य च ।
एकान्ते शुद्धदेशे च कृष्णमभ्यर्चयेद्बुधः ॥
स धूपदीपनैवेद्यं कल्पयेच्चक्रमुद्धरेत् ।
अष्टकवर्गस्य वाक्यानि सूर्यादीनां यथाक्रमम् ।
तत्तल्लग्नाश्च संस्थानं निर्दिशेदक्षरक्रमात् ॥
देवो धवो धिगो भीमः क्षेमो रामो धिगक्रमात् ।
एवमष्टकवर्गक्ये (?) जन्मलग्नादिद्वादशराशिषु ॥

* * * *

ग्रन्थान्तरे—

पितृपक्षस्तथा सूर्यः मातृपक्षश्च चन्द्रमाः ।
भ्रातृपक्षं सहानं च काञ्चनं भूमिजेन तु ॥

* * * *

अष्टकवर्गदशामार्गं सर्वेषां संमतं विदुः ।

एवं रव्यादिलग्नपर्यन्तमायुर्वर्षमासादिसिद्धे सति ग्रहाणामधिकबलवश्यं पूर्वपरादशाकल्पनाकथ (न) मुपायः ।

End :

केतोः—

बन्धुवित्तविनाशं च ज्वरं स्फोटकमेव च ।
विषभीतिर्मनोदुःखं केतोरादिदशाफलम् ॥

शुक्रस्य—

धनधान्यसमृद्धिश्च प्रतिष्ठा प्रीतिरेव च ।
विद्यालाभो विवाहश्च शुक्रस्य तु दशाफलम् ॥

Colophon :

महादशा संपूर्णा ॥

No. **13617.** अष्टकवर्गः

AṢṬAKAVARGAḤ.

Pages, 13. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 13601.
Wants the beginning, otherwise complete.
Similar to the work described above.

Beginning :

चन्द्राष्टवर्गे निक्षिप्य शून्यराशिगते विधौ ।
तन्नक्षत्रं परित्यज्य शुभकार्याणि कारयेत् ॥
चन्द्राष्टमेषु नक्षत्रे तृतीयेषु . . . . . .
आयासव्या + यः ॥
चन्द्रात्सुखफलात्पिण्डं वर्धयेत् शोध्य पूर्ववत् ।
शेषितर्क्षे शनौ याते मातृहानिं विनिर्दिशेत् ॥
त(त्रिको)णेषु वा केचिद्दशाच्छिद्रेषु कल्पयेत् ।
चन्द्रलग्नात्सुखस्थानं वर्तते भास्करात्मजे ॥
दृश्यते वा तयोस्स्थानं पूर्वोक्तं कालसङ्गमे ।

End :

विदधति जयसौख्यं बिन्दवस्सप्तपुंसां
परजनयुवतीनां सङ्गमं साहसाद्वा ।
रणभुवि रिपुहानिर्वस्त्रभूम्यार्थलाभो
मणिरजतसुवर्णस्त्यागभोगाम्बरासेः ॥
बिन्द्वष्टके रथगजाश्वनराम्बरादि-
स्रग्गन्धभूषधनधान्यमुपैति जातः ।
देशाधिपत्यमवनीपतिपूजनादि
कीर्तिश्च सर्वजननन्दनता प्रतापः ॥

Colophon :

इत्यष्टकवर्गं समाप्तम् ॥

वेङ्कटावधानिस्वहस्तलिखितम् ॥

No. 13618. अष्टकवर्गः.

AṢṬAKAVARGAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 10. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 143*a*. The other works herein are Jaiminisūtra 1*a*, Jaiminisūtravṛtti 4*a*, Jātakakalānidhi 35*a*, Bhāvasārasaṅgraha 45*a*, Kanyādānasaṅkalpa 51*a*, Naṣṭacintādhyāya 54*a*, Vēdhāphalanirūpaṇa 56*a*, Praśnaśāstra 58*b*, Pañcapakṣiśāstra 61*b*, Vaiṣṇavaśāstra 64*a*, Jñānapradīpikā 85*a*, Jyōtiḥpradīpikā (Jaiminisūtravyākhyā) 99*a*, Jaiminisūtravṛtti 109*a*, Santānadīpikā 113*a*, Jaiminisūtravṛtti (with Telugu meaning) 118*a*, Strījātaka 129*b*, Phalagrantha 130*b*, Jātakacandrikāvyākhyā 139*b*.

Incomplete.

Similar to the work described above.

Beginning :

अथाष्टकवर्ग उच्यते—

त्रयोदशोर्ध्वगा रेखास्तिर्यग्रेखास्तथा नव ।
एतच्चक्रं चाष्टवर्गविन्यासक्रममुच्यते ॥
मन्दार्यारार्कशुक्रज्ञशशिलग्नं यथाक्रमम् ।
ऊर्ध्वे . . . . लिखेन्मन्दपुरस्सरम् ।
ग्रन्थोक्तविधिना बिन्दून् रेखा यत्र न बिन्दवः ॥

रवेः—

त्रिपश्चरिप्फारिविवर्जितेषु रविः शुभस्स्यात् कुजमन्दयोश्च ।
जीवान्नवायारिनुते सिताच्च सप्तारिरिप्फेषु शुभप्रदा . . . ॥

End :

मूर्तिं तत्र विजानीयात् तत्त्रिकोणेऽथवा भवेत् ॥
एवमेव विजानीयात् पितृमातृगृहादिषु ।
प्रादक्षिण्यादिराशीनां फलान्येकत्र योजयेत् ॥

अधिके शोभनं विद्या . . . युक्ते विशेषतः ।
सर्वेषु हीनभागेषु तद्भावं वर्जयेत् सदा ॥

No. 13619. अष्टकवर्गः.
AṢṬAKAVARGAḤ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 62. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other works herein are Jaiminisūtravyākhyā (Jyōtiḥpradīpikā) 32*a*, Jaiminisūtra (with Kanarese meaning) 85*a*, Jaiminisūtra 105*a*, Jyautiṣaviṣaya 111*a*.

Incomplete.

Similar to the work described above.

Beginning :

वराहमिहिरोक्ताष्टकवर्गबिन्दून् उक्तरीत्या उदाह्रियन्ते । के पुनरष्टकवर्गाः ? अष्टानां वर्गः अष्टकवर्गः । सूर्यादिशनिपर्यन्ता ग्रहास्सप्त लग्नं चेत्यष्टौ । अत्र वर्गशब्देन अक्षाणां समूहवचनं विवक्षितम् । एते अष्टकवर्गाः ग्रहाणां शुभाशुभफलकथने उपकारिणो भवन्ति । तत्र यवनेश्वरः—

"अर्केन्दुभौमेज्यासितज्ञमन्दलग्नस्य चोपकरणाः प्रविष्टाः ।
स्वयम्भुवा वेददृशा यदाज्ञां बलानि य . . चतुरङ्गकानि ।" इति ॥

अत्राक्षं द्विविधम्—श्वेताक्षं कृष्णाक्षं चेति । श्वेताक्षाणि स्यादर्कः प्रथमाय इत्यादिना वक्ष्यमाणस्थानानि । कृष्णाक्षानि तत्रानुक्तस्थानानि । तत्र श्वेताक्षाणां स्थान इति पर्यायः कृष्णाक्षाणां करण इति पर्यायः । प्रकारान्तरेण श्वेताक्षाणां बिन्दुरिति पर्यायः कृष्णाक्षाणां रेखेति पर्यायः । अत्र श्वेताक्षाणि शुभफलप्रदानि ।

End :

ऐश्वर्यमर्थलाभं च वदेदेकादशात्फलम् ।
पापस्थानं व्ययस्थानं द्वादशस्थानतो विदुः ॥
शरीरनाशं देहं च चिन्तास्थानं च चिन्तयेत् ।
एवं द्वादशभावेषु चिन्तयेन्मतिमान्नरः ॥

No. 13620. अष्टकवर्गः.
AṢṬAKAVARGAḤ.

Pages, 10. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 13605.

Wants the beginning in the Sūryāṣṭakavarga.
Similar to the work described above.

Beginning:

. . . शरीरदौर्बल्यं राहुकेतोर्विनिर्दिशेत् ।
स्वातन्त्र्यं लग्नबलतः परतः परदेशगः ॥
अथ त्रिकोणशोधनाक्रमः—
षष्ठाष्टवर्गमेकस्मिन् त्रिकोणेषु तु राशिषु ।
न्यूनं यत्र फलं तेन तुल्यं त्रिष्वपि शोधयेत् ॥
यद्येकत्र फलं नास्ति शोध्यं सर्वं तदन्ययोः ।
एकस्मिन् भवने शून्ये तत् त्रिकोणं न शोधयेत् ॥

End:

वेदेनादौ परिहृतफलादन्तरायग्रहोक्तैः
वाक्यैरुक्तैर्भुजितमथवास्वादशावेदनार्जैः (?) ।
रम्भानारीप(ति)रयमिदं वार्कचाथ[ति]पादा
क्षोणीभ्राशाचहरणविधौ (?) लग्नसौम्यग्रहाणाम् ॥

No. 13621. अष्टवर्गादिनिरूपणम्.
ASṬAVARGĀDINIRŪPAṆAM.

Substance, palm-leaf. Size, 9 × 1¼ inches. Pages, 7. Lines, 6 on page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 40b. The other works herein are Dvādaśabhāvaphala 1a, Rōgalakṣaṇa 20a, Gōcārādiphala 22a, Gaulīpañcapakṣiśakunādi 34a, Kālacakramahādaśādi 44a, Kālaprakāśikā 46a.

Incomplete.
Similar to the above.

Beginning:

सूर्याधिष्ठितवाक्यानि समस्तानि क्षिपेत्फलम् ।
अष्टवर्गाणि वाक्यानि गणयेद्वर्णसङ्ख्यया ॥
देव्ये देव्ये धिगो शिवं ततो रामो धगः क्रमात् ।
सर्वाष्टकवर्गवाक्यस्य —
तस्य सूर्ये त्रिकोणे च यं न्यूनं तत्तुल्यं त्रिषु शोधयेत् । एकस्मिन् भवने शून्ये त्रिकोणं न शोधयेत् ।

समत्वे वा सभागेषु सर्वं संशोधयेद्बुधः ।
एवं त्रिकोणं संशोध्य पश्चादेकाधिपत्यमा(वा)न् ॥

* * * *

उभयोर्ग्रहसंयुक्ते न संशोध्यं कदा चन ।
उभाभ्यां ग्रहहीनाभ्यां समनिरीक्षिते जातस्य मरणं ध्रुवम् ॥

End :

जीवेन्दूष्णकराः कुजस्य सुहृदौ ज्ञोऽरिस्सितार्कौ समौ
मित्रं सूर्यसुतो बुधस्य हिमगुः शत्रुस्समाश्चापरे ।
सूर्ये सौम्यसितावरी रविसुतो मध्यः परे त्वन्यथा
सौम्यार्कौ सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ॥

No. 13622. अष्टैश्वर्यफलग्रन्थः.

AṢṬAIŚVARYAPHALAGRANTHAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 13606.

Incomplete.

A treatise explaining the method for finding out the astrological conditions and circumstances under which eightfold kinds of prosperity attend kings.

Beginning :

अष्टैश्वर्यफलं वक्ष्ये सर्वशास्त्रार्थसम्मतम् ।
अष्टयामाष्टकफलं भूभुजामिव सर्वदा ॥
तात्कालिकान् ग्रहान् सर्वान् स्तु(स्फु)टीकृत्योक्तमार्गतः ।
रव्यादिकान्ग्रहान् नात्र सलग्नान्नामयेद्बुधः ॥
सार्धद्विनाडिपर्यन्तं लग्नमत्र प्रकी(र्ति)तम् ।
भानुवारादिसिंहादि सोमवारे कुलीरतः ॥
सर्वदा भौमवारे तु सोच्चस्थे वृश्चिकादितः ।

* * * *

अष्टैश्वर्यप्रकारेण ग्रहाणामष्टधा क्रमात् ।
दिनाष्टयामपतयः सूर्यशुक्रमहीसुताः ॥

End :

एवं समीक्ष्य निपुणां मतिशास्त्रबुद्धि
यत्ते गुरुर्विविधशास्त्रमुखोद्भवानि ॥
इत्यादिनोक्तं बलमत्र चिन्त्य-
मन्येषु शास्त्रेषु बहुत्वयोगे ।

यथस्त्रमात्रं सुधिया विलोक्यं
ध्यात्वेश्वरं तन्निमिषात्कदाचित् ॥
अष्टैश्वर्यफलं प्रोक्तं ग्रहाणामष्टधा क्रमात् ।
* * * *
सवितुरुदयमारभ्य सार्धद्विनाड्या
रसा(धि)पतिगतिरंशे वियक्रमात् मेषगो अन्यम्. (?)

No. 13623. आयुर्दायाध्यायः.

ĀYURDĀYĀDHYĀYAḤ.

Substance, palm-leaf. Size, 13⅝ × 1¼ inches. Page, 1. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 14*b*. The other works herein are Jātakayōgāvali 1*a*, Candraṣaṭtriṁśadavasthā 15*a*, Yōgadvādaśaphala 15*b*, Bṛhajjātaka (with Telugu meaning) 19*a*, Bhāvanighaṇṭu 26*b*, Kārakanighaṇṭu 27*b* and 29*b*, Rāśinighaṇṭu 27*b*, Grahanighaṇṭu 28*a*, Bhāvanighaṇṭu 28*b*, Lagnādinirṇaya (with Telugu) 30*b*, Ṣaḍvargaśuddhiprakaraṇa 32*a*, Jātakacandrikā 36*a*.

Incomplete.

States what will be the duration of the life of a person born under certain astrological conditions.

Beginning:

अथायुर्दाययोगः—

लग्नेऽर्कचन्द्रफणयोर्जीवद्वयगतेपि वा ।
अष्टाविंशतिवर्षैः स्यान्मरणं निश्चयं भवेत् ॥
पापमध्यगते सूर्ये लग्नेशे शत्रुवेश्मनि ।
जातः स्याद्रोगपीडा स्यात् परमायुरपि त्रयम् ॥

End:

जन्मलग्ने शनिस्तिष्ठन् हिबुके भौमसंयुते ।
सप्तमे सूर्यसंयुक्ते शुभदृष्टिविवर्जिते ।
त्रिपक्षे तु त्रिमासे तु शिशोर्मृत्युर्भविष्यति ॥

No. 13624. आयुर्विनिश्चयः.

ĀYURVINIŚCAYAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 20*b* of the MS, described under No. 13606.

Incomplete.

A treatise in horoscopy explaining the method of finding out the duration of the life of a person from the relative position occupied by the planets at the time of his birth.

Beginning :

प्रायेण मन्दबुद्धीनां मनुष्याणां कलौ युगे ।
लघुनैव प्रकारेण वक्ष्याम्यायुर्विनिश्चयम् ॥
आयुषं त्रिविधं लोके पूर्णमध्याल्पनामभिः ।
तथैव त्रिविधा ज्ञेया दशा पश्नेषु जातके ॥
नक्षत्रगतनाडीभिः पञ्चभिः पञ्चभिः क्रमात् ।
आरभ्य चन्द्रराशिं वा लग्नं वा लग्नमानयेत् ॥
कश्चिच्चन्द्रः कश्चिल्लग्नं कश्चिन्मेषः कश्चिद्रविः ।
सर्वत्र चन्द्रमामुख्याः परे तु बलवत्तराः ॥

* * * *

एवं लग्नद्वयं नीत्वा दीर्घमध्याल्पनिर्णयः ।
चरे चरस्थिरद्वन्द्वाः स्थिरे द्वन्द्वचरस्थिराः ॥
द्वन्द्वे स्थिरोभयचरा दीर्घमध्याल्पनिर्णयम् ।

End :

ये हि पूर्णायुषां योगा भाग्ययोगास्तु ते कचित्
कचिदायुः कचिद्भाग्यं वादादुभयं कचित् (?) ।
लग्नेशो यदि मे लग्ने लग्नेशा तदिमे शुभे ।
शुभदृष्टिशुभैः वुद् भाग्यक(?)

No. 13625. उडुजातकम्
UḌUJĀTAKAM.

Pages, 20. Lines, 16 on a page.

Begins on fol. 13*a* of the MS. described under **No. 915** of the Descriptive Catalogue of the Tamil MSS., Vol. II.

Complete.

A treatise setting forth the nature and result of the influences exerted by each of the planets on a person during their respective periods as may be gathered from one's horoscope. The author is given as Cāṇakya.

Beginning :

धात्री यत्पदसंपर्कात् सग्रहर्क्षा विराजते ।
तस्मै सर्वात्मनेऽजाय भास्करज्योतिषे नमः ॥

नवग्रहदशाभुक्तिफलबोधप्रकाशकम् ।
चाणक्यस्सर्वसारज्ञो वक्ष्येऽहमुडुजातकम् ॥
अथ तरणिदशायां कौर्यभूवाध(धि)युद्धैः
धनमनलचतुष्पात्पीडनं नेत्रतापः ।
उदरचरणरोगः पुत्रदारार्तिरुच्चैः
गुरुजनविरहस्स्याद्भृत्यनाशोऽर्थहानिः ॥
रिपुक्षयो व्याधिशमो धनागमः कृषिक्रिया ग्रहकरणं सुहृद्युतिः ।
क्षयानिलप्रतिहतिरर्कदायकं शशी यदा विशति भवेद्वपुष्मताम् ॥

End:

तनयसौख्यबहिष्कृतिरग्निजं भयमतीव विनाशनमन्तरुक् ।
अपिच वारवधूजनसंयुतिश्शिखिनि यात्यलमौशनसीं दशाम् ॥
इनशशिकुजराहुर्जीवमन्दज्ञकेतुः भृगुरिति च नवानां कृत्तिकादि क्रमेण ।

Colophon:

इति श्रीमदुडुजातकं संपूर्णम् ॥

No. **13626.** उडुदशादिफलम्, आन्ध्रटीकासहितम्.

UḌUDAŚĀDIPHALAM WITH TELUGU MEANING.

Pages, 12. Lines, 5 on a page.

Begins on fol. 75*a* of the MS. described under No. 13609.

Contains up to Kētudaśāphala.

Similar to the work described above.

Beginning:

సూర్యమహా దశ ౬ కి అన్తర్దశ నేల 3 ది ౧౮ యింటికి ఫలం.
రవి అన్తరాన్త దశ ది౫ ఘడియలు -౨ కి౮ ఫలం.

देशत्यागो महाभीतिः कुक्षिरोगं धनक्षयम् ।
. . . नेन महाकष्टमन्तरान्तर्दशा रवौ ॥

రవి సూక్ష్మదశ ఘడియలు ౧౬ విఘడియలు ౫౨ కి ఫలం.

गुणभूमिपरित्यागो निर्गच्छत्यात्ममारणम् ।
ज्ञाननाशो महाहानिः सूर्यसूक्ष्मदशाफलम् ॥

End:

चोरस्तु(स्व) भोक्ता मतिमान् धनाढ्यराजे च षण्डोऽरिजयी दरिद्रः।
कार्येषु दक्षः खलु कर्मकर्ता क्षुद्रस्तु विद्वानपि जातकांशः ॥

* * * * *

Colophon:

इति केतुदशा समाप्ता ॥

ఉడు కేతు మహాదశ యోంఘ్రి ౭౦ కి ఫలం.

No. 13627. उडुदशाफलादिविषयः, आन्ध्राटीकासहितः.

UDUDAŚAPHALĀDIVIṢAYAḤ WITH TELUGU MEANING.

Pages, 14. Lines, 7 on a page.

Begins on fol. 34*a* of the MS. described under No. 13606.
Incomplete.
Similar to the work described above.

Beginning:

अश्विन्या जन्मऋक्षान्तं गणयेद्विषसंयुतम् ।
अष्टभिर्हरेते भागं तच्छेषं च यथाक्रमम् ॥

मङ्गला, पिङ्गला, धान्य, भ्रमरी, भद्रका तथा उल्का, सिधा(द्धा), सङ्काट-दशाष्टधा स्मृता संज्ञाधिकारः प्रकारः ।

यद्यद्भावपतिमेव लग्नं कृत्वा तदपेक्षया तत्तद्भावमारभ्य दशायां भावाधिपतेरष्टमाधिपतित्रिकोणराशिदशायां तत्तन्मरणं भवति ।

* * * *

चरे चरस्थिरद्वन्द्व इति न्यायेनायुर्निर्णयविषये अतिदीर्घात्यल्पादिपरिज्ञानायोपाया लिख्यन्ते –

चरे जन्मलग्नं होरालग्नं चरे दीर्घायुः ।

End:

गुरुस्सर्वबलोपेतः स्वोच्चमित्रस्ववर्गगः ।
लग्नकेन्द्रत्रिकोणस्थः सर्वारिष्टविनाशकृत् ॥

अष्टमदेहकर्माधिपाः केन्द्रत्रिकोणेषु स्थिताश्चेत् दीर्घायुर्भवति ।

No. 13628. कारकनिघण्टुः.

KĀRAKANIGHAṆṬUḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 20*b* of the MS. described under No. 13623
Complete.

In this work the particular ways in which each of the planets exercise their influence for good or evil on a person are all indicated in one place.

Beginning :

पितृप्रतापमारोग्यमनश्शुद्धिज्ञानोदयदुर्गारण्यरथगजतुरगपद्मादि(ति)नगर-
कारको रविः ।

धवलचामरयशोदय(।)शान्तिमुखलावण्यमातृमनःप्रसादकारकश्चन्द्रः ॥

End :

तेषां प्रतिष्ठाकारको राहुः । वंशवृद्धिबुद्धिस्थैर्यमातुलबान्धवज्ञातिसदाचा
रोदारवृत्तमनोमातामहमोक्षकारकः केतुः ॥

No. **13629.** कारकनिघण्टुः.
KĀRAKANIGHANṬUḤ.

Pages, 2 *Lines*, 7 on a page.

Begins on *fol.* 1*b* of the MS described under No. 13606.
Complete.
Similar to the above

Beginning :

वनज्वरत्रिणदक्षिण(?) . . . . . शक्तिपितृकारकस्सूर्यः ।

कदलीनारिकेलजीवग्रहपशुमहिषीश्वेतवस्त्रमनोबुद्धिहर्म्यप्रासादादिमौक्तमातृका-
रकः चन्द्रः ।

End :

वज्रवैडूर्यमरकतपुष्यरागादि . . . . कैवल्यकारकः
केतुः ॥

No. **13630.** कारकनिघण्टुः.
KĀRAKANIGHANṬUḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 2. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 7*a*. The other works herein are Pādacchāyāhōrātrakālanirṇaya 1*a*, Nāmanakṣatrādisvarūpa 2*b*, Nakṣatranighaṇṭu 3*b*, Rāśinighaṇṭu 4*b*, Grahanighaṇṭu 5*b*, Bhāvanighaṇṭu 6*a*, Rāśikālarāśīśanirṇaya 7*b*, Bhāvanighaṇṭu 8*a*.

Complete.

Similar to the above.

Beginning :

आत्मप्रभावपितृपश्वादिराजमूलजीवनकारको रविः । मातृगीतसस्यवनस्पति-भोजनसौख्यमनोविलासशीतकारकश्चन्द्रः । भ्रातृसत्त्वगृहक्षेत्ररणरोगधैर्य . . साहसमणिमन्त्रौषधक्रियासिद्धिश्रोत्रियजीवनकारकः कुजः ।

End :

भाग्ययोगम्लेच्छक्षुद्रकारको राहुः । सत्कर्ममन्त्र[कौ] देवताभक्तितीर्थचरण-संन्यासभूप्रदक्षिणसंन्यासव्यसनमोक्षकारकः केतुः ।

No **13631.** कारकनिघण्टुः.

KĀRAKANIGHAṆṬUḤ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 4. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 19*a*. The other works herein are Āpastambapūrvaprayōga 1*a*, Jyautiṣaviṣaya 11*a*, Ravyādipādacāravākyāni 21*a*. Jyautiṣaviṣaya 23*a*, Bhūgōla 29*a*.

Complete.

Similar to the above

Beginning :

आत्मपितृनेत्रदक्षिणबाहुहोमदेवशक्तिप्राणभावस्वर्णशास्त्रज्वरश्लेष्मपैत्त्योष्ण-शिरोरोगमरीचिकाकान्तियवगोधूमपक्षिक्षुद्दिवाताम्रदाडिमाम्रफलचित्राक्षौमवसन-स्फटिकार्केन्द्रधनुनाडिन्धमगुञ्जादर्पणविद्युद्धटीयन्त्रवास्तुघटादीनां कारको रविः ।

End :

ध्वजपताकनवरत्नास्थिविक्रमकपटदुष्टजिह्वामोक्षकुलुत्थपुच्छगोपुरतोरणवज्र-वैडूर्यपीताम्बरमाणिक्योल्कापाताशनिप्रतिबन्धकानां कारकः केतुः ॥

No. **13632.** कारकनिघण्टुः.

KĀRAKANIGHAṆṬUḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 13600.

Complete.

Similar to the above.

Beginning :

रविर्धनाजितोद्योगः पितृसौख्यसुखप्रदः ।

चन्द्रः— मनःप्रदाता(सादा)न्नवस्त्रमातृ[मात्र]सौख्यसुखप्रदः ॥

शौर्योदारबलक्षेत्रसाहसोदारकृत्कुजः ।
प्रज्ञाशिल्पवचोबन्धुगणितज्ञानिनो बुधः ॥

End :

कलहकिल्बिषम्लेच्छजननिन्दितस्त्रीसङ्गमत : पुत्रोत्पत्तितत्कुलवृद्धिः क्षणे क्षणे विकारगुणमोक्षकारकः केतुः ॥

No. 13633. कारकनिघण्टुः.

KĀRAKANIGHANTUH.

Page, 1. Lines, 6 on a page.

Begins on fol. 27*b* of the MS. described under No. 13623.

Complete.

Similar to the above.

Beginning :

आत्मप्रभावशक्तिपितृकारकस्सूर्यः ।
मनोबुद्धिप्रसादमातृकारकश्चन्द्रः ॥

End :

भाग्यवाहनकारको राहुः ।
यशःप्रतिष्ठाछत्रकारकः केतुः ॥

No. 13634. कारकनिघण्टुः.

KĀRAKANIGHANTUH.

Substance, palm-leaf. Size, 13 × 1¼ inches. Pages, 2. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 38*a*. The other works herein are Jātakaviṣaya 1*a*, Brahmayajña 39*a*, Pitṛtarpaṇa 40*b*.

Complete.

Same work as the above.

No. 13635. कालचक्रक्रमः.

KĀLACAKRAKRAMAH.

Pages, 5. Lines, 8 on a page.

Begins on fol. 10*b* of the MS. described under No. 13605.

Complete.

A minor treatise on horoscopy dealing with the nature and period of planetary influences as based upon certain special method of calculation.

Beginning :

अथ कालचक्रदशा—

जन्मनाथदशायां तु घटीपञ्चदशात्मकम् ।
शिष्टनाडीं तु सङ्गुण्य जन्माधिपदशाब्दकैः ॥
तिथिभक्तावशिष्टास्ते वत्सरास्तत्र शेषिताः ।
प्रियनागानलैर्हत्वा मान्यैर्मानदिनादिकम् ॥

* * * *

सूर्यादिवत्सराः प्रोक्ताः कालचक्रक्रमो बुधैः ।
राश्यंशर्क्षेऽर्कभेदेन्दोर्मेषाद्याति क्रमात् क्रमात् ॥

* * * *

अथ वाक्यानि—

पारं लेभे शान्तः सुजलः । नायं प्रादात् सीतां विमलाम् ।
रूपं प्राथ्यं स्निग्धकराङ्गम् । वाक्शीलौसौ दोग्धा नान्यत्र ॥

End :

मृगशिराप्रथमपादे—१२, ११, १०, ९, ८, ७, ६. ५, ४.
द्वितीये—३, २, १, ९, १०, ११, १२. १, २.
तृतीये— ३, ५, ४, ६, ७, ८, १२, ११, १०.
चतुर्थे—९, ८, ७. ६, ५, ४, ३, २, १.
आर्द्रानक्षत्रस्य रोहिणीभङ्गे.

Colophon :

इति कालचक्रक्रमः ॥

No. **13636.** कालचक्रम्.

KĀLACAKRAM.

Pages, 14. Lines, 18 on a page.

Begins on fol. 39*a* of the MS. described under No. 13570.

Complete.

Explains Kālacakra as consisting of Bhūcakra and Khēcaracakra and describes what kind of good or evil is likely to befall to a person from the relative position occupied by the planets in a given horoscope according to certain methods of calculation.

Beginning :

अथ वक्ष्ये विशेषेण कालचक्रस्य निर्णयम् ।
तत्कालचक्रं द्विविधं पूर्वं प्रोक्तं महर्षिभिः ॥

भूचक्रं खेचरं चक्रमिति सर्वत्र सम्मतम् ।
मेषादिमीनपर्यन्तं भूचक्रमिति कल्पितम् ॥
वृश्चिकाद्यपसव्येन चापान्तं खेचरं तथा ।
भूचक्रस्य च व्यत्यास्या(सा)त्खेचक्रं जायतेऽधुना ॥
तत्प्रकारो यथास्पष्टं भवत्यत्र विधीयते ।

End :

सत्य सिंहावलोके तु चतुष्पाद्भयमग्निजम् ।
पृष्ठतो गमनं सव्ये धनधान्ये पशुक्षयम् ॥
पितुर्मरणमालस्यं तत्समानेषु मामृते ।
मण्डूकगमने वामे स्त्रीसुतार्थपरिभ्रमम ॥
तापजं वीरमृगाद्भीतिः नृपशत्रुपदच्युतिः ।
सिंहावलोकने वामे स्थानभ्रंशं पितुर्मृतिम् ॥
पृष्ठतो गमने वामे जलाद्भीतिः पदच्युतिः ।
पितृनाशं नृपक्रोधं दुर्गारण्याटनं वदेत् ॥

Colophon :

इति कालचक्र सम्पूर्णम् ॥

No. **13637.** कालचक्रम्, द्राविडटीकासहितम्.

KĀLACAKRAM WITH TAMIL MEANING.

Pages, 75. Lines, 6 on a page.

Begins on fol. 116*a* of the MS. described under No. 13425.

Incomplete.

On the process of finding out the planetary periods and sub-periods in relation to a horoscope according to certain methods of calculation.

Beginning :

कालचक्रं प्रवक्ष्यामि नराणां हितकाम्यया ।
यावद्देहादिजीवान्तमिति चक्रस्य निर्णयम् ॥

दशावर्षनिर्णयः—

भूत्यैकविंशद्विर(द्रत)यो नव दिक् षोडशाब्द(ब्ध)यः ।
चत्वारश्चेति (वि)ज्ञेयात् क्रमात् सूर्यादिवत्सरात् ॥
देहजीवक्रमाश्चेव महादशान्तर्दशी ।

उभये मार्गतो वक्ष्यन्ते तेषामपि फलाश्रितास्तद्दशादशादिनात् कटपयादिना तस्यानुकूलं श्लोकं वक्ष्यते । दक्षिणोत्तरे दक्षिणमार्गे मेषमहादशे मेषस्य स्वयं देहे धनुर्जीव इति स्मृतः ।

* * * *

Colophon :

मेषाङ्गारकचक्रं सप्तवर्षाणि दशास्समाप्ताः ॥

End :

मेषादिमीनलग्नान्तमायुर्दायस्य निर्णयः ॥
मेषलग्ने स्वयं देहो धनुर्जीव इति स्मृतः ।
देहादिजीवपर्यन्तमन्तर्भुक्तिश्च निर्णयः ॥

पौरं गावो माता सहोधीः मेषकुजतुलासु मेषकुजभुक्तिः மீ 5, நாள் 26, நாழிகை 24. இந்த வ்யாகரம் ஒரு வாக்யத்துக்கு ஒன்பது ராசி ஹாக்ஷி வரும். அப்புறம் . . . ராசி முதல்கொண்டு ஒன்பது ராசி ஹாக்ஷி வரிசை கிரமத்தில் பார்த்துக்கொள்ளவும்.

No. 13638. कालचक्रम्.

KĀLACAKRAM.

Pages, 12. Lines, 8 on a page.

Begins on fol. 45*a* of the MS. described under No. 13609.

Incomplete.

Similar to the above.

Beginning :

कालचक्रं प्रवक्ष्यामि नराणां हितकाम्यया ।
यावद्देह(द्देहादि) जीवान्तमिति चक्रस्य निर्णयः ॥

ग्रहायूंषि—

सूर्यादीनां क्रमादायुः राशीनां क्रमशोदयः ॥

देहजीवक्रमाश्चैवमहर्दशान्तर्दशासूक्ष्मदशाप्राणदशाफलानि सव्यापसव्यमार्गे वक्ष्यते । तेषां महीफला नृणां वाक्येषु पूर्ववर्णित टकयादि । अन्तश्चक्रबलाबलं श्लोकं वक्ष्ये, क्षी(दक्षि)णोत्तरमार्गे मासमहादशाफलानि लिख्यन्ते—

कटके तुलामासः 46 दिनानि घटिकाः 30.

End :

प्रज्ञाशिल्पवचोबन्धु.

No. 13639. कालचक्रम्, द्राविडटीकासहितम्.
KĀLACAKRAM WITH TAMIL MEANING.

Pages, 19. Lines, 7 on a page.

Begins on fol. 106*a* of the MS. described under No. 13425.
Complete.
Similar to the above.

Beginning:

अतः परं प्रवक्ष्यामि कालचक्रफलस्फुटम् ।
अश्विपुनर्वसुहस्ता मूलप्रोष्ठपदानि तु ॥
अंशकान् गणयेन्मासान् प्रादक्षिण्यक्रमेण तु ।

कालचक्रवाक्यम्—

पौरं गावो मातासहोधी ।
नक्षत्रदासीचर्वणगः ।
रूपोऽत्र क्षुन्निधाय रङ्गम् ।
वाणी च सद्धी नक्षत्रम् ।

* * * *

पौरं गावो माता सहोधी मेषचक्रम् ।
मेषस्य तु स्वयं देहो धनुर्जीव इति स्मृतः ।
कुजचक्रं ௵ 7 க்கு भुक्तिः—

End:

கந்நி திசெசெல ௴ 10 நாள் 24.
ஸிம்ஹ திசெசெல ௴ 6.
கடக திசெசெல ௴ 25 நாள் 6.
மிதுந திசெசெல ௴ 10 நாள் 21.
வ்ருஷப திசெசெல ௴ 19 நாள் 1?.
ஆக ௴ 1'0-க்கு ௵ 10.

Colophon:

कालचक्रभुक्तिः संपूर्णम्(।) ॥

No. 13640. कालचक्रगतिः.
KĀLACAKRAGATIḤ.

Pages, 5 Lines, 6 on a page.

Begins on fol. 56*b* of the MS. described under No. 13606.
Similar to the work described under No. 13686.
Incomplete.

Beginning :

प्रणम्य परमानन्दं शिवं परमकारणम् ।
खेचरैश्चक्रमध्यस्थं चतुःषष्टिकलात्मकम् ॥
तं दृष्ट्वा देवदेवेशी(श)मीश्वरी सर्वमङ्गला ।
कालचक्रगतिं सर्वं विस्तराद्वद मे प्रभो ॥

ईश्वर उवाच—

अहमादित्यरूपोऽस्मि चन्द्रमास्त्वं प्रचक्षते ।
संयोगेन वियोगेन जगत् स्थावरजङ्गमम् ॥
भूतैकविंशद्रतयो नव दिक् षोडशाब्धयः ।
सूर्यादीनां क्रमादब्दाद्राशीनां स्वामिनो वशात् ॥
अश्वी पुनर्वसू हस्तमूलाप्रोष्ठपदादिषु ।
अंशकान् गणयेन्मेषात् प्रादक्षिण्यक्रमेण तु ॥

* * * *

सव्यापसव्यमार्गेण अश्विन्यादि त्रिकं त्रिकम् ।
देहादि गणयेत् सव्ये वामे जीवादि गण्यते ॥
सव्ये तु प्रथमांशस्तु देह इत्यभिधीयते ।
जीवस्सर्वेऽप्यन्तपादः विलोममपसव्यके ॥

End :

आर्द्राद्यंशोपसव्येन्नवकमथ झषात्तत्परं युग्मगोऽजात्
चापात् षट्कं क्रमात् स्यात् पुनरपि युजात् षट् झषात्रीणि वामाम् ।
अन्त्ये पादे तु चा(पा)न्नवकमथ प्रणवामतो वारुणर्क्षे
देवेन्द्रे भेटर्यमर्क्षग्रहगमनदशात्कालचक्रक्रमोऽयम् (?) ॥

No. **13641.** कालचक्रजातकम्, आन्ध्रटीकासहितम्.

KĀLACAKRAJĀTAKAM WITH TELUGU MEANING.

Pages, 23. Lines, 18 on a page.

Begins on fol. 26*a* of the MS. described under No. 5764.

Incomplete.

Similar to the work described above.

Beginning :

कालचक्रमहं वक्ष्ये सङ्क्षेपाच्छृणु सूरता ।
शुभाशुभं मनुष्याणां भूतभव्यं च वक्ष्यते ॥

लग्ने वा चन्द्रलग्ने वा प्रश्नकाले यदंशके ।
तदादिनवपर्यन्तमपुष्यं परिकल्प्यते ॥
गर्भाधाने तु यः काले तत्काले जननं भवेत् ।
नवमे दशमे चैव द्वादशे (त)दनिश्रयम् ॥
आदित्यस्योदये राज्यं कृषिश्चन्द्रोदये भवेत् ।

End :

एकांशभाजौ गुरुमन्दखेटावर्कस्थितौ वा यदि कर्किसंस्थौ ।
अर्कोदये सूर्यनिरीक्ष्यमाणौ मानी भवेदत्रभवश्चिरायुः ॥
* * * *
वाणी च स्तम्भधिनक्षत्रमा ४ पा ७० मीनांश आं कर्कटचक्रम्.

No. **13642.** कालचक्रसारः, आन्ध्रटीकासहितः.

KALACAKRASĀRAH WITH TELUGU MEANING.

Pages, 6. Lines, 8 on a page.

Begins on fol. 190*a* of the MS. described under No. 13609.
Incomplete.
Similar to the above, but in a summarized form.

Beginning :

वन्देऽहं गोपिकानाथं भारतीं गणनायकम् ।
पार्वत्या कथितं प्रोक्तं कालचक्रं पिनाकिना ॥
तच्चक्रं सारमुद्धृत्य लघुमार्गेण कथ्यते ।
विलिख्य रेखाः पञ्चोर्ध्वं तिर्यक्पञ्चसमस्तथा ॥
ग्रहा द्वादश जायन्ते सव्यक्तिचचतुष्टयम् (?) ।
* * * *
द्वितीयादिषु कोणेषु राशिं मेषादिकां लिखेत् ।
एवं द्वादशराश्याख्यं कालचक्रमुदीरयेत् ॥
* * * *

ग्रहवर्षाणि——
अङ्गारकस्य सप्ताब्दं भृगोः षोडशवत्सरः ।
नवाब्दं चन्द्रसूनोस्तु शीतांशोरेकविंशतिः ॥

End :

आया(ऐ)श्वर्ययोगः——
द्वितीयसप्तमाष्टमभुक्तयः ऐश्वर्यभङ्गः । अथारूढलग्नगतयोगा उच्यन्ते——
आरूढेन निशानाथे द्वितीये.

No. 13643. कालचक्रादिनिर्णयः.

KĀLACAKRĀDINIRṆAYAḤ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 9. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Hōrāśāstra 7*a*, Jyautiṣaviṣaya 14*a*, Āyuṣyasūkta 27*a*.

Wants the beginning and the end.

Similar to the work described above. At the end a few tables of figures in respect of calculation are added.

Beginning:

अमीचरज्ञा, गुणीगुरोस्ते, सूरिस्सुरेशः, तुङ्गरङ्गभूः, धर्मस्य भागः, यज्ञस्तोमश्रीः । इलो मान्यश्रीः । कूलामगे न्यस्यशिमो रविः स्याम् । भरण्यादिस्सूर्यगतिः । कविता ।

* * * *

एते रविसङ्क्रामणः (?) ।

नालं कालं फलं फलं रागं यागं नगद्धरम् ।
चारं सारं लरे धीरं मेषाद्याद्युवकं क्रमात् (?) ॥
मातासुदाधिदासात्तं मार्गगांगुरजादिकम् ।
सूर्यास्तमयतः पूर्वं ग्राह्यस्तद्दिनमेव हि ॥
तदा परदिनं ग्राह्यं भानावस्तं गते सति ।
विलोचनघ्नस्तदयःकौहिननागासषष्ठं करणं भवा . . . ।
तिथिर्यदा पूर्णगुणाधिका स्यात्तत्त्वेन नाड्यो यमलैर्विभक्तः ॥

* * * *

अर्केंदु(स्य)पञ्च वर्षाणि सोमस्यैवैकविंशतिः ।
भौमस्य सप्त वर्षाणि नववर्षं बुधस्य च ॥
जीवस्य दश वर्षाणि षोडशे काव्ययस्तथा ।
शनिचत्वारि वर्षाणि कालचक्रस्य निर्णयः ॥

* * * *

मेषादिमीनपर्यन्तं चतुस्सङ्ख्या यथाक्रमम् ।

फलम्—

रक्तपित्तोदरव्याधिज्वरस्फोटकव्रणं तथा ॥
पितृमृत्युः भयं शत्रु (त्रोः) सूर्यचक्रफलं तथा ।
वाणिज्यं कृषिलाभं च क्षेत्रलाभं धनागमम् ॥
पुत्रज्ञानादिलाभं च चन्द्रचक्रफलं तथा ।

End :

काद्दिनव, टाद्दिनव, पाद्दिपश्च, याद्यष्टौ ॥
भूतैकविंशान् गिरया (गतय:) नवतिथिषोडशाब्धय: ।
सूर्यादिवत्सरा: प्रोक्ता: कालचकस्य निर्णयम् ॥

No. 13644. केरलज्यौतिषम्.

KĒRALAJYAUTIṢAM.

Pages, 26. Lines, 5 on a page.

Begins on fol. 25*a* of the MS. described under No. 13600

Incomplete.

Purports to deal with horoscopy in accordance with the system prevailing in the Kēraḷa country.

Beginning :

कुटुम्बाधिपतौ लाभे अष्टमाधिपसंयुते ।
कुटुम्बे पृथिवीसङ्ख्याद्दिति केरलनिश्चय: ॥
धनाधिपे राज्ययुते ऋक्षेशाधिपसंयुते ।
धनवन्ता भवेद्भूयाद्दिति केरलनिश्चय: ॥

* * * *

मोक्षाधिपे पञ्चमस्थे राज्याधिपसमन्विते ।
भाग्याधिपतिवीक्षेण दुर्गापादुकसेवकान् ॥

इति केरलश्लोका: ।

End :

लाभेशे धनराशिस्थे धनाधिपसमन्विते ।
त्रिंशत्सहस्रकं लाभं षट्त्रिंशेति विनिर्दिशेत् ॥
लाभेशे रिपुभावस्थे तद्दीशे लाभराशिगे ।
एकत्रिंशकचत्वारि शत्रुमूलाद्धनव्ययम् ॥

No 13645. केरलराजयोगसार:.

KERALARĀJAYŌGASĀRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13606.

Incomplete.

Gives a summary of what is meant by Rājayōga in relation to a given horoscope according the system of horoscopy prevailing in the Kēraḷa country.

Beginning :

. . . . . . वाणीं सूर्यादिखेटांश्च ऋषिं प्रणम्य ।
वक्ष्याम्यहं केरलराजयोगसारं समुद्धृत्य गुरुप्रसादात् ॥
द्वितीयसप्तमाधीशः ताभ्यां युक्तोऽथ वीक्षितः ।
तद्गतो . . . . ॥
. . . . . . शास्त्रदृष्ट्यातिसूक्ष्मतः ।
अथवोषरखेटांश्च ज्ञानोपायं विविच्यते ॥
तृतीयाष्टमराशीशौ पोषकौ परिकीर्तितौ ।
तौ सम्बन्धोऽपि पूर्वोक्तमारकः पोषकः ग्रहः (?) ॥

End :

द्वौ खेटावरगतौ मध्यमायुर्विनिर्दिशेत् ।
तौ आपो क्लीबभगतौ मध्यायुस्स्यान्न संशयः (?) ॥

No. 13646. कोटिचक्रयुद्धयात्रायोगफलम्.
KOṬICAKRAYUDDHAYĀTRĀYŌGAPHALAM.

Pages, 23. Lines, 8 on a page.

Begins on fol. 47*a* of the MS. described under No. 13609.

Complete.

Explains the drawing of a diagram called Kōṭicakra, with certain appropriate places therein for writing the names of the 28 constellations including the constellation Abhijit, and the predicting, with the help of the same, of victory or defeat in the battle-field or other good or evil likely to happen to a person.

Beginning :

चतुष्कं वर्तुलं दीर्घं त्रिकोणं वृत्तदीर्घकम्
अर्धचन्द्रं तथा ज्ञेयं गोस्तनं धनुराकृतिः ॥
रेखात्रयं लिखेदादौ दुर्गस्याकारभेदतः ।
कृत्तिकादित्रयं ज्ञेयं साभिजित्तत्र विन्यसेत् ॥
दुर्गभाक् गणनं चात्र ग्रहैर्वाच्यं शुभाशुभम् ।
कृत्तिकाद्यं सुबोधार्थं दुर्गभागेव विन्यसेत् ॥
दुर्गनक्षत्रविज्ञानं दुर्गपालस्वराक्षरम् ।
पुरनिर्माणसमये जन्मर्क्षे च प्रकीर्तितम् ॥
. . . .

कुलीरनक्षत्रयुतोऽलिलग्ने पक्षे सितेद्याजनिते प्रयातः ।
अश्वाधिरूढः समरं प्रयातः कुर्यात्तु लग्ने शुभदे मुहूर्ते ॥
निर्गमे चन्द्रमा यत्र प्रवेशे यत्र भास्करः ।
त्रिकाले दुर्गयुद्धं (च) कृत्वा स्थायी जयी भवेत् ॥

End:

योगमेव प्रशंसन्ति वसिष्ठात्रिपराशराः ।
तस्मात् सर्वप्रयत्नेन यात्रा योगे प्रयोजयेत् ॥
योगाद्यैः क्षितिपालविनिर्गमे शकुनैस्तस्करचारणादयः ।
तिथिनक्षत्रगुणैर्द्विजातयः क्षणवीर्यादितरो जनोऽर्थभाक् ॥

Colophon:

इति श्रीकोटिचक्रयुद्धयात्रायोगफलं सम्पूर्णम् ॥

No 13647. कोटियुद्धचक्रम्, आन्ध्रटीकासहितम्.

KŌṬIYUDDHACAKRAM WITH TELUGU MEANING.

Pages, 16. Lines, 6 on a page.

Begins on fol. 87*a* of the MS. described under No. 13606.

Complete.

Similar to the above.

Beginning:

अथातस्संप्रवक्ष्यामि कोटियुद्धस्य निर्णयम् ।
प्राकारे निर्गमे यत्र परसैन्यपराभवम् ॥

* * *

यस्याश्रयबलेनैव राज्यं कुर्वन्ति भूतले ।
विग्रहं चतुरश्रायां सीमा वै शत्रुभिस्सह ॥

* * * *

कोटि चक्रं प्रवक्ष्यामि अष्टधा तद्विशेषतः ।

* * * *

प्रथमं मृन्मयं कोटिं जलकोटिं द्वितीयकम् ।
तृतीयं ग्रामकोटिं च चतुर्थं तत्र गह्वरम् ॥
पञ्चमं गिरिकोटिं च षष्ठं कोटिं भटावहम् ।
सप्तमं वक्रभूमिस्थं विषमाख्यं तथाष्टमम् ॥

* * *

कोटिचक्रं लिखित्वा(तु) चतुरश्रं तु नाडिकम् ।
कृत्तिकादीनि भान्यत्र साभिजित्तत्र दापयेत् ॥

* * *

बहिः प्राकारमध्ये च मध्ये दुर्गे बहिर्बहिः ।
प्रवेशो निर्गमस्तत्र ज्ञातव्यं स्वरवेदिभिः ॥

End :

अस्तगे नीचगे शत्रुराशिगे वा पराजिते ॥
त्रिमासाभ्यन्तरे तत्र शत्रुरोगारिभीतिभिः ।
नाशं प्रयाति विपुलं स्तम्भगे रक्षति ध्रुवम् ॥

भागुरिः —

दुर्गराश्यंशनाशे वा तत्फले राशिराशिपे ।
वक्रातिचारगे शत्रुराशिगैर्वैरिपीडिते ॥
अरातिव्याधिदाहैश्च नाशनं च करोत्यसौ ।
सारावल्याम्.

Colophon :

कोटिचक्रं समाप्तः(प्तम्) ॥

No. 13648. गोचारादिद्वादशभावफलम्.
GŌCĀRĀDIDVĀDAŚABHĀVAPHALAM.

Substance, palm-leaf. Size, 12 × 1¼ inches. Pages, 32. Lines, 7 on a page Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Jātakālaṅkāra 17*a*, Jātakacandrikāvyākhyā 27*a*, Jyautiṣaviṣaya 40*a*.

Contains Gōcāra, Bālāriṣṭa and Dvādaśabhāvaphala.

Explains the nature of the good or evil arising from planetary influence as viewed from different aspects with reference to a person's horoscope.

Beginning :

स्थानभ्रष्टं भयं संपन्मानभङ्गं महद्भयम् ।
शत्रुक्षयं व्यधारोगं दुःखसिद्धिधनाधनम् ॥
* * * *
आदित्यचन्द्रमन्दाश्च पञ्चसप्तव्ययं गताः ।
पितरं मातरं चैव आत्मा हन्ति न संशयः ॥
* * * *
लग्ने मातापितृसुतान् रवीन्दुकुजकेतवः ।
रविसौरिकुजा घ्नन्ति द्वितीये मातरं तथा ॥
* * * *

लग्नाधिपो वा जीवो वा शुक्रो वा यदि केन्द्रके ।
तस्य पुत्रस्य दीर्घायुः धनवान् राजवल्लभः ॥

End:

एवं पुत्रकलत्रशत्रूणां तत्कारकभावाधिपवर्गेण फलं ज्ञात्वा वक्तव्यमिति । अनागतमदैवज्ञकालज्ञानं ज्ञात्वा जातकालङ्कारोक्तं भूतभविष्यद्वर्तमानं करतलामलकं यथा तथा प्रकाशितं कालज्ञानचिन्तामणाविति ।

Colophon:

द्वादशभावस्समासः ॥

रविशुक्रौ रक्तवर्णौ श्वेतौ शशिबुधौ तथा ॥
गुरुभौमौ पाटलौ च कृष्णवर्णः शनैश्चरः ।
राहुः कर्बुरवर्णश्च केतुः स्याच्चित्रवर्णकः ॥

No. 13649. गोचारादिफलम्.

GŌCĀRĀDIPHALAM.

Pages, 35. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 13578.

Incomplete.

On the nature of the good or evil caused during the different periods of planetary influence calculated with reference to the constellation against which the moon appears to be at the time of the birth of a person.

Beginning:

अथ गोचारफलं मौहूर्तिकमण्डने—

तीक्ष्णांशुर्दशषट्त्रिगः शुभकरः षट्सप्तखैकत्रिगः
चन्द्रो भूमिसुतार्कजौ शुभकरौ षड्भ्रातृभावस्थितौ ।
ज्ञो व्यष्टारिदशाब्धिगः सुरगुरुः सप्तद्विधर्माधिगः
शुक्रस्सप्तमषट्दशान्त्यनिलयः सर्वे तथोपान्त्यगाः ॥

प्रत्येकफलानि—संहितार्णवे—

स्थानं जन्मनि नाशयेत् दिनकरः कुर्यात द्वितीये भयं
दुश्चिक्ये श्रियमातनोति हिबुके मानक्षयं यच्छति ।
दैन्यं पञ्चमगः करोति रिपुहा षष्ठेऽर्थदा(दः) सप्तमे
पीडामष्टमगः करोति वपुषः कान्तिक्षयं धर्मगः ॥

End:

चतुर्ग्रहोच्चे भूपालः पञ्चोच्चे लोकनायकः ॥

मीने मेषे वृषे चैव तुलायां च स्थिते ग्रहाः ।
योगः कनकदण्डाख्यो देवानामपि दुर्लभः ॥

तस्य फलं पूर्वपक्षावुक्तम्—

त्रिभिः स्वक्षेत्रगे मन्त्री त्रिभिरुच्चैर्नराधिपः ।
त्रिभिर्नीचगतो दासास्त्रिभिरस्तजडस्तथा ॥

No. 13650. गोचारादिफलम्.
GŌCĀRĀDIPHALAM.

Pages, 22. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 13621.

Incomplete.

Similar to the above.

Beginning :

द्रव्यनष्टं गृहच्छिद्रं जलभीतिविषापहम् ।
अग्निबाधाभयं चैव जन्मस्थानगते रविः ॥
मानहानिर्मनस्तापः व्रणभीतिधनक्षयम् ।
पशुनष्टं महादैन्यं द्वितीयस्थो भवेद्रविः ॥

* * * *

उत्तमं गसवं विद्यान्मध्यमं शीर्ष(को)दयम् ।
अधमं भूगतं चैव त्रिविधं जात[स्य] लक्षणम् ॥
कृष्णपक्षे चतुर्दश्यां प्रसूतानां प्रजायते ।
करोति पुत्रषड्भागं प्रथमं तु न दोषभाक् ॥

End :

उत्तमं मित्रवर्गे स्यात् सम . . . त्तमध्यमम् ।
अधमं शत्रुमित्रत्वं वियोगस्सम स्मृतः (?) ॥
कर्तृन् समवर्गे स्यात् वैरवर्गे च मारणम् ।
उत्तमोत्तममित्युक्तं राश्योरेकाधिपे स्थिते ॥

No. 13651. गोपालरत्नाकरः, आन्ध्रटीकासहित.
GŌPĀLARATNĀKARAḤ WITH TELUGU MEANING.

Substance, palm-leaf. Size, 17⅝ × 1⅜ inches. Pages, 72. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are **Praśnamahōdadhi** with commentary 37*a*, Phalaratnamālāvyākhyā (Tamil) 47*a*, Jaimini-sūtra 69*a*.

Contains 48 stanzas only.

Same work as that described under R. No. 912 (*a*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

No. **13652.** गोपालरत्नाकरः.

GŌPĀLARATNĀKARAḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 13523.

Contains the Dvādaśabhāva which is incomplete.

Same work as the above.

Beginning:

गोपालरत्नाकरम् । द्वादशभावम् ॥

अथ तनुभावः—

गुरुर्वा यदि शुक्रो वा लग्नस्थो वा तद्दीक्षितः ।
श्लेष्मदेही भवत्येव जातको नात्र संशयः ॥
राहुर्वा रविजो वापि तथा चेद्वातदेहता ।

End:

तृतीयषष्ठलाभेषु क्रूरास्तिष्ठन्ति यस्य हि ।
महाराजो भवेत्सोऽपि जातको नात्र संशयः ॥
गुरुर्वा यस्य शुक्रो वा बुधो वा सप्तमे यदि ।
विद्यते राजयोगस्य नात्र कार्या विचारणा ॥
नवमाधिपतिश्चन्द्रः युतस्वस्यरितिष्ठति (?) ।
द्वितीये यस्य तस्य स्याल्लाभयोगो न संशयः ॥

स्वस्ताप्रविस्था (?).

No. **13653**. गृहद्वारनिर्णयादिः.

GṚHADVĀRANIRṆAYĀDIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 66*b* of the MS. described under No. 13425.

Incomplete.

Indicates the astrologically proper place and time for fixing the frontal door-way of a house by stating the good or evil arising to a

house-owner from the nature of the place or the time in which the door-way of a house is located, etc.

Beginning:

द्वारप्रतिष्ठानिर्णयः—

नवभागं गृहं कुर्यात् प्रमाणं सव्यमार्गतः ।
आदित्यो गृहनाशाय सोमे च पशुनाशनम् ॥
आरे चाग्निभयं विद्यात् बुधे च विपुलं धनम् ।
गुरुशुक्रौ शुभौ तत्र गृहद्वारं विनिर्दिशेत् ॥

* * * *

कर्किनक्रहरिकुम्भगतेऽर्के पूर्वपश्चिममुखानि गृहाणि ।
तौलिवृश्चिकमेषवृषभयाते दक्षिणोत्तरमुखानि च कुर्यात् ॥

End:

लग्ने भृगुः पुत्रगतश्च जीवे षष्ठे कुजे तीक्ष्णकरस्तृतीये ।
निवेशनीयस्य गृहस्य तां दिशं शतद्वयं तिष्ठति वत्सराणाम् ॥

* * * *

चापवत्कीटहरयः शूलवत्तौलिकन्ययोः ।
विपरीतोदितश्रृङ्गः दुर्भिक्षं कलहप्रदाः (?) ॥

No. 13654. ग्रहनिघण्टुः.

GRAHANIGHANTUH.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 2. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 2*a*. The other works herein are Nakṣatranighaṇṭu 1*a*, Rāśinighaṇṭu 2*a*, Bhāvanighaṇṭu 2*b* and 3*a*.

Complete.

A dictionary of synonymous terms for denoting the names of the different planets.

Beginning:

आदित्योऽर्को रविर्भानुर्भास्करश्च दिवाकरः ।
मार्ताण्डस्सविता हेलिस्तीक्ष्णांशुर्मिहिरो रविः ॥
चन्द्रश्शशाङ्कश्च विधुश्शशी सोमो निशाकरः ।
शीतांशुरुडुनाथश्च इन्दुश्चन्द्रमसो विधुः ॥

End:

केतुश्शिखी ध्वजो धूम्र उत्साहो बहुरूपकृत् ।
शिरोहीनो घोररूपश्चित्रवर्णस्सुकेतवः ॥

Colophon :

ग्रहनिघण्टुः [सांपतिः] सम्पूर्णः ॥

No. 13655. ग्रहनिघण्टुः.

GRAHANIGHANṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 28a of the MS. described under No. 13623.

Complete.

Same work as the above, but with slightly different readings.

Beginning :

आदित्योर्करविर्भानुर्भास्करश्च दिवाकरः ।
मार्ताण्डस्सविता हेलिस्तीक्ष्णांशुश्च दिनेशकृत् ॥
चन्द्रश्चश(श्शशि)शशाङ्कश्च विधुस्सोमो निशाकरः ॥
शीतांशुरुडुनाथश्च इन्दुश्चन्द्रश्च चन्द्रमाः ।

End :

सिं(सैं)हिकेयश्शिरःखण्डः रविशत्रुश्च राहुकः ।
सार्पाकारः केतुविलः ब्रह्मपुत्रश्च तेजनः ॥

No. 13656. ग्रहनिघण्टुः.

GRAHANIGHANṬUḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 13a of the MS. described under No. 13578.

Complete

Same work as the above, but with slight difference in the end.

End :

राहुस्तमोरगश्चैव स्वर्भानुश्च विधुन्तुदः ।
राधेयस्सैंहिकेयश्च भुजङ्गाख्यश्च ते तमः ॥
शिखी केतुर्ध्वजो धूमः . . . पुत्रोरगस्तथा ।
नामान्येतानि सर्वेषां ग्रहाणां च विधीयते ॥

No. 13657. ग्रहनिघण्टुः.

GRAHANIGHANṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 2a of the MS. described under No. 13564.

Complete.

Same work as the above.

No. 13658. ग्रहनिघण्टुः.

GRAHANIGHANṬUḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 3*b* of the MS. described under No. 13565.

Complete.

Same work as the above, but with slight difference in the end.

आधयः सैंहिकेयश्च भुजङ्गः फणिनो विधुः ।
छायाग्रहश्शिखी चैष केतुश्चोत्पाद(त)रूपधृत् ॥

No. 13659. ग्रहनिघण्टुः.

GRAHANIGHANṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 13567.

Incomplete.

Same work as the above.

No. 13660. ग्रहनिघण्टुः.

GRAHANIGHANṬUḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 22*b* of the MS. described under No. 13600.

Complete.

Same work as the above, but with different stanzas in the end.

End:

छायाग्रहोशि(हश्शिखी चै)व केतवश्चोतरूपकः ।
पर्यायतो ध्वजश्चैव अन्यनामानि योजयेत् ॥

No. 13661. ग्रहनिघण्टुः.

GRAHANIGHANṬUḤ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1$ inches. Pages, 2. Lines, 4 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 30*b*. The other works herein are Pārāśaryahōra (with Telugu meaning) 1*a*, Nāmanakṣatrādiphalanirūpaṇa (with Telugu

meaning) 26*a*, Nakṣatranighaṇṭu (with Telugu meaning) 29*a*, Rāśinighaṇṭu 30*b*, Jyautiṣaviṣaya 31*b*, Bhāvanighaṇṭu 44*a*, Lagnaghaṭikādinirūpaṇa 44*a*, Jyautiṣamu 46*b*.

Complete.

Same work as the above.

No. 13662. ग्रहनिघण्टुः.

GRAHANIGHAṆṬUḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 112*b* of the MS. described under No. 5764.

Complete.

Same work as the above, but with additional stanzas in the end.

End:

ललाटे त्रीणि ताराणि पादयोरष्ट संभवेत् ।
उडूनि पञ्च मुष्टी च . . . . . . ॥
पुटे च त्रीणि ताराणि कण्ठजोभयकारका ।
पादयोर्वदने कण्ठे हानिरेव न संशयः ।
अन्यस्थानेषु सौभाग्यं . . . वचनं यथा ॥

No. 13663. ग्रहनिघण्टुः.

GRAHANIGHAṆṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 5*b* of the MS. described under No. 13630.

Complete.

Same work as the above, but with slightly different readings.

No. 13664. ग्रहमैत्र्यादिनिर्णयः.

GRAHAMAITRYĀDINIRṆAYAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 6470.

Complete.

Enumerates what planets are friendly or inimical towards each other, also gives the signs of the zodiac which are respectively assigned to each of the planets, technically known as Svakṣētra, as well as the signs in which they exert their influence to the utmost, moderate or the least degree, respectively.

Beginning:

अथ वक्ष्ये विशेषेण ग्रहाणां मित्रनिर्णयम् ।
मित्रे भौमस्य शुक्रज्ञौ भृगोर्ज्ञोरार्किमन्त्रिणः ॥
अङ्गारकं विना सर्वे ग्रहा मित्राणि मन्त्रिणः ।
आदित्यस्य गुरुर्मित्रं शनेर्विद्गुरुभार्गवाः ॥

End:

रवेः शुक्रः कुंजस्यार्किर्गुरोरिन्दुरहिर्विदः ।
ध्वजादिव्युत्क्रमेणैव तत्तत्कालं विनिर्दिशेत् ॥

No. 13665. चन्द्रांशलग्नादियोगफलम्.
CANDRĀṀŚALAGNĀDIYŌGAPHALAM.

Pages, 13. Lines, 6 on a page.

Begins on fol. 80*a* of the MS. described under No. 13606.

Complete.

A minor treatise on horoscopy stating with a view to work out in detail the nature of the good or evil befalling to a person from the relative position of the planets as viewed from that of the Sun or the Moon, etc., at the time of a person's birth.

Beginning:

चन्द्रांशलग्ने अधियोगजातो ज्ञानी सदा सत्त्वगुणप्रधानः ।
ध्रुवांशनाडी बहुपुत्रयोगं वदन्ति केचिन्मृतपुत्रवा(न्)स्यात् ॥
पूर्वभागे प्रजातस्य जातजातमृतप्रजाः ।
उत्तरांशे ज्येष्ठपुत्रो नाशं चेन्मनुरब्रवीत् ॥

* * * *

भार्गवः—

मीनांशे मिथुने लग्ने चन्द्रे स्वोच्चांशसंस्थिते ।
त्रयोविंशे मनस्तापं क्लेशं स्यात् द्वित्रिवत्सरे ॥
ग्रन्थान्तरे पञ्चवर्षात् द्वाविंशाब्दात्परं व्यथा ।
पश्चाद्भाग्यमिति प्राहुरंशादी योगजातके ॥

End:

व्ययाधिपान्तरे काले क्रूरवेधग्रहान्तरे ।
देहालस्यं मनस्तापं कार्यविघ्नं महद्भयम् ॥

त्रयस्त्रिंशत्फलं सत्यं राजान्तरवशात् सुखम् ।
प्राधान्यायोगकालस्याब्दरांशे नात्र संशयः ॥

No. 13666. जातककर्मपद्धतिः.

JĀTAKAKARMAPADDHATIḤ.

Substance, palm-leaf. Size, 14⅝ × 1⅝ inches. Pages, 4. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new

Incomplete; contains the following two Adhyāyas:—

१. भावसाधनाध्याय. २. दृष्टिसाधनाध्याय.

Same work as that described under R. No. 374(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-B. By Śrīpatibhaṭṭa.

No. 13667. जातककर्मपद्धतिः, सव्याख्या.

JĀTAKAKARMAPADDHATIḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅞ × 1¼ inches. Pages, 120. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the eighth Adhyāya.

Same text as the above with a commentary by Sūryadēva which commentary is the same as that described under R. No. 1087 of the Triennial Catalogue of MSS., Vol. II, Part I-A, wherein see for the beginning.

End:

Gives the synonymous names of the 28 constellations including Abhijit.

Beginning :

भवत्यश्विनी(नि)नक्षत्रमश्वी दस्रस्तुरङ्गमः ।
आशुस्तुरङ्गस्तुरगः अश्वो वाजी हयो हरिः ॥

End :

उत्तराभाद्रकश्चैव अहिर्बुध्न्यनिशामुखम् ।
रेवती पौष्ण इत्याहुरन्तिः पूषा तथैव च ॥

Colophon :

नक्षत्रनिघण्टुः सम्पूर्णः ॥

No. 13798. नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 4*b* of the MS. described under No. 13567.
Complete.
Same work as the above, but with a slightly different reading.

Beginning :

अश्विनी चाश्विभं चैव वाजिन्द्रस्म तुरङ्गमः ।
आद्यं तुरङ्गं तुरगं हयमश्वश्च कीर्तितः ॥

End :

अहिर्बुध्न्योत्तराभाद्रा पूषा रेवत्य . . ञ्छभम् ।
प्रत्येकं पूषणं चैव क्रमादेताः प्रकीर्तिताः ॥

No. 13799. नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under No. 13556.
Complete.
Same work as the above.

No. 13800. नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 13578.
Complete.
Same work as the above.

No. 13801. नक्षत्रनिघण्टुः.

NAKṢATRANIGHAṆṬUḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 6*a* of the MS. described under No. 13612

Complete.
Same work as the above.

No 13802. नक्षत्रनिघण्टुः.
NAKṢATRANIGHAṆṬUḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 2*b* of the MS. described under No. 13565.
Complete.
Same work as the above.

No. 13803. नक्षत्रनिघण्टुः.
NAKṢATRANIGHAṆṬUḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 56*a* of the MS. described under No. 13534.
Complete.
Same work as the above.

No. 13804. नक्षत्रनिघण्टुः, आन्ध्रटीकासहितः.
NAKṢATRANIGHAṆṬUḤ WITH TELUGU MEANING

Pages, 4. Lines, 4 on a page.

Begins on fol. 29*a* of the MS. described under No. 13661.
Complete.
Same work as the above, but with Telugu meaning.

No. 13805. नक्षत्रनिघण्टुः.
NAKṢATRANIGHAṆṬUḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 59*b* of the MS. described under No. 2824.
Complete.
Same work as the above.

No. 13806. नक्षत्रनिघण्टुः.
NAKṢATRANIGHAṆṬUḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 73*a* of the MS. described under No. 13545.
Incomplete.
Same work as the above.

No. **13807.** नक्षत्रनिघण्टुः.

NAKṢATRANIGHANṬUḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13563.

Complete.

Same work as the above.

No. **13808.** नक्षत्रनिघण्टुः.

NAKṢATRANIGHANṬUḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 74*a* of the MS. described under No. 1512.

Incomplete.

Same work as the above, but with additional stanzas in the beginning and in the end.

Beginning:

अथात्र तारकादीनां निघण्टुर्वक्ष्यते मया ।
भवत्यश्विनिनक्षत्रमश्वी दस्रस्तुरङ्गमः ॥
आद्यं तुरङ्गं तुरगमश्वी वाजी हयो हरिः ।
भरणी स्याद्यमं याम्यमन्तकं मृतिभं तथा ॥

End:

यमाली कुम्भलेयस्त्री जूकश्शीर्षोदयास्स्मृताः ।
शेषाः पृष्ठोदयाः ज्ञेया मीनस्स्यादुभयोदयः ॥

No. **13809.** नक्षत्रनिघण्टुः.

NAKṢATRANIGHANṬUḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13564.

Complete.

Same work as the above.

No. **13810.** नरसिंहजातकम्.

NARASIṀHAJĀTAKAM.

Substance, palm-leaf. Size, 9 × 1⅜ inches. Pages, 4. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 77*a*. The other work herein is Padmarājajātaka 1*a*.

Complete.

This gives the nativity of one Avasarāla Narasiṁha, born in 1707 Śaka.

Beginning :

जननी जन्मसौख्यानां वर्धनी कुलसम्पदाम् ।
पदवी पूर्वपुण्यानां लिख्यते जन्मपत्रिका ॥

स्वस्तिश्रीशुभजातकाभ्युदय शालीवाहनशकाब्दाः १६०६ एतत्सङ्ख्या-प्रवर्तमानविश्वावसुनामसंवत्सरे उत्तरायणे ग्रीष्मर्तौ ज्येष्ठमासे कृष्णपक्षे चतुर्थ्यां भानुवासरे चाङ्गघटिकादिघटिका लिख्यन्ते — ४. आ २०१०. धनिष्ठ ५७. ३४. विष्कम्भम् ६. ९७. प्रीति ९३१२. बालव. २०१. रा वि. २२१५३. वम्. ३२. ४०. मिथुनलग्नरविभुक्ति ३१०.

* * * *

श्रीमतस्समस्तसुगुणाकरस्य भारद्वाजगोत्रोद्भवस्य अवसरालवंशाब्धि-परिपूर्णसुधाकरस्य पद्मराजनामधेयस्य धर्मपत्नी उभयकुलसत्कीर्तिसंदायिरवणम्म-नाम्नी पुत्ररत्नमसूत ।

End :

अस्य नृसिंहनाम. अस्य जननकाले राहुमहादशाशेषं वर्षे. १४. मा. १०. दिन ७. घटि २२. ततो गुरुदशा ततः शनिदशा ।

No. 13811. नवग्रहचक्रादिः.

NAVAGRAHACAKRĀDIḤ.

Pages, 114. Lines, 7 on a page.

Begins on fol. 81*a* of the MS. described under No. 13791.

Gives the diagrams in relation to the nine planets and the manner of predicting the fortunes by a reference to the numbers in them and the time of the birth of persons.

Beginning :

रविजातकचक्रम्—

यस्मिन्नृक्षे स्थिते भानुस्तदादौ त्रीणि मस्तके ।
तारकाणि मुखे त्रीणि एकैकं स्कन्धयोरपि ॥
एकैकं बाहुयुग्मं तु एकैकं हस्तयोर्द्वयोः ।
हृदयं पञ्च ऋक्षाणि एकं नाभौ विनिर्दिशेत् ॥

* * * *

चन्द्रचक्रम्.

3	1	2	4	5	6	7	8	9
7	8	9	3	1	2	4	5	6
4	5	6	7	8	9	3	1	2
1	2	3	5	6	4	8	9	7
8	9	7	1	2	3	5	6	4
5	6	4	8	9	7	1	2	3
2	3	1	6	4	5	9	7	8
9	7	8	2	3	1	6	4	5
6	4	5	9	7	8	2	3	1

End:

जयसन्धे मृतिं दद्युः तुलासिंहजयोस्तथा ।
मृतिसन्धिजयप्राप्तिर्नृयुग्मं भजयोः क्रमात् ॥
मकरस्य भवन्त्येते जेतृत्वमिति सन्धिदाः ।

No. 13812. नवग्रहस्थितिफलम्.

NAVAGRAHASTHITIPHALAM.

Pages, 11. Lines, 5 on a page.

Begins on fol. 2*a* of the MS. described under No. 13792.

Incomplete

Gives the good or evil that may befall to the various countries from the conjunction of the planets.

Beginning:

भौमादिग्रहयोर्योगो विग्रहं कुरुते नृणाम् ।
त्रयाणां समरं घोरं समानजननाशनम् ॥

चतुर्णामवनीशानां मरणं भ्रमणं तथा ।
पञ्चग्रहाणां संयोगे दुर्भिक्षं नृपनाशकम् ॥
षण्णां ग्रहाणां संयोगे जगतः प्रलयो ध्रुवम् ।
सप्तग्रहं हन्ति लोकान् मर्त्यं . . . . तः ॥

End:

दिनत्रयं बाह्लिदेशे(क)अङ्गदेशे दिनद्वयं बर्बरसिन्धुदेशे ।
दिनं च एकं च कलिङ्गदेशे तत्कालवर्जमितरे वदन्ति ॥

No. 13813. नाडीग्रन्थः.

NĀḌĪGRANTHAḤ.

Substance, (Śrītāla) palm-leaf. Size, 19¾ × 2⅛ inches. Pages, 480. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Wants the beginning and the end.

Gives the characteristics and fortunes of persons born under certain astrological conditions in a cycle of 60 years.

Beginning:

सिंहलग्ने प्रभावांशे लग्नेशे लाभराशिगे ।
लग्नजेन्दुगते जीवे विद्युत्प्रभांशसंयुते ॥
प्राधान्यं राजमौलिश्चेत् पश्चिमे देशसौख्यतः ।
समुद्रतीरे सौख्यं च . . . . पूर्वसौख्यतः ॥

* * * *

दश पुत्रा जनिष्यन्ति सप्तपुत्रा सुखीभवेत् ॥
पितृसुखसौख्यं च त्रिकन्या सुखजीविनी ।
केरले चन्द्रनाडीनां पटुत्वाद्भक्तिमुच्च . . ॥
दूषणं च महापापं त्रिमासेऽप्यतिबाधनम् ।
तच्छान्तिरत्नदानं च ग्रहशान्तिपरं शृणु ॥
आधानलग्नमाश्रित्य प्रत्यक्षं शशिकेरले ।
द्वितीयश्लोके लिखितं फलमन्यद्विचार्यताम् ॥

End:

लाभस्थानं गते केतौ विराटांशेन संयुते ।
मोक्षे तु केतुना चैव आत्मपूजापरो नरः ।
व्ययस्थानं गते सूर्ये कमलांशेन संयुते ॥

* * * *

Contains the following years :—

वर्ष . . . पत्राणि.

प्रभव—5*b*, 25*b*, 39*a*, 40*a* and 41*a*.

विभव—160*b* and 227*b*.

शुक्ल—4*b*, 28*a*, 66*b* and 98*a*.

प्रमोदूत—14*b*, 15*b*, 30*b*, 38*b* and 39*b*.

प्रजोत्पत्ति—6*b*, 37*b* and 48*b* to 50*b*.

आङ्गिरस—35*a*, 36*b*, 42*b*, 43*b*, 44*b*, 45*b*, 46*b*, 47*b* and 219.

श्रीमुख—33*b*, 34*b* and 237*b*.

भव—2*b* and 32*b*.

युव—31*b* and 35*b*.

धातृ—27*a*, 28*b*, 29*b* and 97*a*.

ईश्वर—

बहुधान्य—26*b*.

प्रमाथी—233*a*.

विक्रम—58*a* and 239.

विषु—72*b*, 157*b*, 164*b* and 166 to 173*b*.

चित्रभानु—24*a*, 161*b* and 227.

स्वभानु—

तारण—8*b* and 217.

पार्थिव—59*b* and 182.

व्यय—1*a*, 212*a*, 218 and 222.

सर्वजित्—13*b*.

सर्वधारि—

विरोधि—69.

विकृति—

खर—99*b* to 100*b* and 197*b*.

नन्दन—63*b*, 95 to 98*b* and 179

विजय—91*b* to 94*a*.

जय—83*b* to 90*b*.

मन्मथ—79*b* and 80*b*.

दुर्मुखि—

हेविलम्बि—78*b*.

विलम्बि—75*b* and 77*b*.

विकारि—10*b*, 21*b* and 73 to 75*b*.

शार्वरि—17*b*, 18*b*, 20*b*, 62*a* and 135.

प्लव—16*b*.

शुभकृत्—9*b*.

शोभकृत्—229*b* to 230*b*.

क्रोधि—61*b*, 223*b*, 224*a* to 226*b* and 228*b*.

विश्वावसु—64*b*, 80*a*, 213*b* and 223*b*.

पराभव—23*b*.

प्लवङ्ग—24*b*, 47*a*, 52*b*, 91, 113*a* to 115*b*, 174*a* and 189.

कीलक—116 to 119*b*.

सौम्य—170*a* to 123*b* and 124.

साधारण—4[illegible]*a*, 60*b*, 65*a*, 71*a*, 125*a* to 127*b*, 131 to 132, 235*b* and 238*b*.

विरोधिकृत्—128 to 130*b*, 133 and 214*b*.

परीधावी—19b, 101b, 112b, 140a to 144b and 195b.
प्रमाथीच—145 to 148b.
आनन्द—20a, 74a, 149 to 157a, 158 to 160a, 161a, 176 and 223.
राक्षस—12b, 78a, 162a to 164a, 165b, 166b, 174 to 178b. 224 and 236b.
नल—68a, 180 to 181b, 183 to 186, 188 and 190a to 191.
पिङ्गल—67b, 195a and 196a to 200b.
कालयुक्ति—7b, 201a to 209b.
सिद्धार्थि—134a, 210 and 211.
रौद्री—
दुर्मति—137a.
दुन्दुभि—11b, 70b, 136b and 139.
रुधिरोद्गारि—52a, 111b, 187 and 217b.
रक्ताक्षि—101a.
क्रोधन—51b 53b, 54a, 55a, 64a, 109b, 112a, 187b, 2.2a, 234a and 240a.
अक्षय--56b

No. 13814. नामनक्षत्रमासनिर्णयः.
NĀMANAKṢATRAMĀSANIRṆAYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 12a of the MS. described under No. 13578.
Complete.
Similar to the work described under No. 13796.

Beginning:

चू चे चो ला—अश्विनी। ली लू ले लो—भरणी। आ ई ऊ ए—कृत्तिका। ओ वा वि वो—रोहिणी।

End:

दे दो चा ची—रेवती।

वाक्पद्मा [च]श्रीश्च सावित्री भूः कल्याणी च सत्यभाक्।
पुण्यावती रूपवती अंशुमाली च पद्मिनी।
लक्ष्मीश्च मासनामानि स्त्रीणां चैव यथाक्रमम्॥

No. 13815. नामनक्षत्रादिनिरूपणम्.
NĀMANAKṢATRĀDINIRŪPAṆAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 1a of the MS. described under No. 13565.
Incomplete.

The first portion is similar to the work described under R. No. 1272(*c*) of the Triennial Catalogue of MSS., Vol. II, Part 1-A.

Beginning :

चू चे चो ला अश्विनी । ली लू ले लो भरणी । वो वा वी वु रोहिणी ॥ वे वो का कि मृगशिर ।

* * * *

तारफलम्—

जन्मनक्षत्रमारभ्य नित्यनक्षत्र गण्यते ।
नव . . हवेर्भागं ताराफलमिदं स्मृतम् ॥

* * * *

तारावाहनम्—

मयूरं च मनस्तापं . . . मर्थं च लाभतः ।
मेषे च कलहं चैव लक्ष्मीप्राप्तिगजस्तथा ॥

* * * *

ग्रन्थान्तरे—

आदिगतौ फलदौ रविभौमौ मध्यगतौ फलदौ गुरुशुक्रौ ।
अन्त्यगतौ फलदौ शनिराहू सर्वगतौ फलदौ बुधचन्द्रौ ॥

End :

सिंहवृश्चिकपश्चार्धे पश्चपादौ तुलाङ्गना ॥
. . . चतुर्थदशमं सप्तकेन्द्रश्च संज्ञकम् ।
त्रिकोणमिति विज्ञेयं पश्चमं नवमं तथा ॥

No. **13816.** नामनक्षत्रादिफलनिरूपणम्.

NĀMANAKṢATRĀDIPHALANIRŪPAṆAM.

Pages, 7. Lines, 4 on a page.

Begins on fol. 26*a* of the MS. described under No. 13661.

Complete.

Similar to the above.

Beginning :

चू चे चो ला—अश्विनी । ली लू ले लो—भरणी ।

* * * *

दे दो चा ची—रेवती । अश्विनि भरणि कृत्तिका पादं मेषम् । कृत्तिकात्रयः पादारोहिणिमृगशिरार्धं वृषभम् ।

End:

सौम्यस्वातीत्वष्टृहस्तार्द्रमूला पूर्वाषाढास्सप्त ऋक्षाण्यसंङ्कुचाः ।
(?) यल्लनामाग्निऋक्षं च यज्ञानामैन्द्रऋक्षकम् ।
(?) यद्रनामूलऋक्षं च इति नक्षत्रसंज्ञिता ॥

No. 13817. निमित्तकाण्डम्.

NIMITTAKĀṆḌAM.

Substance, paper. Size, $8\frac{3}{4} \times 5\frac{5}{8}$ inches. Pages, 69. Lines, 6 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 90*a*. The other works herein are Madhvamatakaṇṭakōddhāra 1*a*, Atharvaṇōpaniṣadbhāṣyavivaraṇa 28*a*.

Complete in four Adhyāyas.

Gives the principles of predictions and prognostication in relation to the fortunes of persons as well as to special events, etc. The work is said to have been taught by Bṛhaspati to Indra.

Beginning:

विष्णोः पदं वह्नियुतं मौलिखण्डेन्द्र(न्दु)भूषणम् ।
अशेषजगतो बीजं लक्ष्मीबीजमुपास्महे ॥
जगदाप्यायनकरं सोमं शीतांशुमण्डलम् ।
सुधाकश्लोकसंभूतं नमस्तेऽस्तु शुभावहम् ॥

* * * *

त्रैलोक्यपालनरतमिन्द्रो वह्निमुखोद्गतम् ।
बृहस्पतिं समागम्य प्रणिपत्येदमब्रवीत् ॥

इन्द्र उवाच—

नमस्ते देववन्द्याय सर्वज्ञाय महात्मने ।
सर्वलोकहितार्थाय निमित्तं सत्यभाषितम् ॥

बृहस्पतिरुवाच—

शृणु वक्ष्यामि देवेन्द्र यथार्थद्योतकं परम् ।
निमित्तकाण्डसंज्ञन्तु गुह्याद्गुह्यतरं परम् ॥
कालनक्षत्रराश्यादिविधिना लघु निर्मितम् ।
विशुद्धे विजने देशे निम्नोन्नतविवर्जिते ॥
गोमयेनाम्भसालिप्य वृत्ताकारं सुमण्डलम् ॥

* * * *

पुण्यार्को विजयं प्रयङ्गसफलं श्रीरुद्रनाशप्रदो
गायत्री धनदा चलाङ्गलशुभं गौरीयमर्थे स्थितिः ।
पुत्राङ्गन्तु महद्भयं कलिरुषा बन्धप्रदं सर्वदा
रोगापामरणं महोदयभवं सूर्यादिकानां फलम् ॥

Colophon :

इति बार्हस्पत्ये निमित्तकाण्डे प्रथमोऽध्यायः ॥

सूर्यस्य सिंहः क्षेत्रं स्यान्मित्रं तस्य बृहस्पतिः ।
राहुकेतुसिताः प्रोक्ताः शत्रवो मध्यमाः परे ॥
उच्चस्थानं तु मेषं स्यान्नीचस्थानं तु सप्तमम् ।
शुभाः स्वमित्रकोच्चस्थास्सर्वसिद्धिस्सदा भवेत् ॥

End :

वीथ्यां स यदि दृष्टस्स्यात् फलं भवति तत्क्षणात् ।
स्थाणुहीनं तु चक्रं स्यात् सर्वकार्यं शनैः फलम् ॥
कोणहीनं तु चक्रं स्यात् बहुयत्नं विशेषतः ।
नेम्यादिहीनचक्रं स्यात् सौख्यमेव विनश्यात ॥
चक्रं शरीरं नेमिस्स्यात् प्राणस्स्थाणुः स्थिरो भवेत् ।
वीथी पादौ करौ पार्श्वौ कोणौ नेत्रद्वयं क्रमात् ॥

Colophon :

इति बार्हस्पत्ये निमित्तकाण्डे चतुर्थोऽध्यायः ॥

No. 13818. निमित्तकाण्डम्.

NIMITTAKĀṆḌAM.

Substance, palm-leaf. Size, 13½ × 1¼ inches. Pages, 20. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

No. 13819. नृसिंहभारतीजातकम्.

NṚSIMHABHĀRATĪJĀTAKAM.

Substance, (Śrītālā) palm-leaf. Size, 9¾ × 1⅞ inches. Pages, 41. Lines, 10 on a page. Character, Kanarese. Condition, good. Appearance, old.

Complete.

The horoscope of one Narasiṁhabhāratīsvāmin (probably of the Śṛṅgēri Mutt), with an explanation in Kanarese. He is said to have been born in 1601 Śaka.

Beginning :

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥
मुग्धे किन्न चिकित्स्यते हृदयगं ग्रन्थिद्वयं वेदना
सास्मानैव उरःसमस्तमधुना व्याप्नोति सा स्यात्तदा ।
शाधि स्वेदनमे(व)दुश्चरमहो स्वेनाहमुन्मर्दनं
शर्वे मृद्वीति सोत्तरां प्रकलयन् राधां हरिः पातु वः ॥
ब्रह्मा हरिश्शैलसुतापतिश्च ग्रहर्क्षराशिस्सुरनायकश्च ।
गणेश्वरो यस्य च पत्रिकेयं भवन्तु सर्वे शुभदास्सदैव ॥
अर्थार्जने सहायः पुरुषाणामर्णवे पोतः ।
यत्र समयमन्त्री(?) जातकमपहाय नास्त्यपरः ॥
यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥
ये धर्मकर्मनिरता विजितेन्द्रिया ये
ये पक्वभोजनरता द्विजदेवभक्ताः ।
ये मानवा दधति ये कुलशीलयुक्ताः
तेषामिदं कथितमायुरुदारधीभिः ॥
जननी जन्मसौख्यानां वर्धनी कुलसम्पदाम् ।
पदवी पूर्वपुण्यानां लिख्यते जन्मपत्रिका ॥
स्वस्तिश्रीविजयाभ्युदयशालिवाहनशकाब्दाः १६०१
तदुपरि वर्तमानरक्ताक्षिसंवत्सरे दक्षिणायने अधिकश्रावणमासे शुक्लपक्षे १० म्यां स्थिरवासरे कन्यालग्ने श्रीमन्निस्तुलास्तोकप्रशस्तगुणरत्नरत्नाकराणां . .

* * * *

नञ्जुण्डेश्वरचरणारविन्दद्विवामकरन्दनन्ददिन्दिन्दि [व]रायमाणमानसानां . .

* * * *

शङ्करगोत्रोद्भवानां नरसिंहभारतिप्रभुशेखराणां जन्मकालं सकलयन्त्रानालोच्य जन्मलग्नपत्रिका लिख्यते ।

End :

अत्यर्थमर्थागमनान्नपानं सौख्यानि शुभ्राम्बरगौरतुङ्गात् ।

* * * *

पौत्रसम्भावना यत्र वर्गप्राबल्यात्तु सन्तोषप्राप्तिः ।

No. 13820. पद्मराजजातकम्.
PADMARĀJAJĀTAKAM.

Pages, 152. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13810.

Wants the beginning and the end.

Gives the nativity of the father of the person whose horoscope has been described under No. 13810.

Beginning :

द्युगणसञ्जनितमध्यग्रहाः र. ०. ११, ४९. ९०. च. ११. ८,१२०, १२१. कु. ११. १२. १२. ९२: बु. २. २७. ५७. गु. ७. ०. ७. १. शु. २, २०. १६. ४७.

* * * *

ग्रहेभ्य आनीताः नक्षत्रचरणप्रवेशा लिख्यन्ते—

भरणी २. रविः. उत्तराभाद्रा १. चन्द्रः रेवती. ४. कुजः कृत्तिका १. बुधः.

* * * *

एवंविधशुभषड्वर्गबलयुक्तवेलायां श्रीमतः समस्तसद्गुणाकरस्य हरिहरद्विजगुरुभक्तिपरायणस्याश्रितजनकल्पवृक्षस्य हंसरालवंशपयःपारावारसुधाकरस्य भारद्वाजगोत्राम्बु(ज)समूहसहस्रकिरणस्य नर्सय्यनामधेयस्य धर्मपत्नी उभयकुलसत्कीर्तिसन्दायिनी नाम्नी अनवरतभूसुराशीर्वादसम्पन्नं . . . .

* * * *

पद्मराजनामानं पुत्ररत्नं प्रासूत।

* * * *

प्रमादिसंवत्सरफलम्—

नित्यं प्रमादशीलश्च हीनाचाररतस्सदा ।
बन्धुद्वेषी परद्वेष्यः प्रमादीवत्सरोद्भवः ॥

End:

बुधान्तर्दशायां शनिविदशाप्रवेशः तन्मानम् - मा. १. दिन. २६. घटी ३० किंफलम् अस्यामतीव शुभफलं भवति भगणादि रविः ४०. ११. १८. सिद्धार्थिसंवत्सरमीनरवेरष्टादशदिनोपरि शुक्रमहादशाप्रवेशः. तन्मानं वर्षं २०. किंफलम् ।

No. 13821. पाराशर्यम् (उत्तरभागम्).
PĀRĀŚARYAM (UTTARABHĀGAM.)

Pages, 12. Lines, 8 on a page.

Begins on fol. 17*a* of the MS. described under No. 11335.

Complete.

A treatise in horoscopy which is said to have been taught by Śaṅkara to Dēvī.

Beginning:

देवदेव महेशान सर्वदेवनमस्कृत ।
भोः त्र्यम्बक नमस्तेऽस्तु वद मे ज्यौतिषं परम् ॥
ज्योतिश्शास्त्रप्रणीतारो मुनयः काश्यपादयः ।
तेषां ग्रन्थे तु सर्वेषां निश्चयो न कदा चन ॥
विशिष्य कलिकाले तु सर्वज्ञानविवर्जिताः ।
फलं रूपं ज्ञानसिद्धेः सङ्क्षेपेण वद प्रभो ॥

शङ्कर उवाच—
श्रृणु देवि प्रवक्ष्यामि रहस्यं भुवनेश्वरि ।
दैवज्ञशास्त्रसारेषु आयुर्ज्ञानमतः परम् ॥
ऐश्वर्यं पुत्रलाभं च भावानां च फलाफलम् ।
सङ्क्षेपेण प्रवक्ष्यामि सावधानमनाः श्रृणु ॥

* * * *

प्रथमं लग्नभावं च द्वितीयं धनमेव च ।
तृतीयं भ्रातृभावं च चतुर्थं मातरं विदुः ॥

* * * *

अथ ग्रहभावसाधनम्—
ग्रहस्फुटं तु संस्थाप्य तस्मिन् भावस्फुटं त्यजेत् ।
आनन्तरीये भावेशगतभावादिकं स्फुटम् ॥
एवं ग्रहाणां सर्वेषां भावसाधनमीरितम् ।
ग्रहभावस्फुटस्याद्य प्रयोजनमिहोच्यते ॥

End:

जन्मकालिकलग्नांशाादिन्दुः केन्द्रगतो यदि ।
जातस्य विनयं वित्तं ज्ञानबुद्धिश्च वर्धते ॥
हीनं फणपरस्थश्चेत् मध्यान्येतानि तस्य वै ।
आपो(?)मगतश्चन्द्रस्सर्वमप्यधमं भवेत् ॥

Colophon:

उत्तरपाराशर्यं संपूर्णम् ॥

* * * *

जन्मदिनं पुरुषग्रहाणां वारश्चेत पुरुषादिप्रकारेण स्त्रीग्रहाणां वारश्चेत् स्त्र्यादिप्रकारेण गण्यते । स्त्रीपुरुषसंज्ञया लग्नमपि गणनं दृढीकरणं कारयेत् ।

No. 13822. पाराशर्यम्, उत्तरभागम्.
PĀRĀŚARYAM, UTTARABHĀGAM.

Substance, paper. Size, $8\frac{1}{4} \times 7$ inches. Pages, 19. Lines, 21 on a page. **Character, Telugu.** Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Grahabhāṣya (Praśna-viṣaya) 10*b*.

Incomplete.

Similar to the above.

Beginning :

देवदेव महेशान विधिकेशवपूजित ।
त्रियम्बक नमस्तेऽस्तु मम संशयनाशन ।

*　　*　　*　　*

तेषां मध्ये पञ्चभिर्वा दुःखदायीति कथ्यते ।
चत्वारो राशयो भद्राः केन्द्रकोणाः शुभावहाः ॥
तेषां संयोगमात्रेण अशुभोऽपि शुभावहः ।
केन्द्राश्चतस्रो विख्यता ऋषिभिः परिकीर्तिताः ॥

*　　*　　*　　*

भावयोगाश्च कथिता मया देवि सुनिश्चितम् ।
इतः परं पृच्छसे कं तद्वदस्व शुभानने ॥

देव्युवाच—

नमस्ते देवदेवेश सर्वलोकशरण्यद ॥
एतेषां भावयोगानां का दशाफलदास्स्मृताः ।
तद्वदस्व दशाः स्वामिन् मम शङ्कानिवृत्तये ॥
स्वात्यभावफलं वापि सम्बन्धात् प्राप्तमेव च ।
दशानाथादिशे ? यैस्स्वाधिकारप्रभावतः ॥

Colophon :

कालचक्रं सम्पूर्णम् ॥

*　　*　　*　　*

अथ देहजीवराशिज्ञानलक्षणम्—

सव्येषु प्रथमं देहमन्त्यं जीवमिहोच्यते ।
अपसव्ये त्वन्त्यमाद्यं देहजीवौ यथाक्रमात् ॥

End :

मीनान्तं वृश्चिकं याते उदक् गच्छति सङ्कटम् ॥
चारान्मेषभयं यात्रा व्याधिर्बन्धोर्मृतिर्भवेत् ।

तत्र संपद्दिवाहादिपशुवस्त्रान्नभूषणम् ।
शुभारूढेन संप्रीतिः सर्वसम्पत्करं नृणाम् ॥

No. 13823. पाराशर्यम्, उत्तरभागम्—सव्याख्यानम्.
PĀRĀŚARYAM, UTTARABHĀGAM WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 230. Lines, 7 on a page. Character, Telugu and Grantha. Condition, good. Appearance, old.

Breaks off in the 17th Adhyāya. The headings of the Adhyāyas are—

१. अष्टकवर्गानयनप्रकार.
२. भावदृष्टिबलचेष्टानयन.
३. इष्टकादिग्रहभावफलाद्युपकरणाध्याय.
४ and ५. रश्मिवशाद्भावशुभाशुभफलानयन.
६. अब्दचर्याकथनम्.
७. मासदिनचर्याकथन.
८. भङ्गस्य भङ्गकथन.
९. लोकयात्राकथन.
१०-१२. आयुर्दायविषयभेद.
१३. भाग्यशेषकथन.
१४. Nil.
१५. अब्दचर्याशेषकथन.
१६. मासचर्याशेषकथन.

The text in this MS. is different from that of the work described under the previous two numbers. It is introduced here in a conversation between Parāśara and Maitrēya and consists of not less than 17 Adhyāyas, the topics dealt with being given above. The commentator is Vēṅkaṭanārāyaṇa, son of Rāmacandra of Bhāradvājagōtra.

Beginning:

सर्गस्थेमोपसंहारकारणं करुणानिधिम् ।
वृषाकपायीरमणमभीष्टप्राप्तये स्तुमः ॥

अथ तत्र भगवन्तं पराशरं विस्तरेण पूर्वभागमुपदिष्टवन्तमपि तावन्मात्रेण कलौ फलादेशस्याशक्यत्वात् तदादेशक्षमं प्रकारान्तरं जिज्ञासुर्मैत्रेयः पुनः पृच्छति—श्रीमैत्रेयः ।

भगवन् सर्वमाख्यातं जातकं विस्तरेण मे ।
सप्तसहस्रायुतग्रन्थैरशीत्यध्यायसंयुतैः ॥

सङ्करात्तु फलानाश्च ग्रहाणां गतिसङ्करात् ।
नाद्येय(द्)मीदृगस्येयमि(दि)ति वक्तुं फ(क्रम)लं नराः ॥
कलौ युगे ततोऽल्पैव बुद्धिः पापोत्तरा नराः ।
अतो न चास्य प्रचयगमनं न प्रयोजनम् ॥
नरास्त्रेतायुगे केचित् द्वापरे च कृते युगे ।
कुशाग्रमतयस्सर्वे पुण्यभाजश्चिरायुषः ॥
अतोऽल्पबुद्धिगम्यं यत् शास्त्रमेतद्वदस्व मे ।
लोकयात्रापरिज्ञानमायुषां ज्ञानमेव च ॥

अशीत्यध्यायसंयुतैः अशीतिसङ्ख्याकाध्यायपरिच्छिन्नैः । फलानां शुभाशुभफलानाम् । सङ्करान्मिश्रभावात् यस्मिन् काले एकेन ।

* * * *

अतोऽस्मिन् कलौ अल्पबुद्धिगम्यं मन्दधीवेद्यं यच्छास्त्रं लोकयात्रायामैहिकामुष्मिकफलरूपाया(पप्रयो)जनसिद्धेः ज्ञापकमायुषां दीर्घमध्याल्पानां ज्ञापकमेतच्छास्त्रं मे वदस्व । द्विविधमेव हि जातकशास्त्रं लोकयात्रापरिज्ञानम् आयुषज्ञानञ्चेति ।

अथोचितप्रश्नश्लाघनपूर्वकं पराशरश्शास्त्रे तादृशमुपक्रमते ।

साधु पृष्टं त्वया ब्रह्मन् वदामि तव सुव्रत ।
लोकयात्रापरिज्ञानमायुषां निर्णयं तथा ॥
सङ्करस्याविरोधश्च शास्त्रस्यापि च सिद्धये ।
प्रयोजनस्य लोकानामुपकाराय तच्छृणु ॥

* * * *

अष्टकवर्गानयनं नाम प्रथमोऽध्यायः ॥

End :

Colophon :

इति श्रीमद्भारद्वाजाम्भोधिपारिजातस्य श्रीरामचन्द्रबुधवर्यस्य तनूजेन श्रीवेङ्कटनारायणेन विरचिते पाराशर्योत्तरभागव्याख्याने मासचर्याशेषकथनं नाम षोडशोऽध्यायः ॥

एवं षोडशभिरध्यायैस्समा(मास)चर्यान्तेषु पदार्थेषु निरवशेषमुक्तेष्वपि अष्टकवर्गविषये कश्चिद्विशेषो वक्तव्योऽवशिष्यत इति तदर्थं सप्तदशोऽध्याय आरभ्यते । तं विशेषं पञ्चभिराह—

अर्केन्दुगुरवश्चक्रक्रमादन्ये बलक्रमात् ।
भवन्ति स्थानदाः खेटाश्चत्वारश्चैकदा यदि ॥

* * * *

यदि द्वौ वा त्रयो वा पापास्सौम्या वा स्थानदाः करणदा वा भवेयुः तदापि धनादेर्नाश एवैतेषु ग्रहेषु उच्चादिस्थानस्थितेषु यत्र मृतिप्रसक्तिः तत्र च मृतिः.

No. 13824. पाराशर्यम्, उत्तरभागम्—सव्याख्यानम्.
PĀRĀŚARYAM, UTTARABHĀGAM WITH COMMENTARY.

Substance, palm-leaf. Size, 21½ × 1½ inches. Pages, 116. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 12th Adhyāya.

Same work as the above, but with a slight difference in the arrangement of the topics under the Adhyāyas as noted below :—

१. अष्टकवर्गानयनप्रकार.
२. भावदृष्टिफलचेष्टानयन.
३. इष्टकादिग्रहभावफलाद्युपकरणानयन.
४. रश्मिविधानग्रहभावफलानयन.
५. रश्मिवशाद्भावशुभाशुभफलानयन.
६. अब्दचर्याकथन.
७. दिनचर्याकथन.
८. भङ्गस्य भङ्गकथन.
९. लोकयात्राकथन.
१०. आयुर्दायभेदकथन.
११. दायादौ वृद्धिहरणान्तर्दायकथन.

No. 13825. पाराशर्यम्, उत्तरभागम्—सव्याख्यानम्.
PĀRĀŚARYAM, UTTARABHĀGAM WITH COMMENTARY.

Pages, 40. Lines, 9 on a page.

Begins on fol. 13*a* of the MS. described under No. 13074.

Breaks off in the 2nd Adhyāya.

Same work as the above.

No. 13826. फलदीपिका.
PHALADĪPIKĀ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 159. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the following Adhyāyas :—

१. राशिस्थानादिनिरूपणम्.	१४. रोगभावनिरूपणम्.
२. ग्रहस्थितिफलनिरूपणम्.	१५. भावचिन्तानिरूपणम्.
३. त्रिवर्गविभागनिरूपणम्.	१६. द्वादशभावफलनिरूपणम्.
४. ग्रहबलाबलनिरूपणम्.	१७. निर्याणग्रहस्थितिनिरूपणम्.
५. do.	१८. द्विग्रहफलाध्यायनिरूपणम्.
६. योगाध्यायनिरूपणम्.	१९. महादशाफलनिरूपणम्.
७. राजयोगाध्यायनिरूपणम्.	२०. भावेश्वरदशानिरूपणम्.
८. ग्रहभावनिरूपणम्.	२१. अपहारविभागनिरूपणम्.
९. do	२२. कालचक्रादिदशानिरूपणम्.
१०. कलत्रभावनिरूपणम्.	२३. अष्टकवर्गप्रस्तारनिरूपणम्.
११. स्त्रीजातकनिरूपणम्.	२४. अष्टकवर्गफलनिरूपणम्
१२. पुत्रभावनिरूपणम्.	२५. गुलिकादिफलनिरूपणम्.
१३. बालारिष्टभावनिरूपणम्.	२६. गोचारफलादिनिरूपणम्.

An astrological treatise dealing with the topics mentioned above in relation to a person by reference to the time of his birth. By Mantrēśvara who states that he has summarized in it the works of Parāśara and other astrological authors.

Beginning :

सन्दर्शनं वितनुते पितृदेवनॄणां मासाब्दवासरदलैरध ऊर्ध्वगं यत् ।
सव्यं कचित्कचिदुपैत्यपसव्यमेकं ज्योतिः परं दिशतु वस्त्वमितां श्रियं नः ॥

वाग्देवीं कुलदेवतां मम गुरून् कालत्रयज्ञानदान्
सूर्यादींश्च नवग्रहान् गणपतिं भक्त्या प्रणम्येश्वरम् ।
सङ्क्षिप्यात्र पराशरादिकथितान् मन्त्रेश्वरो दैववित्
वक्ष्येऽहं फलदीपिकां सुविमलां ज्योतिर्विदां प्रीतये ॥

यद्राभाद्यैर्यत्रैर्जननसमयोऽत्र प्रथमतो
विशेषाद्विज्ञेयस्सह विघटिकाभिस्त्वथ तदा ।
गतैर्दृक्तुल्यत्वं गलितकरणैः खेचरगतिं
विदित्वा तद्भावं बलमपि फलं तैः कथयतु ॥
शिरोवक्त्रोरोहृज्जठरकटिवस्ति प्रजनन-

स्थलान्यूरू जान्वोर्युगलमिति जङ्घे पदयुगम् ।
विलग्नात् कालाङ्गान्यलिङ्गषकुलीरान्तिगमिदं
विसन्धिर्विख्याता सकलभवनान्तादपि परैः ॥

* * * *

क्षेत्रत्रिभागनवभागदशांशहोरात्रिंशांशसप्तलवषष्टिलवाः कलांशाः ।
ते द्वादशांशसहिताः दशवर्गसंज्ञा वर्गोत्तमो निजनिजे भवने नवांशः ॥
दशांशषष्ठचशकलांशहीनास्ते सप्तवर्गाश्च विसप्तमांशाः ।
षड्वर्गसंज्ञास्त्वथ राशिभावस्तुल्यं नवांशस्य फलं हि केचित् ॥

End:

सर्वत्र लत्तासाङ्कर्ये शुभवेधाश्शुभावहाः ।
पापवेधा दुःखकरा गोचरे ताश्च चिन्तयेत् ॥
दशापहाराष्टकवर्गगोचरैर्ग्रहेषु नृणां विषमस्थितेष्वपि ।
जपेच्च तत्प्रीतिकरैस्सुकर्मभिः करोति शान्ति व्रतदानवन्दनैः ॥
अहिं(स)कस्य दान्तस्य धर्मार्जितधनस्य च ।
सर्वदा नियमस्थस्य सदा सानुग्रहा ग्रहाः ॥

Colophon:

इति मन्त्रेश्वरविरचितायां फलदीपिकायां षड्विंशोऽध्यायः ॥

No. 13827. फलदीपिका.
PHALADĪPIKĀ.

Pages, 76. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13522.

Breaks off in the 26th Adhyāya; but wants the beginning in the first Adhyāya.

Same work as the above

No. 13828. फलरत्नमाला.
PHALARATNAMĀLĀ.

Substance, palm-leaf. Size, 17⅝ × 1½ inches. Pages, 76. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete in 27 Adhyāyas.

A work in horoscopy by Kṛṣṇamiśra. The author refers to his son Sōmanāthamiśra and his commentary entitled Jyautiṣakalpalatā on the Jaiminisūtras. There is also reference to Vāñchinātha.

Beginning :

मुनिवरकृतहोराकाननेषु स्वबुद्ध्याप्यनधिगतफलत्वात्प्राप्तसौख्यं मनुष्यम् ।
स्फुटतरफलरत्नैर्भूषयन् कण्ठदेशे जयति जगति विद्याभूषणः कृष्णमिश्रः ॥

मेषाद्याः प्रथिताः क्रमेण मुनिभिः प्रोक्तास्तथा राशयः
खेटाश्चात्र तु कथ्यतेऽशकविधिः प्रक्षेपतः कारकाः ।
पूर्वस्मिन् चरभाद्ध्रुवेद्वहपरादीशकमेण द्विधा
भागाः स्युस्स्थिरभे तथोभयगृहे पूर्वैर्मुनीन्द्रैर्मतम् ॥
चरभे चरभात् स्थिरभे नवमात् सुतभादुभये मुनयो विजगुः ।
विषमात्क्रमतो विपरीतमतो विदुरंशककल्पनमत्र बुधाः ॥

Colophon :

इति फलरत्नमालायां प्रथमोऽध्यायः ॥

इदानीन्तु तेऽपि . . . . चार इति मया श्रीबालामुपास्य देवीपरमेश्वरयोः कृपाकटाक्षवशात्प्रकटितम् । देवोऽपि स्वप्ने मामुवाच कलौ एकोनविंशदब्दपरिवृत्तौ कण्वः कृतो दनूनामऋषिशापेन वाञ्छिनाथ इति दाक्षिणात्यो भविष्यति तावदवधिकमयं त्वत्कृतो ग्रन्थो जैमिनेषु प्रचरिष्यतीत्युवाच । तदर्थमिमे निर्मिता ग्रन्थाः । अत्र दशाप्रकरणे सङ्क्षेपः । सूत्रव्याख्यायां ज्यौतिषकल्पलतायामस्मत्पुत्रेण सोमनाथमिश्रेण प्रकाशीकृतम् । तदपि दृष्ट्वा दशानिर्णयः कर्तव्यः ।

Colophon :

इति श्रीकृष्णमिश्रकृतौ फलरत्नमालायां ग्रन्थागमयुगादिलक्षणं नाम सप्तविंशोऽध्यायः ॥

मिश्रे मध्यममेवायुः नृणां सर्वत्र योजयेत् ।
तत्परीयचमार्गेण दशा नेया विचक्षणैः ॥

No. **13829.** फलरत्नमाला.

PHALARATNAMĀLA.

Substance, paper. Size, 7¾ × 6 inches. Pages, 42. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains 1—13 Adhyāyas complete. Three leaves at the end contain a list of many topics.

Same work as the above.

No. 13830. फलरत्नमाला.
PHALARATNAMĀLĀ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 76. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old. Complete.

Same work as the above. The number of Adhyāyas is wrongly counted as 28.

No. 13831. बालारिष्टाध्यायः.
BĀLĀRIṢṬĀDHYĀYAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 26*a* of the MS. described under No. 13574.

Complete.

Deals with the prediction of good or evil that may befall to infants and children, from a consideration of the position of the planets at the time of birth.

Beginning:

गुरुस्थितस्सुतस्थानाद्यावन्तः फलमादिशेत् ।
शत्रुनीचग्रहं तत्र तावन्तोऽत्र सुता मृताः ॥

गुरुशुक्रौ पञ्चमस्थाने स्थितौ पुत्रवान् । यः कश्चित् पञ्चमांशग्रहाधिपतिकातिपुत्रोत्पत्तिः । पञ्चमस्थानस्थितस्य शत्रुनीचग्रहे मृतपुत्रजननम् ।

गुरुशुक्रौ लग्नगतौ पञ्चमे वा कुजार्कजौ ।
निशाकरे बलक्षीणे योगे जातोऽल्पजीवितः ॥

* * * *

जन्मलग्नात् षष्ठस्थाने सूर्ये स्थिते सति तत्र सूर्ये शनौ भौमे स्थिते सति शिशोः पितुश्च मृत्युः ।

End:

वह्निप्रदेशे रोगश्च महावृद्धिर्भविष्यति ॥
ऊर्ध्वाङ्गरोगं मन्दाद्दा मदोरोगं पूर्वतः(?) ।
अन्यस्थाने इनचवे वये बुधेन्मलेमा रः(?) ॥

Colophon:

इति बालारिष्टशास्त्रे अध्यायस्संपूर्णः ॥

No. 13832. बृहज्जातकम्.
BṚHAJJĀTAKAM.

Pages, 68. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 13794.

Complete.

Same work as the text described under R. No. 406 of the Triennial Catalogue of MSS., Vol. I, Part I-B. It is an authoritative treatise in horoscopy. In the beginning the introductory stanzas found in Bhaṭṭōtpala's commentary are added. At the beginning of each stanza the introductory remarks given by Bhaṭṭōtpala for the same are also added. At the end a few stanzas relating to horoscopy are given. The author of the work under notice is Varāhamihira.

Beginning :

श्रीमद्वेङ्कटनाथाय श्रीनिवासाय मङ्गलम् ।

ब्रह्माजशङ्कररवीन्दुकुजज्ञजीवशुक्रार्कपुत्रगणनाथगुरून् प्रणम्य ।
यस्सङ्गहोऽर्कवरलाभविशुद्धबुद्धिराग(व)न्तिकस्य तमहं विवृणोमि कृत्स्नम्॥
यच्छास्त्रं सविता चकार निपुणैः स्कन्धैस्त्रिभिर्ज्योतिषां
तद्विच्छित्तिभयात्पुनः कलियुगे संश्रित्य यो भूतलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधात्
दित्त्वं(इत्थं) यं प्रवदन्ति योगकुशलास्तस्मै नमो भास्वते ॥
वराहमिहिरोदधौ सुबहुभेदतोयाकुले
ग्रहर्क्षगणयादसि प्रचुरयोगरत्नोज्ज्वले ।
भवन्ति पतिता यतो लघुधियोऽर्थलुब्धास्ततः
करोमि रि(वि)वृतिप्लवं निजधियाहमत्रोत्पलः ॥
मूर्तित्वे परिकल्पितश्शशभृतो वर्त्मा पुनर्जन्मनाम्
आत्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषाम् ।
लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नस्स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः ॥

अधुना स्वशास्त्रस्य पूर्वप्रणीतत्वादानर्थक्यं परिजिहीर्षुरन्यशास्त्रेभ्यः गुणक(र)त्वं प्रदर्शयन् शार्दूलविक्रीडितेनाह—भूयोभिः पटुबुद्धिभिः . . शास्त्रप्लवं प्रारभे ॥

अधुना शास्त्रस्य प्रकृतकर्मविपाकव्यञ्जनत्वश्च वर्णद्वयपरिहारेण शब्दव्युत्पत्तिं प्रदर्शयन् इन्द्रवज्रेणाह—

* * * *

अधुना व्यवहारार्थं शार्दूलविक्रीडितेनाह—

कालाङ्गानि वराङ्गमाननमुरो हृत्कुक्षिवासो भृतो
वस्तिव्यञ्जन ऊरुजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम् ।

End :

अथ कालाद्विनाशे कुकृताल्पकृतयोश्च पृथक्करणे सतां प्रार्थनं वसन्त-तिलकयाह—

ग्रन्थस्य(नैव) चरतोऽस्य विनाशमेति लेख्याद्बहुश्रुतमुखाधिगमात् क्रमेण
यद्वा मया कुकृतमल्पमिहाकृतं वा कार्यन्तदत्र विदुषा परिहृत्य रागम् ॥

सतां प्रमाणमपूर्वाणि प्रणीतानि शास्त्राणि तच्छास्त्रान्तरेण पूर्वं प्रणेतणां नमस्कारमार्ययाह——

दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम् ।
शास्त्रमुपसङ्गृहीतं नमोऽस्तु पूर्वप्रणेतृभ्यः ॥

Colophon :

इति वराहमिहिराचार्यकृतौ जगच्चन्द्रिकायां बृहज्जातके होराशास्त्रे उपसंहाराध्याय षड्विंशतिः ॥

इति बृहज्जातकग्रन्थः संपूर्णः ॥

राशिप्रधानमेतच्छास्त्रं प्रवदन्ति बादरायाः ।
तस्मात्प्रयत्नतोऽहं कथयामि यथामतं तेषाम् ॥
स्वोच्चस्थ दश १० सूर्ये नव चन्द्र पञ्च भूमितनये च ।
पञ्चेन्दुजे सुरेज्ये सप्ताष्टौ भार्गवे शनौ पञ्च ॥
एवं महेन्द्रशास्त्रे मणिन्धयवनबादरायणप्रोक्ते ।
सप्त प्रत्येकस्था निर्दिष्टा रश्मयो ग्रहेन्द्राणाम् ॥
सर्वं प्रमाणमेते मुनिवरवचनात् किन्तु सप्त सङ्ख्यैव ॥

* * * *

एकत्रिंशद्भिस्तु प्रवराः ख्याता महीभुजामिष्टाः ।
द्वात्रिंशद्भिः पुरुषाः पञ्चशतग्रामपतयस्तु ॥
ग्रामसहस्राधिपतिं त्रिंशत्यधिकारकरोति रश्मीनाम् ।
त्रिसहस्रग्रामाणां पुरुषं सूतौ चतुस्त्रिंशत् ॥
परतो मण्डलभाजो बहुकोशपरिग्रहमहासत्त्वाः ।
प्रख्यातकीर्तियशसो भवन्ति शुभदाश्च लोकानाम् ॥

No. 13833. बृहज्जातकम्.
BṚHAJJĀTAKAM.

Pages, 58. Lines, 6 on a page.

Begins on fol. 60*a* of the MS. described under No. 5966.

Complete in 25 Adhyāyas but wants some portions in the 17th Adhyāya.

Same work as the above.

No. 13834. बृहज्जातकम्.
BṚHAJJĀTAKAM.

Pages, 45. Lines, 6 on a page.

Begins on fol. 42*a* of the MS. described under No. 13699.

Contains 10 to 26 Adhyāyas complete.

Same work as the above. The numbering of the Adhyāyas is different from that found in the printed book.

No. 13835. बृहज्जातकम्, आन्ध्रटीकासहितम्.
BṚHAJJĀTAKAM WITH TELUGU MEANING.

Pages, 80. Lines, 6 on a page.

Begins on fol. 77*a* and 108*a* of the MS. described under No. 13592.

Breaks off in the 2nd Adhyāya (the 1st Adhyāya being written in duplicate).

Same text as the above but with a Telugu commentary which was written by Mādhavajyautiṣa, son of Virūpākṣārya of Ātrēyagōtra. He states that he wrote commentaries on the Āryabhaṭasiddhānta, the Nāradasaṁhitā and the Laghu Jātaka of Varāhamihira.

Beginning:

आत्रेयगोत्रजो धीमान् विरूपाक्षार्यनन्दनः ।
माधवज्यौतिषाख्योऽहं वन्तुलान्वयसम्भवः ॥
आदावार्यभटीयस्य सिद्धान्तस्य सवासनाम् ।
उदाहरणसंयुक्तां टीकां कृत्वा ततः परम् ॥
नारदेन कृतायाश्च संहितायां महर्षिणा ।
टीकां कृत्वा च संहृष्य बोधाय तदनन्तरम् ॥
वराहमिहिरप्रोक्ता होरास्कन्धद्वयेऽपि च ।
लघुजातकहोरायां विवृतिः प्रथमं कृता ॥

लघुजातकहोरायाष्टीकाश्चान्या निरीक्ष्य च ।
टीकां बालप्रबोधाय करिष्याम्यान्ध्रभाषया ॥
नीलाम्भोध(द)निशीथिनीपतिरुचौ नित्यौ निरेकाश्रयौ
नित्यं निर्जितनिर्जरारिनिकरौ नित्यार्थदौ निर्मलौ ।
तार्क्ष्योक्षाधिपवाहनौ हरिहरौ माभूधवोमाधवौ
पातां पन्नगतल्प(ल्प)पन्नगधरौ मान्यं बुधैर्माधवम् ॥

* * * *

Colophon:

इति श्रीवराहसंहितायां कृतौ बृहज्जातके आन्ध्रभाषाटीकायां राशिभेदाध्यायः प्रथमः ॥

No. 13836. बृहज्जातकम्, आन्ध्रटीकासहितम्.

BṚHAJJĀTAKAM WITH TELUGU ṬĪKĀ.

Substance, palm-leaf. Size, 16⅛ × 1⅓ inches. Pages, 76. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the 4th Adhyāya.

Same text and commentary as the above but a few stanzas in the beginning are omitted.

No. 13837. बृहज्जातकम्, आन्ध्रटीकासहितम्.

BṚHAJJĀTAKAM WITH TELUGU NOTES.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 178. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old

Contains the Adhyāyas 1 to 23 complete but the 1st Adhyāya wants the beginning.

Same work as the above, but the Telugu meaning here is not by the same author.

No. 13838. बृहज्जातकम्, आन्ध्रटीकासहितम्.

BṚHAJJĀTAKAM WITH TELUGU MEANING.

Pages, 15. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 13623.

Contains the 10th Adhyāya only.

Same work as the above.

No. 13839. बृहज्जातकम्, द्राविडटीकासहितम्.
BṚHAJJĀTAKAM WITH TAMIL MEANING.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 246. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Leaves 17 to 46 are lost.

Contains the 1st Adhyāya and the first 11 stanzas in the 2nd Adhyāya and 7 to 26 Adhyāyas.

Same text as the above but with Tamil meaning.

No. 13840. बृहज्जातकम्, सव्याख्यानम्.
BṚHAJJĀTAKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 328. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Complete in 25 Adhyāyas.

Same text as the above, with a commentary in Sanskrit called Jagaccandrikā which is the same as that described under R. No. 407 of the Triennial Catalogue of MSS., Vol. I, Part 1-B. The commentator is Bhaṭṭōtpala.

End:

ग्रन्थस्य प्रसरतः विरचयत। विनाशमेति विनाशं गच्छतीति लेख्यात् लेखदोषात् बहुश्रुतसुखाधिगमक्रमेण बहूकृतवतां पण्डितानां सुखाधिगमेन ज्ञानाद्वा विदुषां तेन रागं परिहृत्य मात्सर्यमपहाय कार्यं ततो बहुकृतापेक्षया संस्कारेण यद्वा मया कुकृतं कुत्सितं कृतम्। अथवा अल्पं नु परिपूर्णम्। अथवा तत् कृत्स्नमेव न कृतं तद्विपाकाद्यङ्गीकरणीयमित्यर्थः। धनवतां प्रणामपूर्वाणि प्रणामान्तानि शास्त्राणि तच्छास्त्रानुरोधेन पूर्वग्रहीतॄणां नमस्कारमार्ययाह।

दिनकरमुनिगुरुचरणप्रणिपातकृतप्रसादमतिनेदम्।
शास्त्रमुपसङ्गृहीतं नमोऽस्तु पूर्वप्रणेतृभ्यः॥

दिनकरः सूर्यः मुनयो वसिष्ठादयः गुरुरादित्यदासाख्यः एषां चरणप्रणिपातसंस्कारेण कृतप्रसादमतिना शास्त्र . . . . पूर्वाचार्येभ्यः नमोऽस्तु नमस्कारो भवतु।

No. 13841. बृहज्जातकम्, सव्याख्यानम्.
BṚHAJJĀTAKAM WITH COMMENTARY.

Substance, paper. Size, 13½ × 7¼ inches. Pages, 118. Lines, 18 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Breaks off in the 7th Adhyāya.

Same work as the above.

No. 13842. बृहज्जातकम्, सव्याख्यानम्.
BṚHAJJĀTAKAM WITH COMMENTARY.

Pages, 262. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No. 13615.

Contains the Adhyāyas 1 to 11, 14, 16, 18 to 20 and 22 to 24.

Same work as the above.

No. 13843. बृहज्जातकव्याख्या.
BṚHAJJĀTAKAVYĀKHYĀ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 13606.

Contains the 25th Adhyāya incomplete.

Another commentary on the Bṛhajjātaka described above.

Beginning:

अथ नष्टजातकाध्यायो व्याख्यायते—तत्रादि . . . . . . आधानेति . आधानजन्मापरिबोधकाले . आधानं गर्भाधानं जन्म जननं तयोः आधानजन्मनोः, अपरिबोधकाले ज्ञातसमयसंपृच्छतां काले (कस्मिन्) गर्भाधानं कस्मिन् काले जन्म कस्मिन्नयने कस्मिन् वर्षे कस्मिन् ऋतौ कस्मिन् मासे कस्यां तिथौ कस्यां वेलायामित्यादि संपृच्छतां प्रच्छजन्मनागतक . . . मायामवनान्यस्तशङ्कुच्छायादिभिरुदयादिगतघटिकामापाद्य तात्कालिकान् ।

End:

द्वित्रिचतुर्दशतिथिसप्तत्रिगुणा नवाष्टचैत्राद्याः ।
पञ्चदशघ्नास्तद्विड्मरिघातो नवविंशतिहृतशेषं धनिष्ठादि ॥

No. 13844. भार्गवजातकम्, कर्णाटकटीकासहितम्.
BHĀRGAVAJĀTAKAM WITH KANARESE MEANING.

Substance, palm-leaf. Size, 17⅜ × 1¼ inches. Pages, 34. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Praśnasaṅgraha 18*a*, Bhārgavasūtra 53*b*.

Incomplete.

A treatise in horoscopy explaining the principles of predicting the fortune of a person from the relative position of the planets arrived at according to certain calculations. The colophon is not clear, perhaps the portion here belongs to the Jātaka chapter of the Bhṛgukērala.

Beginning :

मेषादिलग्नपर्यन्तं द्विगुणं पुनरक्षिपत् ।

मेषादि तद्ग्रहस्थितराशिपर्यन्तं च ग्रहस्थिते राशिं सङ्गुण्य राशिसङ्ख्यां द्विगुणीकृत्य मेषादिलग्नान्तसङ्ख्यामपि संयोज्य सप्तविंशतिभागं कृत्वा तच्छिष्टं तद्ग्रहदशावस्थं सङ्गुण्याष्टचत्वारिंशदाब्धिहृतलब्धं यावत्सङ्ख्या भवति तावत्सङ्ख्याकसङ्ख्यानां तत्फलं च जातकं सम्यक् कारितव्यम् ।

* * * *

दिनचर्या—

सूर्यादि गण्यते चन्द्रे द्विगुणं वारमिश्रितम् ।
जन्मनक्षत्रसंयुक्तं नवभिर्भागमाहरेत् ॥
शेषं नित्यवशाच्चैव रविचन्द्राररराहवः ।
जीवमन्दज्ञशिखिनो भृगुश्चैव यथाक्रमम् ॥

End :

शुक्रात् षोडशबलवान् चन्द्रस्ताद्द्विगुणं सूर्यः । सर्वेषां बलिनां बलिष्ठो राहुः। केतुनिसर्गजस्य नित्यस्य ।

Colophon :

इति श्रीकेरलीयभार्गवजातके नित्यदशाफलकथनाध्यायः ॥

No. 13845. भार्गवसूत्रम्.
BHĀRGAVASŪTRAM.

Pages, 26. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 3103.

Contains the portion dealing with the 12 Bhāvas or the 12 topics relating to the fortune of a person.

A treatise in horoscopy embodying the principles of foretelling the fortune of a person from a knowledge of the relative position of the planets at the time of his birth. The extent of the work is not known and the form of composition, though in prose, is not Sutraic.

Date of transcription : Wednesday, the 11th day of the dark fortnight of the Bhādrapada month in the year Parābhava.

Beginning :

तनुभावफलम्—

तनुस्थानाधिपं(पा) बुधगुरुशुक्रसम्पूर्णचन्द्राः केन्द्रत्रिकोणस्वक्षेत्रस्वोच्च-शुभांशवर्गोत्तमांशपारिजातांशकुसुमकुङ्कुमांशेषु युक्ताश्चेत् तद्दशायां सकलसौ-भाग्यभोगवाहनादिसकलसत्कीर्तिप्रतिष्ठासिद्धिः । तनुस्थानाधिपः सपापः षष्ठा-ष्टमव्ययेषु स्थितश्चेत्तद्दशायां राजचोरपीडितदरिद्रदुःखमहारोगवस्त्रादिन्यून-शत्रुपीडितपरिभ्रमणादिसिद्धिः ।

End :

स्वस्थानाधिपशन्यङ्गारकसूर्यराहुकेतुभ्यां युक्तस्थानस्थितश्चेत् पुनर्जननं भवति । तत्र शुभयोगे शीघ्रपुनर्जीवनम् । तत्र पापयोगे अनेकसंवत्सरेण नरकानुभवानन्तरेण पुनर्जननं भवति । पूर्वोक्तषष्ठभागांशकस्वरूपफलप्राप्तिः । इति व्ययभावः ॥

Colophon :

इति भार्गवसूत्रं सम्पूर्णम् ॥

No. **13846.** भार्गवसूत्रम्.

BHĀRGAVASŪTRAM.

Substance, palm-leaf. Size, 12⅝ × 1⅝ inches. Pages, 19. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 36*a*. The other works herein are **Mahāvākyaratnāvali** 1*a*, **Vaidyaviṣaya** 19*a*, **Āśvalāyanadharma** 22*a*.

Breaks off in the Karmabhāva which is the 10th Bhāva.

Same work as the above.

No. **13847.** भार्गवसूत्रम्.

BHĀRGAVASŪTRAM.

Pages, 38. Lines, 5 on a page.

Begins on fol. 53*b* of the MS. described under No. 13844.

Contains the 12 Bhāvas and the Gulikabhāva in addition.

Same work as the above.

Beginning :

अथ गुलिकभावफलानि लिख्यन्ते—

मान्द्यब्दानि फलानि वच्मि गुलिके लग्नस्थिते मन्दधीः
रोगी पापयुते तु पश्चनवगः कामी दुरालापवान् ।

विचस्थे विषयातुरो . शपरः क्रोधी दुरालापवान्
पापव्यामे च ङ्किते(?) गतधनः विद्याविहीनोऽथवा ॥

End :

अतिसुखमतिजो रुपवान् लाभयाते
दिनकरसुतपुत्रे चाग्रगं हन्ति यातः ।
विषयर . मेषादीनवाक्योऽप्रवीणां
निखिलधनहरस्स्यान्मन्दजे रिप्फयोगे ॥

मान्दित्रिकोणोपगतं विलग्नं तद्द्वादशांशं यदि वा नवांशम् । मान्द्यन्वितं मान्दियु.

No. 13848. भार्गवसूत्रम्.

BHĀRGAVASŪTRAM.

Pages, 20. Lines, 15 on a page.

Begins on fol. 1*a* of the MS. described under No. 3102.

Contains the 12 Bhāvas.

Same work as the above.

No. 13849. भावकौमुदी.

BHĀVAKAUMUDĪ.

Pages, 134. Lines, 20 on a page.

Begins on fol. 91*a* of the MS. described under No. 13582.

Complete in 14 Paṭalas.

Same work as that described under R. No. 343(*a*) of the Triennial Catalogue of MSS., Vol. I, Part 1-B. By Vēṅkaṭēśa of Vādhūlagōtra who says that he has consulted the Pārāśarīya, the Sūtras of Jaimini, and other works.

No. 13850. भावदर्पणम्—(वाञ्छानाथीयम्).

BHĀVADARPAṆAM (VĀÑCHĀNĀTHĪYAM).

Pages, 39. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13678.

Incomplete.

Similar to the above. This and the work described under R. No. 1875 of ehe Triennial Catalogue of MSS., Vol. II, Part 1-C, probably form part of one and the same comprehensive treatise.

Beginning :

देहस्थानाधिपस्य पापः षष्ठाष्टमव्ययेषु स्थितश्चेत् देहसौख्यं न भजति । दुःखजीवी केन्द्रत्रिकोणस्थितोऽपि बलहीनश्चेत् बलहीनो भवति । लग्नाधि-

पतिर्नीचमूढपराजितपापसंयुक्तपापमध्यवक्रातिवक्रविकलस्वद्दत्वाविगुणयुक्तश्चेत् रोगवान् भवति ; लग्नाधिपगुरुबुधसम्पूर्णचन्द्राः केन्द्रत्रिकोणस्वोच्चस्वक्षेत्रशुभांशशुभवर्गवर्गोत्तमांशपारिजातांशकुसुमकुङ्कुमाद्यंशयुक्ताश्चेत् सकलसौभाग्यवान् गाम्भीर्यवान् स्वरूपवान् ।

End:

तत्र शुभांशे शीघ्रमेव जन्म । तत्र पापयोगे अनेकदिव्यवत्सरनरकवासानन्तरं पुनर्जन्म भवति । पूर्वोक्तभागादीनां शुभांशकशुभलोकप्राप्तिः ।

Colophon:

वाञ्छानाथीयं समाप्तम् ॥

चोरश्च भोक्ता मतिमान् धनाढ्यो राजा च षण्डो विजयी दरिद्रः ।
कार्येषु दक्षः खलु कर्मकर्ता शूरश्च विद्वानिति जातकांशाः ॥

No. 13851. भावदर्पणम्—(वाञ्छानाथीयम्.)

BHĀVADARPAṆAM (VĀÑCHĀNĀTHĪYAM).

Pages, 12. Lines, 7 on a page.

Begins on fol. 140a of the MS. described under No. 13615.

Incomplete.

Same work as the above.

No. 13852. भावदीपिका.

BHĀVADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 64. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Sārāvali 34*a*, Bhāvaphalagrantha with commentary 52*a*.

Complete.

The following topics are dealt with in the work:—

पितृनिधनविचार.	कलत्रभाव.
तनुभाव.	रन्ध्रभाव.
धनभाव.	धर्मभाव.
सहजभाव.	दशमभाव.
बन्धुभाव.	लाभभाव.
सुतभाव.	व्ययभाव.
रिपुभाव.	स्त्रीजातक.

Same work as that described under R. No. 1935 of the Triennial Catalogue of MSS., Vol. II, Part 1-C, but with some additional stanzas in the beginning which are given below.

Date of transcription : Wednesday, the 14th day of the bright fortnight of the Māgha month in the year Bhava.

Beginning :

पितृस्थानाधिपो राहुयुक्तः पितृमृतिप्रदः ।
भिन्नस्थानेऽपि सान्निध्ये भागैः पितृमृतिप्रदः ॥
पितृस्थिते पितृमति दिवसेशयुतो यदि ।
पितृवन्यपितृस्थस्य दशायां वा पितुर्मृतिः ।
यः कश्चित्पितृव(प)स्थे स न राहुर्वाथ केवलः ।
फणी तत्र तयोः पूर्वमागते तु पितुर्मृतिः ॥
पितृनाथेऽन्यराशिस्थे पितृपाकाम्यराशिपे ।
राहुयुक्ते न रवितः पूर्वं स्याच्चेत्पितुर्मृतिः ॥

* * * *

No. 13853. भावनिघण्टुः.
BHĀVANIGHAṆṬUḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 26*b* of the MS. described under No. 13623.

Complete.

Similar to the work described under R. No. 1271(*b*) of the Triennial Catalogue of MSS., Vol. II, Part 1-A. This is also called Lagnanighaṇṭu or Sthānanighaṇṭu.

Beginning :

होरा लग्नोदयः कल्यः तनुमूर्ताङ्गरूपकम् ।
उपाङ्गजन्मसम्पत्तिः प्रथमस्थानतो विदुः ॥
द्वितीयं द्रविणं वाक् च प्रयाणं तु द्वयं स्वं च ।
सत्यं नेत्रं वित्तधनं कुटुम्बमुखमुच्यते ॥
तृतीयं विक्रमो भ्राता दुश्चिक्यसहजं स्वरम् ।

End :

आयागमभवो लाभः स्वार्जितोपचयस्तथा ।
धान्यवृद्धिफलं मुक्ताद्रव्यमैश्वर्यमेव च ॥
रिप्फो व्ययस्तथा चैव पापं द्वादशमन्त्यभम् ।
व्ययस्थानमिति प्रोक्तं द्वादशस्थानतो विदुः ॥

No. 13854. भावनिघण्टुः.
BHĀVANIGHAṆṬUḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 13630.
Incomplete.
Similar to the above.

Beginning:

लग्नोदयं च केन्द्रं च होरं देहस्तनी(नु)स्तथा ।
शरीरात्मा स्वयं ज्योतिर्देहहोरा कलेबरम् ॥
कल्यं लग्नतनू कायं गात्राख्यं मदनाह्वयम् ।
वित्तनेत्रं वाक्कुटुम्बं सत्यसौभाग्यमेव च ॥
वित्तवेश्म प्रदानं च द्वितीयाधिपतेः फलम् ।

End:

फणा परापशक्तिश्च भावोऽयं पञ्चमं स्मृतम् ।
षष्ठो व(वै)रिरिपुशत्रुः क्षतादिरोगभीदिनम् ॥

No. 13855. भावनिघण्टुः.
BHĀVANIGHAṆṬUḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 13556
Complete.
Similar to the above.

Beginning:

भावोऽयं प्रथमं होरा जन्म केन्द्रं तथा तनुः ।
उदयाद्युदकेन्द्रं च मूर्तिरित्युच्यते बुधैः ॥
लग्नाच्च गुणवर्णादिलग्नकेशाकृतिं वदेत् ।
वयोऽनुमानं सौख्यं च धनकीर्तिं जयाधिकम् ॥
स्वस्थानाचलनं वृष्टिं शीतोष्माणं सरिज्जलम् ।
जलोदयं च कूपादौ भावभावेशकारकैः ॥

End:

द्वादशस्तपनोऽक्लीबमालो(?) क्लीबमदन्त्ययः ॥
रिष्फकोपश्च वामाक्षीदुस्स्थानं धननाशकः ।
व्ययो नरककैवल्यं वननं चेति संज्ञिकः ॥

Colophon:

इति भावनिघण्टुः समाप्तः ॥

No. 13856. भावनिघण्टुः.
BHĀVANIGHAṆṬUḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 28*b* of the MS. described under No. 13623.

Complete.

Similar to the above.

Beginning:

कीर्तिर्नो च तनुर्लग्नः देहहोरा च जीवनम् ।
सम्पच्छरीरो मर्त्योङ्गो रूपलक्षणवर्णकम् ॥
कल्योदयौ क्लेशरा(दा)हो लग्नभावं निरूपणम् ।
द्रव्यमर्थं मुखं नेत्रं वाक्कुटुम्बं द्वितीयकम् ॥
सत्यसौभाग्यसङ्गीतं धनमुक्तामणिक्रिया ॥

End:

ऐश्वर्यं शर्म लब्धश्च नानालाभो विनिर्णयः ।
क्लेशं रिप्फमनाचारं व्र(प्रि)यं नेत्रं प्रलापकम् ॥
लोभस्थानं व्ययस्थानं पापस्थानं निशाकरम् ।
एवं द्वादशशोऽन्ये च चिन्तयेन्मतिमान्नरः ॥

No. 13857. भावनिघण्टुः.
BHĀVANIGHAṆṬUḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 3*b* of the MS. described under No. 13565.

Complete.

Same work as that described under R No. 1271(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-A wherein see for the beginning.

End:

एकादशो भवेल्लाभ आयुर्विभव उच्यते ।
द्वादशं तु भवेदन्त्यं रिप्फ इत्यभिधीयते ॥

No. 13858. भावनिघण्टुः.
BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 21*b* of the MS. described under No. 13600.

Complete.

Similar to the above.

Beginning:

लग्नं विलग्नं होराद्यं कल्यकालोदयोद्गमाः ।
द्वितीयं धनवाङ्नेत्रं कुटुम्बं ज्ञातिकिङ्करः ॥
स्थाने तृतीयं कथ्यन्ते दुश्चिक्यं भ्रातृविक्रमाः ।

End:

एकादशो भवेज्ज्येष्ठं विद्यालाभो विभूतयः ।
द्वादशं रिष्फचरमं शय्यागृहविपद्व्ययम् ॥

No. 13859. भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Page, 1. Lines, 4 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nakṣatrajātyādinirṇaya 1*b*, Grahanighaṇṭu 2*a*, Rāśinighaṇṭu 3*a*, Jyautiṣaviṣaya 4*a*.

Complete.

Same work as that described under No. 13857.

No. 13860. भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 3239.

Complete.

Similar to the above.

Beginning:

मूर्तौ शरीरसम्पत्तिरङ्गोपाङ्गनिरूपणम् ।
वित्तं नेत्रं वाक् कुटुम्बं द्वितीयस्थानतो विदुः ॥
स्वरं सत्त्वं विक्रमं च भ्रातृस्थानं तृतीयकम् ।
सुखबन्धुगृहं चैव मातृचिन्ता चतुर्थकम् ॥

End:

एवं द्वादशभावेषु चिन्तयेन्मातेमान्नरः ॥
पापान्वितास्तु ये भावास्ते भावा नाशतां ययुः ;
सौम्यास्सिद्धिस्वरा ज्ञेया मिश्रा मिश्रफलप्रदाः ॥
सर्वोष्टमव्ययस्थश्चेत् पापोऽपि शुभमिच्छति ।
एवमादिफलैस्सर्वैः दशाज्ञानं प्रशस्यते ॥

No. 13861. भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. described under No. 13661.

Complete.

Similar to the above.

Beginning:

कल्यो मूर्तिस्तनुर्लग्नं राशिं होरोदयं तथा ।
द्वितीयं द्रविणं ज्ञातिकुटुम्बं कोशमुच्यते ॥
तृतीयं धन्विदुश्चिक्यं सहजभ्रातृविक्रमम् ।
चतुर्थं हिबुकं वेश्म सुखवृष्टि सुहृज्जलम् ॥

End:

एकादशं भवप्राप्तिलाभायविभवाः स्मृताः ।
द्वादशं प्राप्तिरिप्फाख्यव्ययभावाः प्रकीर्तिताः ॥

No. 13862. भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Page, 3. Lines, 5 on a page.

Begins on fol. 5*b* of the MS. described under No. 13567.

Complete.

Same work as that described under No. 13865, wherein see for the beginning.

End:

इन्द्रियाणां जयश्शूरो धनं जाराशिखण्डिकाः ॥
विद्याविभवसम्पन्ना जायन्ते द्वादशांशके ॥

No. 13863. भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 13578.

Complete.

Slightly different from the work described under R. No. 1271(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

Beginning:

स्थानमाद्यं जन्म राशिर्लग्नहोरोदयस्तथा ।
कविर्विलग्नमात्मानं भागोऽयं प्रथमं स्मरन् ॥
द्वितीयं द्रविणं स्वार्थं कुटुम्बं धनयुग्मकम् ।

End :

द्वादश्यान्त्यव्यये रिप्फ इत्येते लग्ननामकाः ॥

No. **13864.** भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 2*b* of the MS. described under No. 13564.

Complete.

Same work as the above.

No. **13865.** भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 13612.

Complete.

Similar to the above.

Beginning :

कल्या देहो विलग्नश्च लग्नं होरादयः स्मृताः ।
द्वितीयं द्रविणं वाक् च कुटुम्बमिति चोच्यते ॥
सहजश्चैव दुश्चिक्यं तृतीयो विक्रमः स्मृतः ।

End :

आयागमभवाश्चेति लाभमेकादशस्स्मृतः ।
रिप्फं व्ययं च हानिश्च द्वादशो राशिरुच्यते ॥

No. **13866.** भावनिघण्टुः.

BHĀVĀNIGHAṆṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 13630.

Incomplete.

Same work as that described under No. 13870.

No. **13867.** भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 55*a* of the MS. described under No. 13534.

Complete.

Similar to the above. It is not written in the form of stanzas.

Beginning:

लग्नम्, विलग्नम्, कल्यम्, कालम्, उदयम्, उद्गमम्, तनूदयम्, देहम्, देहम, होरा, मूर्तिः, शरीरम्, आत्मा, भावम् ।

धनम्, वाक्, नेत्रम्, कुटुम्बम्, ज्ञातिः, किङ्करः, तुङ्गम्, द्रविणम् ।

End:

चरमम्, शय्या, रिपुग्रहम्, विपत्, व्ययः, रिप्फः, अन्त्यभम्, हानिः ।

No. **13868.** भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 57*a* of the MS. described under No. 13534.

Complete.

Slightly different from the work described under No. 13865.

No. **13869.** भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 2*b* of the MS. described under No. 13654.

Complete.

Slightly different from that described under R. No. 1271 (*b*) of the Triennial Catalogue of MSS., Vol. II, Part 1-A.

Beginning:

क्षितीश उदयो राशिर्लग्नं होरोदयस्तनुः ।
कल्यो विलग्नमात्मा च भावोऽयं प्रथमो भवेत् ॥
द्वितीयं धनवाग्वित्तं कुटुम्बं नेत्रसंज्ञकम् ।
तृतीयं विक्रमभ्रातृदुश्चिक्यं सहजस्तथा ॥

End:

एकादशो भवेल्लाभ आयश्च विजयी शुभः ।
द्वादशं च व्ययस्थानं पापस्थानं च शस्यते ॥

Colophon:

राशिनिघण्टुः सम्पूर्णः ॥

No. **13870.** भावनिघण्टुः.

BHĀVANIGHAṆṬUḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 3*a* of the MS. described under No. 13654.

Incomplete.
Similar to the above.

Beginning:

लग्नं स्यादुदयो राशिः कल्य होरोदयस्तनुः ।
आद्यो देहश्शरीरं च विलग्नाधारमूर्तयः ॥
स्वभावो जन्म चात्मा च भावोऽयं प्रथमस्स्मृतः ।
द्वितीयं द्रविणस्वार्थं कुटुम्बोऽथ सवेश्मकम् ॥

End:

अष्टमं निधनं रन्ध्रं मृतिर्नाशश्च नैधनम् ।
आयुष्यं जीवनोपायः मोक्षो लयनिवारणे ॥
भक्ष्यभोज्यादिनाशश्च भावोऽयं चाष्टमस्स्मृतः ।
जामित्रं चोक्तमस्तं च . . . . ॥

No. 13871. भावनिघण्टुः.
BHĀVANIGHAṆṬUḤ.

Pages, 1. Lines, 7 on a page.
Begins on fol. 15*b* of the MS. described under No. 13705.
Complete.
Similar to the above.

Beginning:

क्षितिरभ्युदयो राशिलग्नं होरोदयं तनुः ।
कल्यो विलग्नमात्मा च भावोऽयं प्रथमे गृहे ॥
द्वितीयं द्रविणं ज्ञातिकुटुम्बं स्वदन च तत् ।
तृतीयं विक्रमो भ्राता दुश्चिक्यं सहजं तथा ॥

End:

एकादशो भवेल्लाभ आयो विभव एव च ।
द्वादशस्तु व्यये मन्त्रो रिप्फ इत्यभिधीयते ॥

No. 13872. भावफलग्रन्थः, सव्याख्यः.
BHĀVAPHALAGRANTHAḤ WITH COMMENTARY.

Pages, 23. Lines, 5 on a page.
Begins on fol. 52*a* of the MS. described under No. 13852.
Complete.

Similar to the work described under No. 13850.

Name of the scribe : Mājēṭi Sarvēsaliṅga.

Date of transcription : Monday, the 1st day of the bright fortnight of the Caitra month in the year Yuva. At the end there are some notes in Telugu.

Beginning :

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
फलानि ग्रहचारेण सूचयन्ति मनीषिणः ।
को वक्ता तारतम्यस्य तमेकं वेधसं विना ॥

मनीषिणः फलानि ग्रहचारेण सूचयन्ति । तमेकं विना फलानां तारतम्यस्य वक्ता को वा प्रभवति । द्वादशानां भावानां फलानि विविच्य वक्तुमपि शुभाशुभफलायत्तां वक्तुं न वयं प्रभवामीति भावः ।

* * * *

देहाधिपः पापयुक्तः षष्ठा(ष्ठ)मव्ययस्थितः ।
न देहसुखमाप्नोति शत्रवे न तु कोपवान् ॥

* * * *

Colophon :

इति सर्वदशासाधारण्योपफलविचारः ॥

End :

उच्चरविफलम्—

ध्यानसङ्ग्रहणं राजप्रसादं पशुलाभमात्मशक्त्युत्साहम्, राजकोपं कण्ठमुदररोगं शिरोवेदनचतुष्पाद्भयम् ॥

उच्चचन्द्रफलम् ॥

No. 13873. भावसारसङ्ग्रहः.

BHĀVASĀRASAṄGRAHAḤ.

Pages, 11. Lines, 10 on a page.

Begins on fol. 45*a* of the MS. described under No. 13618.

Complete.

Same work as that described under No. 13782 *ante* but with some additional stanzas in the end which are given below.

राहुच्चजगते मन्दे बालग्रहनिरीक्षणम् ।
व्ययेशो रन्ध्रसंयुक्ते रन्ध्रेशो व्ययसंस्थिते ॥

धनधान्यसमृद्धिश्च राजपूज्यो भवेत्सदा ।
उत्तमं तु त्रिवर्गैक्यं चातुर्वर्गन्तु गोपुरम् ॥
वर्गपञ्चमसंयोगे सिंहासनमिहोच्यते ।
वर्गद्वयं पारिजातं षण्णां पाकवतां शतम् ॥

Colophon:

भावसारसङ्ग्रहस्समाप्तः ॥

No. 13874. महादशादिनिरूपणम्.
MAHĀDAŚĀDINIRŪPAṆAM.

Pages, 11. Lines, 8 on a page.

Begins on fol. 33*a* of the MS. described under No. 13574.

Incomplete.

Similar to the work described under R. No. 208(*b*) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

Contains the following subjects :—

महादशा.	रोगवारनक्षत्र.
ताराफल.	नक्षत्रराशित्याज्य.
नित्यग्रहफल.	उच्चनीचफल.
गोचारफल.	ग्रहवर्णरत्न.

Beginning:

इनशशिकुजराहुर्जीवमन्दज्ञकेतुर्भृगुरिति(च) नवानां कृत्तिकादिक्रमेण ।
तनुनयसिनजायातोयधन्या सटा सन् नरइति विदुरब्दान् भास्करादिक्रमेण ॥
षट् सूर्य(स्य)दशा चन्द्रस्सप्तसङ्ख्या धरासुतौ ।
राहोरष्टादशं चैव सुरेज्ये षोडशस्तथा ऽ

End:

भौमास्ति(मन्त्र)पु शनिर्लोहः राहो रत्नानि कीर्तयेत् ।
धातोस्तु निश्चयो ज्ञेयो विशिष्यस्तदुदाहृयम् ॥
शुक्रे चन्द्रे जलाधारे देवतामनुदेशरौ ।
रवौ चतुष्पदं स्थानमिष्टकानां चयो . . ॥

No. 13875. महादशादिफलम्.
MAHĀDAŚĀDIPHALAM.

Pages, 40. Lines, 20 on a page.

Begins on fol. 2*b* of the MS. described under No. 5764.

Complete.

Deals with the fortune, good or evil, of a person during the planetary periods technically known as Mahādaśā, Antardaśā, Antarāntardaśā, Sūkṣmadaśā and Prāṇadaśā.

Beginning:

इनशशिकुजराहुर्जीवमन्दज्ञकेतोर्भृगुज इति नवानां कृत्तिकादिक्रमेण ।
तनुनयसिनजायातोयधन्या सटा सा नर इति विदुरब्दान् भास्करादिक्रमेण ॥
फलम्—

षट् सूर्ये दशमश्चन्द्रस्सप्तसङ्ख्या धरासुतः ।
राहोरष्टादशं चैव सुरेज्ये षोडशस्तथा ॥
एकोनविंशतिस्सौरेर्बुधस्सप्तदशस्तथा ।
केतोश्च सप्तवर्षाणि भृगुर्विंशतिवत्सराः ॥

End:

केतु घ ३. विघ ६. फलम्—

जीवात्मसदृशो हानिर्धनधान्यपरिक्षयः ।
त्यागभोगधनावाप्तिः शुक्रः प्राणगते ध्वजे ॥

इति शुक्रप्राणदशाफलं समाप्तः(म्) ।

Colophon:

इति सूर्यादिशुक्रदशापर्यन्तं नवग्रहाणां महादशान्तर्दशान्तरान्तर्दशासूक्ष्मदशाप्राणदशायां च पञ्च दशाफलानि समाप्तः (प्तानि) ॥

No. 13876. महादशाफलम्, आन्ध्रटीकासहितम्.

MAHĀDAŚĀPHALAM WITH TELUGU MEANING.

Pages, 3. Lines, 5 on a page.

Begins on fol. 6*b* of the MS. described under No. 13567.

Incomplete.

Similar to the above.

Beginning:

इनशशिकुजराहु . भास्करादिक्रमेण ॥

* * * *

सूर्ये . ७—

देशान्तरे जनिच(स्वजन) बन्धुवियोगदुःखंहृद्रोगरोगभयचोरयशोच(महीश)पाडी ।
पूर्वस्थितस्य निखिलस्य धनस्य नाशो भानोर्दशागमनकायुते भवन्ति ॥

End:

शुक्रस्य—

आनन्दवृद्धिरतिसौख्यविनोदमात्रं . . काश . . . . यासलाभः ।
आयुश्चिरं . सुखयुक्तशरीरयुक्तो द्रव्यस्य . भृगुदशागमने भवन्ति ॥

No. 13877. महादशान्तर्दशाफलम्.

MAHĀDAŚĀNTARDAŚĀPHALAM.

Pages, 32. Lines, 8 on a page.

Begins on fol. 59*a* of the MS. described under No. 13609.

Complete.

Similar to the above.

Beginning:

सूर्यस्य महादशाब्दाः ६ तस्य फलम्—

भार्यावियोगनिरतश्च शरीरदुःखं हृद्रोगशोकभयचोरमहीशपीडा ।
ऊर्ध्वेस्थितस्य निखिलस्य जनस्य नाशं भानुर्दशागमनकालफलं च तस्य ॥

* * * *

दिवाशुक्रः त्रिकोणस्थो मङ्गलो मातृहानिदः ।
रात्रावपि विधोर्मातुः हानिदस्तु त्रिकोणगः ॥

सूर्यादीनां महादशाफलान्युच्यन्ते—

रवेः तनुः ६—

उद्विग्नचित्तमतिवेदितवित्तनाशं क्लेशप्रवासकुजविघ्नभयानि चास्य ।
संक्षोभितस्वजनबन्धुवियोगदुःखं सूर्ये दशा भजति निश्चयमापदश्च ॥

अन्तर्दशा—

* * * *

अन्तरन्तर्दशाफलम्—

देशत्यागं मृगाद्भीतिः कुक्षिरोगं सुतक्षयम् ।
अग्निना दहनं कुष्ठमन्तरन्तर्दशा रविः ॥

सूक्ष्मदशा—

ऋणरोगादि चोरादिनिगलं चाप्तमारणम् ।
स्थाननाशं मनोहानिः सूर्यसूक्ष्मदशागमे ॥

* * * *

Colophon:

इति सूर्यदशायां विग्रहफलं समाप्तम् ॥

End:

केतोरन्तर्दशा व. । मा. २.—

बन्धु . . . . सं स्वजनैर्विवादं चोरानुराजन्यकुलानुभूतिः ।

चापल्यहास्यागमनप्रियस्य केतौ भवेच्छुक्रदशामुपैति ॥

Colophon:

शुक्रदशा समाप्ता——

*   *   *   *

पञ्चमाधिप उच्चस्थे कारकेण समन्विते ।

लग्नेशे केन्द्रकोणस्थे सुपुत्रबहुलं भवेत् ॥

. . . . स्य समन्वितः ।

क्षेत्रादिधनधान्यं च जातकस्य न संशयः ॥

No. 13878. योगद्वादशफलम्.

YŌGADVĀDAŚAPHALAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 15*b* of the MS. described under No. 13623.

Complete.

Similar to the work described under No. 13697. Deals only with 12 Yōgas.

Beginning:

लग्ने रविकुजौ मन्दो राहुकेतुस्तथैव च ।

मातृहानिर्भ्रातृहानिः पितामातुलहा स्वयम् ॥

लग्ने कविर्गुरौ सौम्ये चन्द्रसौर्ये चिरायुषम् ।

पुत्रपौत्रसमायुक्तं दरिद्रमपि जायते ॥

द्वितीये गुरुसौम्ये च भृगुचन्द्रयुते तथा ।

आयुस्सुखं च सौभाग्यं पशुवृद्धिं यथाक्रमम् ॥

End:

राजकोपादिकं सर्वं पञ्चमेशाज्जयं वदेत् ॥

तद्दशालग्नवित्तेशाः षष्ठशुक्रान्विता यदि ।

नयनोत्पानसं(टनं) ब्रूयात् राजकोपान्न संशयः ॥

केन्द्रे नास्ति बुधश्शुक्रो लग्ने नास्ति बृहस्पतौ ।

दशमेऽङ्गारको नास्ति जातकः(कैः) किं प्रयोजनम् ॥

Colophon:

इति योगद्वादशभावफलं समाप्तम् ॥

No. 13879. रामचन्द्रनायकजातकम्.
RĀMACANDRANĀYAKAJĀTAKAM.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{7}{8}$ inches. Pages, 49. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

The horoscope of Talamalai Rāmacandra Nāyaka who is said to have been born in the year Nandana, Śaka 1574 (expired) corresponding to 1652 A. D.

Beginning :

जननी जन्मसौख्यानां वर्धनी कुलसम्पदाम् ।
पदवी पूर्वपुण्यानां लिख्यते जन्मपत्रिका ॥

स्वस्तिश्रीविजयाभ्युदयशालिवाहनशकाब्दम् १५७४ तदुपरि नन्दनवर्षे
* * * *
अष्टमस्थाने मित्रस्वक्षेत्रहोरायां शत्रुशुक्रद्रेकाणे सममित्रबुधनवांशे मित्रकुजत्रिंशांशे स्वद्वादशांशे समक्षेत्रे पितृकारको रविः । लाभस्थाने मित्रसूर्यहोरायां मित्रगुरुद्रेकाणे सममित्रमेषकुजनवांशे सममित्रकुजत्रिंशांशे सममित्रशनिद्वादशांशे मित्रक्षेत्रे मातृकारके(कश्च)न्द्रः । सप्तमकेन्द्रे मित्रचन्द्रहोरायां मित्रगुरुद्रेकाणे शत्रुकन्याबुधनवांशे मित्रगुरुत्रिंशांशे शत्रुशनिद्वादशांशे मित्रक्षेत्रे गोपुरांशे भ्रातृकारको भौमः ।

End :

स्वस्य देहसौख्यम् । पुत्रप्राबल्यम् । तद्वारिका मातुर्बन्धुशूद्रप्राबल्यम् । अतः स्वसेवकवर्गाणां द्रव्यग्रहणकालः बुधचक्रयोगवशात् पुत्रवर्गेश्चकि द्विदेशे प्रबलविद्यापाण्डित्यम्
* * * *
वर्षे ६३ स्वस्य दीर्घरोगाधिक्यम्, द्रव्यव्ययः, पुत्रपीडापरिहारः । वर्षे ६४ द्रव्यलाभः, पुत्रस्य प्रभुसमानकीर्तिः विशेषसैन्यसङ्ग्रहः पौत्रवर्गे कल्याणम् । वर्षे ६६ राहुदशान्ते कुजभुक्तौ मेषत्रिकोणमासि मध्याह्नसमये युद्धवेलायामायुधात् गण्डश्च । दीर्घायुः ।

No. 13880. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 4*b* of the MS. described under No. 13630.

Complete.

Stanzas containing synonymous names for denoting the 12 signs of the zodiac.

Beginning:

अजः क्रियाच्छागबस्तास्तूबरो विश्वमेषभमु(भेषजी) ।
वृषभश्च रुरुर्गौश्च वृष उक्षा तथैव च ॥
यमलं मिथुनं द्वन्द्वं युगं युग्मं यमं तथा ।
जितुमं च नृयुग्मं च मिथुनंचा(स्या)भिधायकम् ॥

End :

कुम्भो घटो जलधरो हृद्रोग इति कीर्तितः ।
मीनान्त्योऽनिमिषो मत्स्यः शम्बरो झषनामकः ॥

No. **13881.** राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 13556.
Incomplete.
Same work as the above.

No. **13882.** राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 2*a* of the MS. described under No. 13654.
Complete.
Similar to the work described above.

Beginning :

अजः क्रियाच्छागबस्ताः तूबरो विश्वभेषजी ।
मेषः माध्या क्रिया बस्ता च्छागी रागी रयस्तथा ॥
वृषभस्तु रुरुर्गौश्च वृष उक्षा तथैव च ।
अनड्वान् सौरभेयश्च मारक्षोभिवृषाह्वयः ॥

End :

मकरः स्यान्मृगो नक्रः चारो(को)केन(र)श्च कथ्यते ।
कुम्भो घटो बलिधरो हृद्रोग इति कीर्तिताः ॥
मीनान्त्योऽनिमिषो मत्स्यो झषश्च वारिजोऽण्डजः ।
जलजः पृथुलोमा च मीनसंज्ञाः प्रकीर्तिताः ॥

Colophon :-

राशिनिघण्टुस्सम्पूर्णः ॥

No. 13883. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Pages, 2. Lines, 6 on a page.
Begins on fol 1b of the MS. described under No. 13564.
Complete.
Same work as the above.

No. 13884. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Page, 1. Lines, 5 on a page.
Begins on fol. 64a of the MS. described under No. 2824.
Complete.
Similar to the work described above.

Beginning:

मेषमजः क्रिया च्छागः अजं मेषश्च संज्ञिकम् ।
वृषगोगौश्च गौस्वामि न चतुष्पादगो वृषन्तथा ॥
यमो नियं मिथुनभं युग्मश्च युगलं युगम् ।
शा(स्या)त्कुलीरः कर्कटकः कर्की कर्कटचन्द्रभम् ॥

End:

कुरुक्षेत्रन्धनुश्चापं कार्मुकं जीवभं विदुः ।
ग्राहो वराहो नक्रस्तु मृगं मकरसंज्ञकम् ॥
घटकुम्भं कलशभं शवतारन्तु मान्दरम् ।
झषं मीनं मत्स्यभूतं कटिश्चाण्डचक्रमात् ॥

No. 13885. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Pages, 2. Lines, 5 on a page.
Begins on fol. 7b of the MS. described under No. 13612.
Complete.
Same work as the above.

No. 13886. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Pages, 2. Lines, 7 on a page.
Begins on fol. 22a of the MS. described under No. 13600.
Complete.
Similar to the above.

Beginning:

अजः क्रिया छागवस्तौ दुपरा(तूबरो) विश्वमे(मे)षभौ(जी) ।
छागमाद्यं क्रियावस्तं भागराजो गिरस्तथा ॥
अनड्वान्नृषभो धुर्यो वृषभोक्षा तथैव च ।
यमलं मिथुनं द्वन्द्वं युग्मं तु युगलं युगम् ॥

End:

मकरश्च मृगो नक्रः चाकोकेरश्च कथ्यते ॥
कुम्भो घटो जलधरो द्व्यो(द्रो)गश्शैलभस्तथा ।
मीनान्त्योऽनिमिषो मत्स्यः शम्बरो झषकच्छपः ॥

No. 13887. राशिनिघण्टुः.

RĀŚINIGHAṆṬUḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 13534.
Complete.
Similar to the above.

Beginning:

मेषो वस्तः क्रिया च्छागः स्थता विरज इत्यपि ।
वृषभस्ताबुरुर्गौश्च मिथुनं नायुगं युगम् ॥
नृयुग्मं जतुमं कर्की कीटः कर्कटकोऽपि च ।
कुलीरश्चन्द्रभवनं सिंहो लेयो हरिस्स्मृतः ॥

End:

आकोकेरो घटः कुम्भद्द्रोगः कुम्भधारकः ।
मीनो झषाश्चानिमिषो मत्स्यश्च शफरोऽन्त्यभम् ॥

No. 13888. राशिनिघण्टुः.

RĀŚINIGHAṆṬUḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 5*b* of the MS. described under No. 13567.
Complete.
Similar to the above.

Beginning:

मेष आद्यःक्रियाम्यश्च(वस्त)छागास्तूबरभस्त्रकाः ।
. . . . वृषो गो धुर्योक्षश्च गोपतिः ॥

मिथुनं यमलं युग्मं नृयुग्मं जुतुमं यमम् ।
कुलीरकर्की च शफः कर्कटं चन्द्रभं तथा ॥

End :

कुम्भो जलघटो घरो . . योगो द्रोणपुच्छकः ।
मीनान्त्योऽनिमिषो मत्स्यः पृथुलोमझषाण्डजः ॥

No. 13889. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 27*b* of the MS. described under No. 13623.
Complete.
Similar to the above.

Beginning :

मेषादिराशिनामानि बालबोधाय वच्म्यहम् ।
राशिक्षेत्रश्च भवनं भुवनं गुह्यमित्यपि ॥
मेषक्रियाछागवस्तं त्रिपुरा विश्वभेषजम् ।
वृषभः शाकरो गावो वृष उक्षा तथैव च ॥
मिथुनं यमलं युग्मं युगं युग्मं यमं तथा ।

End :

अश्विकं कार्मुकश्चैव अश्वी चापधनुर्धरः ॥
शार्ङ्गं शरासनं प्रोक्तं तोक्षीरं मार्गणासनम् ।
आकोकेरमृगाख्या स्यात् नक्रो मृगमृगो मृगी ॥
कुम्भभृत्कुम्भधारी च घटः कलशवाचकः ।
अन्त्यो झषाख्यश्शवरो निमिषातिनिमीत(ल)नम् ॥

No. 13890. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 12*b* of the MS. described under No. 13578.
Complete.
Similar to the work described above.

Beginning and End :

अजाख्यमाद्यं प्रवदन्ति मेषं राशिर्वृषो गोवृषभाभिधानः ।
एणीयमाख्यं मिथुनं नृयुग्मं स्यात्कर्कटः कर्कटकश्च कर्की ॥

सिंहं च कन्यां च निजाभिधानैराहुस्तुलां तौलिवणिक्पथाख्यम् ।
कीटोऽलिसंज्ञामथ वृश्चिकस्य धनुर्हयाङ्गं च धनुर्धरं च ॥
मृगस्य नक्रो मकरो मृगाख्यो द्वौ कुम्भमीनौ निजनामवाच्यम् ॥

No. 13891. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 142*b* of the MS. described under No. 2040.
Complete.
Similar to the above.

Beginning :

अजः क्रिया च वधश्च बन्धश्च चरराशि च । मेषम् ।
अनड्वान् वृषभस्सूर्यो वृष उक्षस्तथैव च । वृषभम् ॥
युगलं युग्मलं याम्यमयनं मिथुनं युगम् ।
जतुमं युगपर्याया मिथुनस्य तु वाचकः ॥

End :

इर्थो मीनोऽण्डजो मत्स्योऽनिमिषो जलजोऽपि च ।
पुच्छलोमा झषश्चैव बुधो वैसारिणोऽन्त्यजः ॥

Colophon :

इति राशिनिघण्टुस्समाप्तम्(:) ॥

No. 13892. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 30*b* of the MS. described under No. 13661
Complete.
Same work as the above.

No. 13893. राशिनिघण्टुः.
RĀŚINIGHAṆṬUḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 3*a* of the MS. described under No. 13859.
Complete.
Same work as that describe1 un1er No. 1388 0.

No. 13894. राशिकालराशीशनिर्णयः.
RĀŚIKĀLARĀŚĪŚANIRṆAYAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 7b of the MS. described under No. 13630.

Incomplete.

Gives the duration of time and the presiding planets for each of the 12 Lagnas.

Beginning and **End** :

मीनमेषचतुष्पादौ वृषकुम्भौ चतुस्त्रिकौ ।
कन्या पञ्च तुला पञ्च पञ्चार्धे धनुकर्कटे ॥
वृश्चिके मकरे सिंहे मिथुने पञ्चपादयोः ।
सिंहस्याधिपतिस्सूर्यः कर्कटश्च(स्य) निशाकरः ॥
मेषवृश्चिकयोर्भौमः कन्यामिथुनयोर्बुधः ।
धनुर्मीनद्वयोर्मन्त्री तुलावृषभयोः (भृगुः) ॥

No. 13895. लग्नादिनिर्णयः, आन्ध्रटीकासहितः.
LAGNĀDINIRṆAYAḤ WITH TELUGU MEANING.

Pages, 3. Lines, 6 on a page.

Begins on fol. 30b of the MS. described under No. 13623.

Incomplete.

On the determination of Lagna, Aṁśa, Drēkkāṇa, etc., in relation to a horoscope.

Beginning :

त्रिंशद्भागात्मकं लग्नं होरार्धस . . . . ते ।
लग्नत्रिभागो द्रेक्काणं नवांशो नवमांशकः ॥
द्वादशांशो द्वादशांशः त्रिंशांशः त्रिंशदंशकः ।
* * * *
मेषसिंहधनुर्षीष्वजादयस्तौलकुम्भमिथुने तुलादयः ।
कन्यकामृगवृषे मृगादयः मीनकर्कयलिषु कर्कटादयः ॥

End :

क्रूर भानुतमश्शनिध्वजकुजे . केतवः ॥

No. 13896. लग्नाद्यधिपतिफलनिरूपणम्.
LAGNĀDYADHIPATIPHALANIRŪPAṆAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 9a of the MS. described under No. 13612.

Complete.

Explains in what manner the presiding planet connected with each of the 12 topics relating to one's fortune is capable of exercising its influence.

Beginning :

लग्नाधिपं मूर्तिकीर्तिमङ्गोपाङ्गनिरूपणम् ।
स्थितिः शरीरसंपत्तिर्जन्मलग्नपतेः फलम् ॥
वित्तं नेत्रं कुटुम्बं वा सत्यं सौभाग्यमेव च ।
विद्या वेश्म प्रयाणं च द्वितीयाधिपतेः फलम् ॥

End :

व्ययं नाशं पापराशिर्वामाक्षिचरणं तथा ।
शय्या स्थानं च नरकं व्ययस्थानपतेः फलम् ॥

No. 13897. वृद्धपाराशर्यम्.
VṚDDHAPĀRĀŚARYAM.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 82 Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as that described under R. No. 371(*a*) of the Tri. Cat. of MSS., Vol. I, Part I-B, wherein see for the beginning. This work is also called Dāyaprakāśa.

End :

प्रमेहकामिरा(ला)रोग्यं महा(दुःखं) धनक्षयः ॥
पुत्रभार्यावियोगश्च निगलं बन्धुनाशनम् ।
द्वितीयद्यूनदे . . . . अपमृत्युर्भविष्यति ॥
तद्दोषपरिहारार्थं केतुप्रीतिकरं शुभम् ।
आयुर्वृद्धिकरं चैव अपमृत्युविनाशकृत् ॥

Colophon :

शुक्रदशाफलं संपूर्णम् ।
वृद्धपाराशर्यं संपूर्णम् ॥

No. 13898. वृद्धपाराशर्यम्.
VṚDDHAPĀRĀŚARYAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 112. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the Adhyāyas 1 to 6 and 24 to 26.

Same work as that described under R. No. 871(*a*) of the Tri. Cat. of MSS., Vol. I, Part I-B, but with slightly different readings and with colophon.

Deals with the following topics :—

१. आदित्यान्तर्दशाफलम.	६. शनिदशाफलम्.
२. रविदशाफलम्.	१४. बुधदशाफलम्.
३. कुजदशाफलम्.	१५. केतुदशाफलम्.
४. राहुदशाफलम्.	१६. शुक्रदशाफलम्.
५. गुरुदशाफलम्.	

Colophon :

इति वृद्धपराशरसूत्रे शुभदशाफलं नाम षड्विंशोऽध्यायः ।
इति दशाफलं संपूर्णम् ॥

No. 13899. वेङ्कटपतिकुमारजातकम्.
VEṄKAṬAPATIKUMĀRAJĀTAKAM.

Substance, palm-leaf. Size, 7¼ × 1¼ inches. Pages, 36. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old. Incomplete.

The horoscope of the second son of Vēṅkaṭapatimantrin. The date of the birth of the son is given as Śaka 1591.

Beginning :

दिनकरेन्दुमहीसुतसोमजास्सुरपुरोहितशुक्रशनैश्वराः ।
उरगकेतुहरिश्च चतुर्मुखास्तव दिशन्तु सदा शिवमादरात् ॥
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिस्स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भैः
नित्यं सा पद्महस्ता तव वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥
जननी जन्मसौख्यानां वर्धनी कुलसम्पदाम् ।
पदवी पूर्वपुण्यानां लिख्यते जन्मपत्रिका ॥
सूर्येन्दुकुजसौम्यार्यभृगुमन्दाहिकेतवः ।
नक्षत्रलग्नसमुत्पन्नं रक्षन्त्वेनं महाग्रहाः ॥

शके १९९१. सौम्यसंवत्सर आश्वयुज बहुल १४. बुधवासरे शेषाचलेश-कलत्रकृपाकटाक्षवीक्षितप्रवर्धमानसकलसम्पद्युतस्य श्रीमद्भगवत्पादाम्भोज-सञ्चरमाणचञ्चरीककृतमानसस्य वेङ्कट(सु)ब्बय्याख्यमन्त्रीन्द्रप्रभुवरस्य धर्मपत्नी उभयकुलनन्दिनी द्वितीयं सुपुत्रमजीजनत् । तात्कालिकग्रहाः—

End :

चन्द्रकेन्द्रगतस्य शुभवर्गगतस्य दुष्टगतस्य गुरुमहादशा प्रवृत्ता, समाः १६—०—० फलम्—

नीरोगता पुत्रकलत्रलाभः लग्नाद्रिपुस्थस्य गुरोर्दशायाम् ।
आदौ भवेद्देवमथान्त्यपादे दारार्थचोराग्निभयं तथैव ॥

No. **13900.** वेधाफलम्, आन्ध्रटीकासहितम्.
VĒDHĀPHALAM WITH TELUGU MEANING.

Pages, 5. Lines, 9 on a page.

Begins on fol. 56*a* of the MS. described under No. 13618.

Incomplete.

On the influences, good or bad, resulting from planetary conjunctions under certain peculiar circumstances.

Beginning :

अथ वेधाफलम्—

लाभविक्रमखशत्रुषु स्थितश्शोभनो निगदितो दिवाकरः ।
खेचरैस्सुततपोजलान्त्यगैः वार्किभिर्यदि न विद्यते तदा ॥

* * * *

द्यूनजन्मरिपुलाभखत्रिगश्चन्द्रमाश्शुभफलप्रदस्सदा ।
स्वात्मजान्त्यमृतिबन्धुधर्मगैर्विद्यते न विजयधैर्यविग्रहैः ॥

End :

कुजः पाराख्यगो वेधा तीर्थदानशयुग्गतैः(?) ॥
बुधः रवमीवगोसिन्धूतपनादाख्ययुग्गतैः ।
जीवः कार्यरमाभूतरसानलदयुग्गतैः(?) ॥
शुक्रो हिंस(ा)पुनर्धैर्यरमाप्यम्बोगतिं गतैः ।
युक्तस्थानेषु तन्वादिव्ययान्तेषु यथाक्रमम् ॥

No. 13901. शतयोगमञ्जरी.
ŚATAYŌGAMAÑJARĪ.

Substance, palm-leaf. Size, 15⅝ × 1⅜ inches. Pages, 19. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Similar to the work described under No. 13697.

Beginning:

लग्नाद्भाग्यं गते जीवे तल्लाभे तदधीश्वरे ।
शुभश्चन्द्रेण संयुक्ते नाहियोग इतीरितः ॥
नाहियोगे तु सञ्जातो विद्यावान् धनवान् सुखी ।
राजपूज्याभिमानी च एकविंशतिवत्सरे ॥
निष्कं पञ्चशतं प्राप्तं वत्सरत्रययोगभाक् ।
लाभेशे परमोच्चस्थे धनराशिसमन्विते ॥
राज्यनाथेन [1]संयुक्ते भेरीयोग उदाहृतः ।
भेरीयोगे वाद्यघोषः समन्तात् मत्तेभानां वाजिनां सङ्घघोषैः ।
सद्भिश्चायं स्तूयमानो नृपालः षट्त्रिंशाब्दाद्वत्सरं वेदसङ्ख्या ॥

End:

वनदुर्गाधिपो राजा सेनानीः नृपपण्डितः ।
केरलीयोगसञ्जातो विंशाब्दाद्वत्सराष्टकम् ॥
धनेशे भूम्यराशिस्थे भाग्येशे लाभसंयुते ।
लाभेशे परमोच्चस्थे चित्रयोग इतीरितः ॥
चित्रयोगे तु मनुप्रभावो विदान्तविराज्ञिनयुतः(?) प्रसिद्धः ।
राजाधिराजो बहुदेशनाथो नवाधिकं सप्ततिवत्सराणि ॥

No. 13902. शुक्रनाडी.
ŚUKRANĀDĪ.

Pages, 374. Lines, 12 on a page.

Begins on fol. 35*a* of the MS. described under No. 13742.

Wants the beginning and the end.

---

[1] सन्दृष्टे इति पाठान्तरम्.

A well-known treatise on horoscopy predicting the characteristics, fortunes and other incidents of persons born in the period of any Aṁśas of each of the Lagnas. An index of the Lagnas together with the Aṁśas treated of in this MS. is given below with the corresponding fólio noted against each.

	Foll.		Foll.
मेषलग्नं सुमत्यंशम् ...	३८—४१	मीनलग्नं सुप्रभांशम् ...	७९, ८०
धनुर्लग्नं पङ्कजांशम् ...	४२, ४३	Unknown	८१—१०७
वृश्चिकलग्नं कोकिलांशम्	४४, ४५	कुम्भलग्नं बलांशम्	१०८, १०९
वृश्चिकलग्नं सौम्यांशम्	४६, ४७	मिथुनलग्नं कोमलांशम्	१११, ११२
मिथुनलग्नं कान्तांशम् ...	४८, ४९	मेषलग्नं गणेशांशम्	११३, ११४
सिंहलग्नं मायांशम् ...	५०, ५१	मीनलग्नं शोभनांशम्	११५, ११६
कन्यालग्नं सौम्यांशम् ...	५२, ५३	मिथुनलग्नं महेन्द्रांशम्	११७—१२७a
Not known ...	५४, ५५	कटकलग्नं सुरांशम् ...	१२७b
कुम्भलग्नं सुमत्यंशम् ...	५६	Unknown	१२८, १२९
तुलालग्नं धनञ्जयांशम् ...	५७	कुम्भलग्नं . . . मुकुन्दांशम्	१३०, १३१
कन्यालग्नं धनञ्जयांशम्	५८—६०a	धनुर्लग्नं सुमत्यंशम्	१३२, १३३
सिंहलग्नं सुमत्यंशम् ...	६०b	सिंहलग्नं सुमत्यंशम् ...	१३४
तुलालग्नं धनञ्जयांशम् ...	६१	धनुर्लग्नं वारुणांशम् ...	१३४b
सिंहलग्नं सुमत्यंशम् ...	६२	सिंहलग्नं धनञ्जयांशम्	१३५, १३६
धनुर्लग्नं कमलांशम् ...	६३, ५४	धनुर्लग्नं मुकुन्दांशम् ...	१३७
. . . . सुमनांशम् ...	६५, ६६	कटकलग्नं वारुणांशम् ...	१३९
कटकलग्नं पुष्करांशम् ..	६७	मिथुनलग्नं क्षमांशम् ..	१४०
मिथुनलग्नं मायांशम् ...	६८	मीनलग्नं सुमत्यंशम्	१४१, १४२
मकरलग्नं चम्पकांशम् ...	६९, ७०	मिथुनलग्नं मायांशम्	१४३—१४६
मीनलग्नं शिवदांशम् ...	७१, ७२	वृश्चिकलग्नं कुमारांशम्	१४७, १४८
कटकलग्नं ऐश्वर्यांशम् ...	७३	मिथुनलग्नं सौम्यांशम्	१४९, १५०
वृषभलग्नं हरिणांशम् ...	७४	मकरलग्नं मालिन्यंशम्	१५१, १५२
मकरलग्नं मायांशम् ...	७५	वृषभलग्नं भाग्यांशम्	१५३, १५४
तुलालग्नं ऐश्वर्यांशम् ...	७६	कुम्भलग्नं मुद्रिकांशम्	१५५. १५६
मिथुनलग्नं शाङ्कर्यंशम् ...	७७, ७८		

	Foll.
मिथुनलग्नं प्रभांशम्	१५७—१५९
कटकलग्नं सुरांशम्	१६०—१६२
धनुर्लग्नं सुधांशम् ...	१६३
सिंहलग्नं	१६४
कटकलग्नमन्द्रांशम्	१६५, १६६
कन्यालग्नं पङ्कजांशम्	१६७, १६८
कन्यालग्नम् ...	१६९
मिथुनलग्नम् ...	१७०
कुम्भलग्नं मालांशम्	१७१, १७२
कटकलग्नं सुराधीश्वरषष्ठ्यंशम्	१७३—१७६
कुन्दांशम् ...	१७७
कुम्भलग्नं सुमत्यंशम्	१७८, १७९
कटकलग्नं क्षमांशम्	१८०, १८१*a*
कन्यालग्नं मैत्रांशम्	१८१*b*—१८३*b*
वृषभलग्नं कुमारांशम्	१८४, १८५
वृश्चिकलग्नं वर्गोत्तमफलम्	१८६
मेषलग्नं . . . जांशम्	१८७
धनुर्लग्नं मकुटांशम् ...	१८८
मिथुनलग्नं मायांशम्	१८९, १९०
वृषभलग्नं कुन्दांशम्	१९१, १९२
कटकलग्नं सौम्यांशम्	१९३, १९४
मिथुनलग्नं क्षमांशम्	१९५, १९६
कटकलग्नं मायांशम्	१९७, १९८
कटकलग्नं शाङ्कर्यंशम्	१९९
कटकलग्नं मायांशम् ...	२००
मिथुनलग्नं मायांशम्	२०१, २०२
कटकलग्नं शीतलांशम्	२०३—२०५
सिंहलग्नं सुमत्यंशम्	२०६, २०८
सिंहलग्नं सुमनांशम् ...	२०७
मिथुनलग्नं हरिण्यंशम्	२०९
कुम्भलग्नं चम्पकांशम्	२१०, २११
मेषलग्नं पङ्कजांशम्	२१२—२१४
तुलालग्नं जगत्यंशम्	२१५, २१७
कुम्भलग्नं सुमनांशम्	२१८
वृश्चिकलग्नं सुमत्यंशम्	२१९, २२०
सिंहलग्नं सुमत्यंशम्	२२१, २२२
सिंहलग्नं सुमनांशम्	२२३, २२४
सिंहलग्नं कोकिलांशम्	२२५, २२६
कुम्भलग्नं सोदरांशम्	२२७, २२८
सिंहलग्नं धनदांशम्	२२९, २३०
मिथुनलग्नं कान्तांशम्	२३१—२३३

Beginning :

मेषलग्नं सुमत्यंशम्—

वर्गोत्तमे भङ्गकलांशभागे निशाकरे क्लेशफलं प्रदद्युः ।
स्वराजसन्तापवियोगदुःखं राजन्यवैरं जननाशनं च ॥
वर्गोत्तमांशे तनुभावनाथे तुङ्गं गते वा गुरुणा च दृष्टे ।
सत्कर्मकारी सुकृती धनाढ्यो लोकान्तरे सौख्यमिहाहुरार्याः ॥
द्वितीयकोशे लिखितं सत्यं सम्यग्विचार्यताम् ।
सुमत्यंशे चरे-लग्ने लग्नेशे केन्द्रराशिगे ।
चन्द्रजन्मा सुमेधावी दत्तवंशे सुभोगवान् ॥

राज्येशे भाग्यराशिस्थे तस्मात्केन्द्रे भृगुस्थिते ।
अभाग्यकुलजन्मापि राजयोगं लभेन्नरः ॥
दुर्गारण्यगिरिप्रान्ते जननं स्थितमादिशेत् ।
उत्तरांशे नदीप्रान्ते उदधिप्रान्तगे जनिम् ॥
मीने सिंहांशगे मन्दे युग्मांशे सिंहगे गुरौ ।
त्रिचत्वारिंसमे जन्मा तद्द्वितीयेऽथवा जनिः ॥

End :

नूतनग्रहनिर्माणं प्रबलोद्योगलाभवान् ।
प्रभुप्रियकरो नित्यं सन्मानं भवति ध्रुवम् ॥
लेख्यविद्यासुयोगाढ्यो अर्थार्जनसमर्थकः ।
वाहनं कीर्तिलाभं च कुजभुक्तौ तथा भवेत् ॥
राहुभुक्तौ योगवृद्धिः कोशस्थाने प्रसिद्धिमान् ।
स्वजनेषु सुयोगाढ्यो गृहे गोधनसङ्कुलम् ॥
भ्रातृवर्गे शुभाधिक्यं गुरुभुक्तौ सुलाभवान् ।
क्षेममूलात् फलाधिक्यं दारपुत्रादिवर्धनम् ॥
भुक्त्यन्ते पितृजाड्यं च व्ययाधिक्यं . . . ॥

* * * *

No. 13903. शुक्रनाडी.
ŚUKRANĀḌĪ.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 474. Lines, 14 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants the beginning and the end.

Same work as the above.

Beginning :

द्वि. . . . . द्विस्तारं भावनाद्विषु योजयेत्कालवित्तमः(?) ।
पङ्कजांशे मेषलग्ने विप्रकालांशजा . . . . ।
. . . . . स्समाङ्कश्च सीमन्ते . . . जातकः ॥
अथवा च द्वितीया स्यात् . . . . . . ।
अनुजभ्रातृहानिश्च ज्येष्ठभ्रातृसुखं भवेत् ॥

महानदीप्रान्तदेशे नदीतीरे जनिर्भवेत् ।
पूर्वभागे . . . . वालवयुते भवः ॥
उत्तरांशे मितग्रामे अग्रहारे जनिर्भवेत् ।
. . . . मेषलग्ने समुद्भवः ॥

End:

पुत्र . . . . पुत्रमूलात्सुखं भवेत् ।
दारपुत्रयुतश्चेति वार्धके धर्मसङ्ग्रही ॥
प्रत्यक्कारदशाकाले यावत्कालं सुखं भवेत् ।
साधने घृति . . . . नात्र संशयः ॥
षष्ठाधिपदशाकाले रन्ध्रेशस्यान्तरान्तरे ।
कुळीरे मासनिर्याणं शुक्लपक्षे विधोर्दिने ॥
उषःकाले चतुर्दश्यां पा . . . . . व्रजेत् ।
कामिन्यंशफलं प्रोक्तं प्रत्यक्षं भार्गवं मतम् ॥

Contains the following Lagnas and Aṁśas.

		Foll.			Foll.
मेषलग्नं पङ्कजांशम्	...	१*a*	कन्यालग्नं वृषभांशम्	...	२१
सिंहलग्नं मङ्गलांशम्	..	२*b*	मनिलग्नं सौम्यांशम्	...	२२
वृषभलग्नं मुकुन्दांशम्	...	३*a*	मकरलग्नं कलुषांशम्	...	२३
कुम्भलग्नं कलापांशम्	...	४, ५	कुम्भलग्नं भुवांशम्	...	२४
कन्यालग्नं स्निग्धांशम्	...	६*a*	कुम्भलग्नं लांशम्	...	२५
कन्यालग्नं दुग्धांशम्	...	७*a*	तुलालग्नं सुखदांशम्	...	२६
वृषभलग्नं कुमारांशम्	...	८, ९	कुम्भलग्नं सुप्रभांशम्	...	२७
सिंहलग्नं गिरिशांशम्	...	१०, ११	तुलालग्नं मुद्रिकांशम्	...	२९, ३०
मिथुनलग्नं सौम्यांशम्	...	१२, १३	कुम्भलग्नं विश्वम्भरांशम्	...	३१, ३२
कन्यालग्नं सौम्यांशम्	...	१४	धनुर्लग्नं कुमारांशम्	...	३३
सिंहलग्नं मङ्गलांशम्	...	१५	मकरलग्नं कमलांशम्	..	३४, ३५*b*
वृश्चिकलग्नं मुद्रिकांशं	...	१६	सिंहलग्नं क्षमांशम्	...	३५
सिंहलग्नं सुधाकरांशम्	...	१७, १८	धनुर्लग्नं कुमारांशम्	...	३६
कटकलग्नं क्षमांशम्	...	१९, २०	धनुर्लग्नं सुमत्यंशम्	...	३७

	Foll.
कन्यालग्नं पाटलांशम् ...	३८
मिथुनलग्नं समांशम् ...	३९
कुम्भलग्नं शाङ्कर्यंशम् ...	४०
तुलालग्नं मैत्रांशम् ...	४१
मीनलग्नं कुम्भिन्यंशम् ...	४२
वृषभलग्नं सुमत्यंशम् ...	४३, ४४
सिंहलग्नं गणेशांशम् ...	४५, ४६
कटकलग्नं पाशांशम् ...	४७, ४८
मिथुनलग्नं कलुषांशम् ...	४८b, ४९
तुलालग्नं मुद्गरांशम् ...	५०, ५१
मिथुनलग्नं प्रभांशम् ...	५२—५४
मकरलग्नं क्षमांशम् ...	५५, ५६
कन्यालग्नं कमलांशम् ...	५७, ५८
कुम्भलग्नं सुमत्यंशम् ...	५९a, ६०
सिंहलग्नं त्रैलोक्यांशम् ...	५९b
कटकलग्नं सुमनांशम् ...	६१, ६२
धनुर्लग्नं मेषचन्द्रमिथुनांशफलम्	६३
धनुर्लग्नं सोदरांशम् ...	६५
सिंहलग्नं सुभगांशम् ...	६६
सिंहलग्नं कालकूटांशम् ...	६७
वृषभलग्नं अम्बुजांशम् ...	६८
तुलालग्नं कमलांशम् ...	६९b, ७०
सिंहलग्नं कमलांशम् ...	७१, ७२
वृषभलग्नं जगत्यंशं ...	७३, ७४
मीनलग्नं धनञ्जयांशम् ...	७५, ७६
मिथुनलग्नं मायांशम् ...	७७—७९
मेषलग्नं सुमत्यंशम् ...	८०, ८१
कुम्भलग्नं सुमत्यंशम्	८२, ८३a, ८४
मेषलग्नं कुमारांशम् ...	८२b
सिंहलग्नं कुम्भिन्यंशम् ...	८५, ८६
मीनलग्नं धनदांशम् ...	८७—८९
वृषभलग्नं शाङ्कर्यंशम् ...	९०, ९१
कन्यालग्नं सौम्यांशम् ...	९२, ९३
सिंहलग्नं सुमत्यंशम् ...	९४, ९५
कटकलग्नं प्रभांशम् ...	९६, ९७
वृषभलग्नं कुमारांशम ...	९८
वृषभलग्नं सुमत्यंशम्	१००, १०१
मिथुनलग्नं ध्रुवांशम्	१०२,—१०४
कुम्भलग्नं सुखदांशम्	१०५, १०६
वृश्चिकलग्नं कालांशम् ...	१०७
वृषभलग्नं त्रैलोक्यांशम्	१०८, १०९
तुलालग्नं प्रभांशम्	११०, १११
मिनलग्नं चित्रिण्यंशम्	११३
कन्यालग्नं ब्रह्मांशम ...	११४
कटकलग्नं अबलांशम् ...	११५
कुम्भलग्नं ब्रह्मांशम	११६, ११७
मीनलग्नं सुरांशम् ...	११८
कटकलग्नं सुरांशम् •	११९, १२०
तुलालग्नं शाङ्कर्यंशम्	१२१, १२२
कटकलग्नं कान्तांशम्	१२३, १२४
मिनलग्नं शीतलांशम् ...	१२५
मेषलग्नं कालकूटांशम् ...	१२६
मीनलग्नं शाङ्कर्यंशम् ...	१२७
कटकलग्नं कालांशम् ...	१२८
सिंहलग्नं जर्झरांशम्	१२९, १३०
मकरलग्नं सुमदांशम्	१३१, १३२
मिथुनलग्नं नलिनांशम्	१३३, १३४
मिथुनलग्नं प्रभांशम्	१३५, १३६

	Foll.
वृषभलग्नं ईशानांशम्	१३७
धनुर्लग्नं उरगांशम्	१३८, १३९
वृषभलग्नं मालिन्यंशम्	१४०, १४१
मकरलग्नं कुन्दांशम्	१४२, १४३
सिंहलग्नं सुमनांशम् ...	१४४
कुम्भलग्नं मालिन्यंशम्	१४५, १४६
वृश्चिकलग्नं धनदांशम्	१४७, १४८
वृश्चिकलग्नं धनञ्जयांशम्	१४९, १५०
मीनलग्नं सुमत्यंशम्	१५१—१५३
तुलालग्नं सुमत्यंशम्	१५४, १५५
कुम्भलग्नं कमलांशम्	१५६, १५७
सिंहलग्नं धनञ्जयांशम्	१५८, १५९
मीनलग्नं वरदांशम् ...	१६०
कटकलग्नं वारुणांशम्	१६१, १६२
वृषभलग्नं गिरीशांशम्	१६३, १६४
कटकलग्नं कामिन्यंशम् ...	१६५
कुम्भलग्नं मुकुन्दांशम् ...	१६६
वृषभलग्नं कमलांशम्	१६७, १६८
वृश्चिकलग्नं धनञ्जयांशम्	१६९—१७१
मकरलग्नं प्रभांशम्	१७२, १७३
वृश्चिकलग्नं कुमारांशम्	१७४, १७५
. . . . . .	१७१—१७८

Twenty-three fol. are wanting.

	Foll.
मकरलग्नं सुमत्यंशम्	१७९, १८०
वृषभलग्नं कमलांशम्	१८१, १८२
मकरलग्नं मायांशम्	१८३, १८४
सिंहलग्नं जगत्यंशम्	१८५—१८७
कटकलग्नं सुमत्यंशम्	१८८, १८९
मकरलग्नं सुप्रभांशम्	१९०, १९१
धनुर्लग्नं धनदांशम्	१९२, १९३
कन्यालग्नं कामिन्यंशम्	१९४
सिंहलग्नं गान्धर्वांशम्	१९५, १९६
कटकलग्नं चम्पकांशम् ...	१९७
कुम्भलग्नं कुमारांशम् ..	१९८
सिंहलग्नं उरगांशम् ...	१९९
मिथुनलग्नं क्षमांशम् ...	२००
वृश्चिकलग्नं सुमत्यंशम् ...	२०१
मीनलग्नं नलिनांशम् ...	२०२
मेषलग्नं स्रग्व्यंशम् ...	२०३

Part II.

	Foll.
कटकलग्नं कुमारांशम् ...	२०४
कटकलग्नं क्षमांशम् ...	२०५
वृश्चिकलग्नं प्रभांशम् ...	२०६
कान्तांशं उभयम् ...	२०७
सिंहलग्नं सौम्यांशम् ...	२०८
वृश्चिकलग्नं कालकूटांशम्	२०९
कुम्भलग्नं मनोहरांशम् ...	२१०
कुम्भलग्नं सौम्यांशम् ...	२११
कुम्भलग्नं मालिन्यंशम् ...	२१२
मकरलग्नं क्षमांशम्	२१३, २१४
धनुर्लग्नं शिवदांशम् ...	२१५
कुम्भलग्नं रौद्रांशम् ...	२१६
मिथुनलग्नं प्रभांशम्	२१७, २१८
वृश्चिकलग्नं मायांशम् ...	२१८b
मिथुनलग्नं शार्ङ्ग्यंशम्	२२०, २२१
मेषलग्नं कुन्दांशम् ...	२२२

	Foll.		Foll.
कन्यालग्नं कमलाकरांशम्	२२३, २२४	मिथुनलग्नं कुन्दांशम् ...	२३०
		धनुर्लग्नं कुन्दांशम् ...	२३१
धनुर्लग्नं कोकिलांशम् ...	२२४b	सिंहलग्नं पाटलांशम् ...	२३२
धनुर्लग्नं पाशांशम् ...	२२६	कुम्भलग्नं कमलांशम्	२३३, २३४
मेषलग्नं सुमनांशम् ...	२२७	कुन्दांशम् ...	२३५
कुम्भलग्नं मुद्रिकांशम् ...	२२८	सिंहलग्नं कालिकांशम् ...	२३६
मेषलग्नं कोकिलांशम् ...	२२९	धनुर्लग्नं कामिन्यंशम् ...	२३७

No. 13904. शुक्रनाडी.

ŚUKRANĀḌĪ.

Substance, paper. Size, 11 × 8⅜ inches. Pages, 84. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new. Incomplete.

Same work as the above. This is restored from the MS. described under the next number.

Beginning :

भार्गवोक्तप्रकारेण द्विचत्वारिंशन्नाडीनां मध्ये सारांशनाड्या जन्मराशिफलानि लिख्यन्ते, चतुर्थानुसारेण ।

मूर्तिस्थानाधिपे शुक्रे ८०० भेशेन समन्विते ।
वनबिन्दुसमायुक्ते सौरबिन्दुसमन्विते ॥
तदंशे भाग्यराशिस्थे केन्द्राधिपसमन्विते ।
स्थानबिन्दुसमायुक्ते गरबिन्दुसमान्विते ।
गानबिन्दुसमायुक्ते धीरबिन्दुसमन्विते ।

* * * *

इति वचनात् . . . . . . शोभितलेख्यवान् । वाक्स्थाने सारबिन्दुर्ना(न्दूना)मविद्यमानत्वात् वाक्चातुर्यो मधुरवचनपरः, प्रभुवर्गपूज्यः, उद्दण्डसाहसपरः ॥

Colophon :

इति नरपतिविजये विवेकमार्ताण्डवाचिते सर्वतोभद्रग्रन्थं नाम चतुर्थोऽध्यायः ॥

End :

अष्टरूढं कथं यन्त्रं बद्धं काकगळे युतः ॥

संयतं वासया मुक्तो उच्चाटनकृतं भवेत् ।
कोकिलं रोचनं चन्द्रं लम्बालुगजवारिभिः ॥
मदनोद्भवलेखिन्यां पत्रभूर्जे इदं लिखेत् ।
हरिता हरितालेन शिलाकं संयुतेन च ॥
लिखेद्धनूमता(तो)रूप मष्टाङ्गुलप्रमाणकम् ।
दीर्घदन्तं कराळं (कराला)स्यं हनूमन्तं रसान्वितम् ॥

No. **13905.** शुक्रनाडी.
ŚUKRANĀḌĪ.

Substance, palm-leaf. Size, 15¾ × 1⅜ inches. Pages, 52. Lines, 8 on page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

No. **13906.** षट्फलग्रन्थः.
ṢAṬPHALAGRANTHAḤ.

Pages, 5. Lines, 10 on a page.

Begins on fol. 8*b* of the MS. described under No. 13605.

Incomplete.

On the different kinds of influence exerted by the planets on the fortunes of a person according as they are in their own houses, their friends' or enemies' houses, and according to the positions they occupy, i.e., highest, lowest and middling, technically called Uccasthāna, Nīcasthāna and Samasthāna.

Beginning :

अथ षट्फलम्—

उच्चराशौ विलोमे तु बलं नान्यैर्हरिष्यते ।
कालस्यातिबलत्वं स्यात्तस्मात्स्वोच्चेऽतिवक्रता ॥
स्वोच्चाश्रिताः श्रेष्ठबला भवन्ति मूलत्रिकोणे स्वगृहे च मध्याः ।
दृष्टेक्षिता मित्रगृहाश्रिता वा वीर्यं कनीयस्समुपोद्वहन्ति ॥
ध्वज(सं)स्थिताः पुमांसः शुक्लेऽहनि सूरिभिः समाख्याताः ।
युग्मभवनेषु सर्वे कृष्णे निशि योषितो बलिनः ॥

शरीरकान्तिमारोग्यं पशुधान्यधनायतिम् ।
धन्यत्वं मित्रसंपत्तिं कुर्यात्स्थानबलाधिकः ॥

End :

जलकुसुमवस्त्रनिरताः सौम्याः कल्प्याः स्वजनसंहृष्टाः ।
लाभव्यायारिगताः शशिहोराभ्यां नृणामिष्टाः ॥
नेष्टा निधनान्त्यगता लग्नोपगतौ विशेषेण ।
इह बलिभिर्ग्रहेन्द्रैः अनेकपुष्टचर्थसंयता जाताः ॥

No. 13907. षड्वर्गप्रकरणम्—आन्ध्रटीकासहितम्.

ṢAḌVARGAPRAKARAṆAM WITH TELUGU MEANING.

Pages, 9. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 13623.

Incomplete.

On the influences exerted by the planets according to the different positions which they occupy calculated with reference to लग्न, होरा, द्रेकाण, नवमांश, द्वादशांश and त्रिंशांश.

Beginning :

अथ षड्वर्गशुद्धिप्रकरणम्—

होरे विषमेऽर्केन्दौ समरांशौ चन्द्रतीक्ष्णांशौ ।

द्रेक्काणस्य—

चरस्य पुत्रनवपाः स्थिरे धर्मस्वपुत्रपाः ।
पुत्रधर्मस्वपा येन द्रेक्काणपतयः क्रमात् ॥

द्वादशांशस्य—

मेषसिंहधनुषीस्वजायदः तौलिकुम्भमिथुने तुलादयः ।
कन्यकामृगवृषे मृगादयः मीनकर्क्यलिषु कर्कटादयः ॥

End :

मेषो युगान्तादिपादान् मीनो वृषपदान्तिकान् ।
भुक्तिर्भुङ्क्ते क्रमेणैव ज्योतिर्विद्भिरुदाहृतम् ॥

* * * *

नृयुग्मं परिवेषस्य सिंहो धूमस्य पश्चिमः ।
राहोश्चापस्य चापस्य कुम्भोणोरुश्च उच्यते(?) ॥

No. 13908. सर्वार्थचिन्तामणिः.
SARVĀRTHACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 16⅞ × 1¼ inches. Pages, 111. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Contains the Adhyāyās 9 to 16. Thirty-four leaves in the beginning are lost.

Same work as that described under R. No. 912(c) of the Triennial Catalogue of MSS., Vol. II, Part 1-A.

Name of the scribe : Śanakavarapu Bhīmanna.

Date of transcription : 5th day of the bright fortnight of the Caitra month in the year Sarvajit.

No. 13909. सर्वार्थचिन्तामणिः.
SARVĀRTHACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 15⅞ × 1⅜ inches. Pages, 52. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*b*. The other works herein are Kārakanighaṇṭu 1*a*, Uḍudaśāpradīpikā 19*a*. Kēraḷajyautiṣa 20*a*, Praśnaśāstra 25*a*.

Contains the Adhyāyās 2, 3 which wants the beginning, and 10 and 11

Same work as the above.

No. 13910. सर्वार्थचिन्तामणिः.
SARVĀRTHACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 15⅞ × 1¼ inches. Pages, 92. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Adhyāyas 1 to 9.

Same work as the above.

No. 13911. सर्वार्थचिन्तामणिः.
SARVĀRTHACINTĀMAṆIḤ.

Substance, (Śrītāla) palm-leaf. Size, 13⅜ × 1⅜ inches. Pages, 258. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains 1 to 11 Adhyāyas complete, but wants the beginning and the end.

Same work as the above.

No. 13912. सर्वार्थचिन्तामणिः.
SARVĀRTHACINTĀMAṆIḤ.

Substance, paper. Size, 14 × 1¼ inches. Pages, 216. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Jyautiṣaviṣaya 109*a*. Contains the Adhyāyas 1 to 14 complete and the 15th incomplete. Same work as the above.

The scribe adds in the end :

सत्यमङ्गलसीमायां कुन्नत्तूर्ग्रामवासिना ।
सुब्रह्मण्येन लिखिता गुरुभक्तिरतेन च ॥
अविघ्नमस्तु ग्रन्थश्च . . . . . . : . ।
चिन्तामणिर्नाम्ना सर्वार्थपदपूर्विका ॥

No. 13913. सारावली.
SĀRĀVALĪ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 34*a* of the MS. described under No. 13852. Incomplete.

A treatise in horoscopy dealing with the undermentioned topics :—

१. आश्लेषागण्ड.
२. चन्द्रारिष्टभङ्ग.
३. ग्रहारिष्टभङ्ग.
४. अमित्रायुःप्रकरण.
५. राजयोगः.
६. भावफलानि.
७. केसरीयोगः.

Date of transcription : Wednesday, the 12th day of the dark fortnight of the Phālguna month in the year Bhava.

Name of the scribe : Mājēṭi Sarvēśaliṅga.

Beginning :

अष्टमस्थो यदा भानू राहुयुक्तो भवेद्यदि ।
शिरश्छेदनयोगोऽयं प्रवदन्ति मुनीश्वराः ॥
लग्ने धने व्यये क्रूराः छेदयोगो भवेदिह ।
शुभग्रहयुते चैव सर्वदोषं व्यपोहति ॥
रिप्फस्थानगतो . . . . यदि विष्ठितः ।
नासिकाच्छेदयोगोऽयं प्रवदन्ति मुनीश्वराः ॥

पापस्थो यदि वा शुक्रः रिपुस्थानगतो यदि ।
बुधजीवनयो(ः) योगे कर्णच्छेदो भवेद्ध्रुवम् ॥

* * * *

Colophon :

इति सारावल्यां चन्द्रारिष्टभङ्गः ॥

* * * *

Colophon :

इति सारावल्यां ग्रहारिष्टभङ्गाध्यायः ॥

End :

चन्द्रार्कभार्गवशशाङ्कसुता बलस्थाः भौमेन्दुपुत्रसितभास्करनन्दनाश्च ।
मन्देन्दुवाक्पतिसिता नियतं यतीनां कुर्वन्ति जन्मफलपाककृता जनानाम् ॥
कुजार्किदेवेज्यसितेन्दुपुत्रैस्सुरेज्यसोमात्मजचन्द्रभौमैः ।
समङ्गलैस्स्युस्सबलैर्यथोक्तैर्बुधोदको वल्कलधारकश्च ॥
एकस्थाने खे च चतुर्णां योगश्चेन्मानवानातौ ।
ने यथे ॥

No. 13914. सारोपदेशः, केरलटीकासहितः.

SĀRŌPADĒŚAḤ WITH MALAYĀLAM MEANING.

Substance, (Śrītāla) palm-leaf. Size, 17½ × 1¾ inches. Pages, 186. Lines, 8 on a page. Character, Malayalam. Condition, good. Appearance, new.

Incomplete.

On the nature, characteristic qualities, fortunes, etc., of persons born in the different Rāśis. There is no authority for the name given to this work except that it is so stated by the scribe. Said to have been copied by Candukkuñjanpaṇikkar.

Beginning :

मेषराशिफलम्—

पिङ्गाक्षः पैत्तिकः क्रोधी सभामान्यस्सुविक्रमः ।
लुब्धः कृती च चपलो मेषराश्यां तु जायते ॥
उद्विग्नो बलवांस्त्यागी ज्ञानशास्त्रार्थकोविदः ।
पृथूरुवदनः श्रीमान् वृषभे जायते नरः ॥
कन्दर्पप्रतिमानाङ्गो विशालाक्षो रतिप्रियः ।
बन्धुद्विण्णिपुणो जेता मिथुने जायते नरः ॥

End :

सुखाधिपस्तृतीयस्थे सुखहीनोऽतिलुब्धवान् ।
विरोधी बलहीनश्च मान्द्यो मित्रविनाशनः ॥
सुखाधिपस्सुखे संस्थे स्वकर्मनिरतप्रियः ।
मातृद्रव्यकरश्चैव पुण्यकर्मादितत्परः ॥

No. **13915.** स्त्रीजातकम्.
STRĪJĀTAKAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 129*b* of the MS. described under No. 13618.

Incomplete.

A treatise dealing with the horoscopic predictions relating to the birth, the characteristic qualities of the body and the mind, the disposition of the husbands, etc., of women.

Beginning :

स्त्रीणां जन्मफलं नृयोग्यमुदितं तद्भर्तृषूह्यं तदा
तासां देहशुभाशुभं शशि . . . लग्नाच्च वीर्याधिकात् ।
भर्तॄणां च महागुणं स्मरगृहाच्छिद्राश्च तेषां मृतिः
सौम्यासौम्यखगोक्तवीर्यवशतो ज्ञात्वा वदेत् कालवित् ॥
युग्मेषु राशिष्वुदयेन्दुयुक्तेष्वथेतरैर्युक्तनिरीक्षितेषु ।
सखेटयुक्ता प्रकृतिस्थिता सा रूपान्विता भर्तृगुणा वराढ्या ॥
ओजेषु लग्नेषु युतेषु (तेषु) दृष्टेषु पापैः पुरुषाकृतिस्सा॰।
स्यात्पापचिन्ता पतिना विरोधी धूर्ता दरिद्रा बहुदुःखभोक्त्री ॥

End :

युग्मे विलग्ने कुजजीवसौम्यशुक्रैर्बलिष्ठैः खलु जातकन्या ।
प्रख्यातकीर्तिः सकलार्थविद्या लोके प्रसिद्धा परतत्त्ववित् स्यात् ॥
स्त्रीजन्मलग्नात् स्थिरगैश्च पापैरन्यापि धर्मस्थितखेचरो यः ।
प्रव्रज्यकान्तस्य सहाश्रितं स्याद्विवाहपृच्छादिषु चिन्त्यमेतत् ॥

No. **13916.** होराप्रदीपः.
HŌRĀPRADĪPAḤ.

Pages, 25. Lines, 10 on a page.

Begins on fol. 77*a* of the MS. described under No. 13605.

Colophon :

आनन्दनिलयं(य)प्रोक्ते होराभूषणनाय(म)के ।
राशिप्रकरणं नाम प्रथमं समुदीरितम् ॥

End :

आनन्दनिलयप्रोक्ते शास्त्रे होराविभूषणे ।
योगप्रकरणं नाम पश्चमं समुदीरितम् ॥
यन्मातापितरौ ख्यातौ कोनाम्बावेङ्कटाचलौ ।
आनन्दनिलयाख्येन तेनेदं साङ्गमीरितम् ॥
क्रोधनार्तौ(ब्दे) सितानङ्गभार्गवे चन्द्रमौलिना ।
एतद् द्विजेनालिखितं होराशास्त्रविभूषणम् ।
होरासारं तु सङ्गृह्य मया सुधिजना मुदा ॥
दृष्ट्वा नन्दन्तु दोषश्चेत्समीकुर्वन्तु सर्वदा ।
स्थानफलज्ञानप्रकरणम् ॥
गृहयुतदृष्टिविहीनो राशिस्तत्रोक्तफलं कुरुते ।
गृहयोगेक्षणायुक्ते गृहस्वभावगुणं वक्तव्यम् ॥
* * * *
बुधार्कौ सुधियं स्थूलं वक्रे नाशं नृपोत्तमाः ।
जीवार्कौ श्रीति नीचगं शीतार्कौ दशदुःखितम् (?) ॥

No. 13918. होरासारः.

HŌRĀSĀRAḤ.

Pages, 25. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 2819.

Contains the Aṣṭakavarga portion only.

A treatise on horoscopy.

Beginning :

शुद्धस्फटिकसङ्काशं वृषारूढमुमापतिम् ।
तं प्रणम्य महादेवं तमोघ्नं विघ्नवल्लभम् ॥
साम्बमूर्तिप्रसादेन वक्ष्येऽहं जातकोत्तमम् ।
नृणां शिव . . . . त्वायुर्वीर्यं शुभाशुभम् ॥
पुरा शिवेन देव्यास्तु समस्तं परिकल्प्यते ।
तत्सर्वेश्च मया प्रोक्तं विस्तारं शृणु नारद ॥

ब्रह्मक्षत्र्या(त्रा)दिनीचान्तं प . . . . जवारजम् ।
तेषां पृथक् कार्यं फलाफलविनिर्णयः ॥
चन्द्रलग्नं जन्मलग्नं स्फुटीकृत्य गृहं तथा ।
सम्यक् परीक्षा कर्तव्या तत्तद्यत्नानुसा(रतः?) ॥
(व)र्षकन्दायमासस्य पक्षे दिनघटीफलम् ।
गुरोरष्टकवर्गेण संवत्सरफलप्रदम् ॥

End:

वित्तेश्वरस्य दिग्भागे वित्तं प्राप्नोति निश्चयम् ।
रन्ध्रेश्वरस्य दिग्भागे देहं तत्र विनश्यति ॥
अष्टकव(र्गफलं प्रो)क्तं सिद्धसेनेन धीमता ।
तस्मात्समाप्तमुद्धृत्य मया प्रोक्तं समान(स)तः ॥

Colophon:

इति होरासारे अष्टकवर्गफलज्ञानयोगः ॥

No. 13919. होरासारः.

HŌRĀSĀRAḤ.

Pages, 31. Lines, 10 on a page.

Begins on fol. 47*a* and 51*b* of the MS. described under No. 13605.

Contains the Adhyāyas 30, 18, 5 and 6, which deal with the following subjects respectively :—

१. राश्यंशकाध्यायः.	३. सद्योमरणाध्यायः.
२. त्रिंशद्दशानिरूपणाध्यायः.	४. योगायुर्ज्ञानाध्यायः.

Similar to the above.

Beginning:

हिंस्रत्वे मतिः कुष्ठी स्वाचारो विकलेक्षणो न शान्तमतिः ।
पित्तप्रकृतिकः कामी मेषांशे जायते मनुजः ॥
द्वाविंशत्पञ्चविंशेऽब्दे पञ्चके पञ्चषष्टिना ।
अंशारिष्टं विजानीयाद्रोगमेवात्र निर्दिशेत् ॥
वृषभांशके तु जातो मतिमान् भोक्ता पृथूदरो बलवान् ।
दीर्घास्यो विश्रुतगतिः . . . . ॥
द्वाविंशे दशमे वर्षे द्वात्रिंशे वाथ सप्ततिम् ।
विनष्टस्थानमेतेषु निर्दिशन्ति मनीषिणः ।

End:

विशि दीर्घकालियोगे जातो मुनिवर्जितेन्द्रियो भूत्वा ।
दिव्यौषधिभूयोगात् बिलप्रवेशोक्तमेति मन्त्रजपात् ॥
युक्त्याद्वियोगान् यवनोपदिष्टान्मयोदितान् पूर्वकर्मदुस्सङ्गात् ।
सर्वान् विनिश्चित्य दशान्तराले छिद्रेषु योगोक्तफलं नियोज्यम् ॥

Colophon:

इति होरासारे योगायुर्ज्ञानं नाम षष्ठाध्यायः ॥

No. 13920. होरासारफलम्.

HŌRĀSĀRAPHALAM

Pages, 29. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 13574, wherein it is mentioned as Hōrāsārabhāvaphala.

Complete.

Similar to the above.

Date of copying: Wednesday, in the dark fortnight of the Caitra month in the year Bhava. Name of scribe: Kuppusvāmi.

Beginning:

लग्नेशे स्वोच्चराशिस्थे स्वनवांशगते तथा ।
शुभग्रहयुते दृष्टे देहसौख्यं विनिर्दिशेत् ॥
लग्नेशे बलसंयुक्ते केन्द्रकोणगते युते ।
शुभमध्यगते लोके देहसौख्यं विनिर्दिशेत् ॥
देवलोकांशगे सूर्ये लग्नेशे बलसंयुते ।
भाग्येशे स्वोच्चराशिस्थे देहसौख्यं विनिर्दिशेत् ॥

* * * *

इति (तनु) भावफलं सम्पूर्णम् ॥

End:

कर्मस्थानाधिपे स्वोच्चे गुरुशुक्रनिरीक्षिते ।
गोपुरे गुरुसंयुक्ते महासर्पस्य दर्शनम् ॥
पञ्चमे गुरुसंयुक्ते तदीशे दशमे स्थिते ।
शुभग्रहयुते दृष्टे विष्णुपूजारतो भवेत् ॥

Colophon:

इति होरासारफलं सम्पूर्णम् ॥

(D) PROGNOSTICATION, DIVINATION, ETC.

No. 13921. अक्षरप्रश्नः.
AKṢARAPRAŚNAḤ.

Substance, palm-leaf. Size, 12¾ × 1¼ inches. Page, 1. Lines, 8 on a page. Character, Nandināgarī and Telugu. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other works herein are Jyautiṣaviṣaya 1*a*, Naṣṭapraśnaviṣaya 9*a*, Sarvatōbhadracakra 10*a*.

Incomplete.

Similar to the work described under R. No. 472 of the Triennial Catalogue of MSS., Vol. I, Part I-B.

The predictions are based upon certain astrological calculations made with the help of the letters of the alphabet.

Beginning:

. . . . ।
सौम्यचन्द्रगुरुचन्द्रशोभना . . . . . दुनष्टम् ॥
केतुना च कलहं भवेद्यदि . . . .

अक्षरप्रश्न—

प्रश्नाक्षरं समारभ्य कृत्तिकान्तं प्रगण्यते ।
. . . . . . शेष गमनागमनं कृ . . . ॥
एकेन श्रूयते वार्ता द्वितीये तत्र तिष्ठति ।
तृतीये मार्गमार्गेण चतुर्थे गृहमागते ॥

End:

प्राचीमुदीची गमनप्रभावो भानुः . . . . णे च ।
प्रश्ने पिधायाखिललग्नकाले सर्वं च कार्यं च फलं च सिद्धिम् ॥

No. 13922. आरूढग्रन्थः.
ĀRŪḌHAGRANTHAḤ.

Pages, 22. Lines, 5 on a page.

Begins on fol. 52*b* of the MS. described under No. 6470.

Complete.

Contains the following Kāṇḍas:—

१. आरूढकाण्ड.
२. रागकाण्ड.
३. मरणकाण्ड.
४. भोजनकाण्ड.
५. सेनाकाण्ड.
६. यात्राकाण्ड.
७. अर्घकाण्ड.

Deals with the divination of certain events by means of calculations based on the answers given to certain questions put to the person concerned.

Beginning:

आरूढचक्रम्—

प्रष्टुरारूढभं ज्ञात्वा तद्वीथीमवलोक्य च ।
आरूढाद्यावति विधिः तावतीरुदयादिकम् ॥
तद्राशिच्छत्रमित्युक्तं शास्त्रे ज्ञानप्रदीपिके ।
आरूढाद्यानुगां वीथीं परिगण्योदयादिना ।
तावता राशिना छत्रमिति केचित् प्रचक्षते ॥
मेषस्य वृषभः छत्रं मेषच्छत्रं वृषस्य च ।
युग्मकर्कटसिंहानां मेषच्छत्रमुदाहृतम् ॥

* * * *

अर्कशुक्रारराह्वर्की चन्द्रज्ञो गुरवः क्रमात् ।
पूर्वादीनां दिशामीशाः क्रमान्नष्टादिसूचकाः ॥

* * * *

इति आरूढकाण्डः ।

End:

इति यात्राकाण्डः ॥

जलराशिषु लग्नेषु जलग्रहनिरीक्षिते ।
कथयेत् वृष्टिरस्तीति विपरीते न वर्षति ॥

* * * *

मित्रस्वामिवशात् सौम्यमिति ज्ञात्वा वदेत् सुधीः ॥
. . . . . . निर्णयवशादर्घनिर्णयमीरितम् ॥

Colophon:

इत्यर्घकाण्डः ॥

No. **13923.** आर्यासप्ततिः, सव्याख्या.

ĀRYĀSAPTATIḤ WITH COMMENTARY.

Pages, 31. Lines, 5 on a page.

Begins on fol. 46*a* of the MS. described under No. 13694.
Contains 1 to 56 stanzas complete and the 57th incomplete.
A treatise in 70 stanzas on divination by Utpala or Bhaṭṭōtpala.

Beginning :

महासिंह महासिंह महादैत्येन्द्रमर्दन ।
महाभीकरदंष्ट्राय हसिंह नमोऽस्तुते ॥ इत्यादि ।

अविघ्नेन परिसमाप्तिप्रयोजनसिद्ध्यर्थं विशेषतः नवग्रहविघ्नेश्वरविष्वक्सेनादीन् प्रणम्य लोकोपकारार्थमुत्पलाचार्येण प्रश्नशास्त्रेषु बहुशः विचार्य शेखरीकृत्य आर्यासप्ततिरिति शिष्यानुकम्पयोक्तमित्यर्थः ।

दशभेदं ग्रहगणितं जातकमवलोक्य निरवशेषमदियः (?) ।
कथयति शुभाशुभं तस्यान मीढ्वा भवेद्वाणीम् ॥

एवंप्रकारं मनुष्याणां यो जानाति स प्राणिनां गुरुरित्यर्थः । बालप्रबोधार्थं स्पष्टतया वक्ष्यन्ते ।

* * * *

प्रष्टा मणिकनकयुतैः फलकुसुमै राशिचक्रमभ्यर्च्य ।
(सं)पृच्छेदभिलषितं भक्त्या विनयान्वितः प्रश्नम् ॥

* * * *

आरूढराशिमारभ्य तिथिराशिपर्यन्तं गणयित्वा यावत्सङ्ख्या जायते उदयराशिमारभ्य तावत्सङ्ख्यालब्धराशिः छत्रराशिः । पुनरपिच्छत्रग्रहणमार्गः ।

End :

इत्यादिरारूढराशिरुभयराशिश्चेत् स्वगृहं समीचीनं ते क्षेत्रसामन्तेनापहृतमारूढराशेर्योऽधिपतिस्तस्य वर्णं जातिरूपमेव चोरस्येति वदेत् । जातिः कथमिति । गुरुर्ब्राह्मणः, शुक्रादित्यकुजाः क्षत्रियाः, बुधचन्द्रौ वैश्यौ, शनिः शूद्रः ।

पूर्णशरीरश्चन्द्रः लग्नोपगतश्शुभग्रहैर्दृष्टः ।
सौम्यावलोकितं भवति च शीर्षोदयं लग्ने ॥

इत्यादि । पूर्णचन्द्रः गुरुमुखैः शुभग्रहैर्दृष्टः ।

No. 13924. कृष्णीयम्.
KṚṢṆĪYAM.

Pages, 20. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 13705.

Contains the Adhyāyas 1 to 16 complete, but wants the beginning.

A treatise on divination dealing with the following topics. By Kṛṣṇa.

१. राशिचक्रप्रकरण.	९. मूलयोनिप्रकरण.
२. ग्रहबलाबलप्रकरण.	१०. जीवयोनिप्रकरण.
३. ग्रहदृष्टिविचारप्रकरण.	११. प्रवासचिन्ताप्रकरण.
४. ग्रहस्वरूपविचारप्रकरण.	१२. भोजनविधिप्रकरण.
५. प्रश्नलग्नविचारप्रकरण.	१३. रहस्यप्रकरण.
६. नष्टजातकप्रकरण.	१४. देवचिन्ताप्रकरण.
७. लाभालाभचिन्ताप्रकरण.	१५. स्त्रीचिन्ताप्रकरण.
८. वृक्षयोनिप्रकरण.	१६. स्त्रीपुंसचिन्ताप्रकरण.

Beginning:

विप्रौ भृगुदेवगुरू क्षत्रियजातिर्दिवाकरोर्वीजौ ।
वैश्यौ बुधचन्द्रमसौ शनैश्चरः शूद्रसङ्करकृत् ॥
क्रूरा रविकुजसौरास्सौम्या गुर्वसुरपूज्यशशितनयाः ।
सौम्यः शशीति केचित् बुधो नु . . . . . . ॥
(भृगुशशि)जौ राजसिकौ गुरुशशिरवयस्तु सात्त्विकौ ज्ञेयौ ।
तामसिकौ यमभौमौ भावाश्चैते नृणां चिन्त्याः ॥

* * * *

Colophon:

इति कृष्णीये प्र(थमोऽध्यायः) ॥

* * * *

उदयनवांशकतुल्यं द्विगुणं द्विशरीरराशिहोरायाम् ।
द्विगुणं स्थिरेतरेषु राशिद्रेक्काण . . . . . ॥
. . . . . शयतुल्यं द्विगुणं द्विशरीरराशिहोराणाम् ।
द्वित्रिगुणस्थिर . . . . देत् द्रव्यम् ॥

Colophon:

इति श्रीकृष्णीये षोडशोऽध्यायः ॥

See under the next number for the end.

No. 13925. कृष्णीयम्.
KṚṢṆĪYAM.

Pages, 14. Lines, 7 on a page.
Begins on fol. 7*a* of the MS. described under No. 13643.

Contains the Adhyāyas 17 and 18.
See under the previous number for the beginning.
Same work as the above.

End:

मेषे अष्टमराशिः वृषेण तुल्यस्तुलाधरः फलतः ।
कन्या मिथुनेन समा धनुषा मीनो घटो मृगवत् ॥

Colophon:

इति कृष्णीये सप्तमो(दशोऽ)ध्यायः ॥

* * * *

बलिहोमगन्धपुष्पैरादित्यादीन् ग्रहांस्तथाभ्यर्च्य ।
प्रारभ्यमिदं शास्त्रं विधिना कृत्वा गुरोः पूजाम् ॥
विधिव . . . . तं भवन्ति सर्वार्थसाधकं लोके ।
एवं समनुगृहीतमिदं जनयति यशोऽर्थसंसिद्धिम् ॥
व्याकरणादिषु शास्त्रेष्वधीततत्त्वस्य विदिततत्त्वस्य ।
कृष्णकृतं चिन्ताज्ञानं कृष्णीयमिति पूज्यम् ॥

Colophon:

इति श्रीकृष्णीये द्वितीयैकवचनम् ।

No. 13926. कृष्णीयम्, सव्याख्यानम्.
KṚṢṆĪYAM WITH COMMENTARY.

Substance, paper. Size, 13⅜ × 8⅝ inches. Pages, 133. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, new. Incomplete.

Same work as the above and together with a commentary called Caturasundarī. In some places, the commentary is found without the text.

Beginning:

नत्वा त्रिकालतत्त्वज्ञं सर्वज्ञं क्रियते मया ।
व्याख्या कृष्णीयशास्त्रस्य नाम्ना चतुरसुन्दरी ॥
येन त्रैकाल्यज्ञानं समुदितमज्ञानतिमिरवर्म(र्ति)भ्यः ।
तद् ज्ञानं दिव्ययुतं वक्ष्ये तस्मै नमस्कृत्य ॥

येन त्रिकालज्ञानदर्शनाभावेन यत् त्रैकाल्यज्ञानं ज्योतिर्ज्ञानं सम्यक् गुप्तं तस्मै नमस्कृत्याज्ञानतिमिरवर्तिभ्यो मनुष्येभ्यस्तद् ज्ञानं दिव्ययुतमहं वक्ष्यामीत्यर्थः । अयमिष्टदेवताप्रणामप्रतिपादन उक्तः । ज्योतिषः फलमादेशः ।

फलार्थमारम्भणं भवति लोके तस्माद्यत्नः कार्यो ह्यादेशे ज्यौतिषज्ञे ज्यौतिषफलमादिशस्तदर्थमारम्भणं भवतीत्युच्यते । आदेश उच्चारणं धर्मादिचतुर्वर्गाश्रित उपयोगः फलमित्युच्यते । यतस्सर्वेषां कर्मणामारम्भणं फलार्थं भवति हि नियमेन लोके तस्मादादेशे यत्नः कर्तव्यो ज्यौतिषज्ञेन पुरुषेणेत्यर्थः ॥

* * * *

अथ राशिचक्रप्रकरणमुच्यते—

द्विविधं चक्रं स्थिरचक्रं चरचक्रं चेति भूमिस्थम् ।
स्थिरचक्रमाकाशे चरति चरचक्रं चक्रद्वयेन ॥

प्रश्नादौ प्रष्टुः फलं कथयेत् । यदि बहुजने प्रष्टा प्रश्नं पृच्छति चेत् स्थिरेण वदेत् । तद्वदेवान्तर्गृहगतः पृच्छति चेत् स्थिरेण मुष्टिं वदेत् । स्थावरादौ तेनैव स्थिरद्रव्यादौ तेनैव शयितः पृच्छति चेत् तेनैव कर्मावसाने रात्रौ च तेनैव वदेत् । एवमन्यत्रापि स्थिरभावे स्थिरचक्रेण वदेत् ।

End:

अनेन नष्टस्य लाभालाभमुच्यते । क्रूरराशिस्थितमुदयगतं पापग्रहं पापाः पश्यन्ति चेत्तदा लाभो नास्ति । तमेव पापग्रहं शुभो बलवान् पश्यति चेत् तदार्थलाभो भवति । अथवा तस्य प्रतिनिवृत्तिर्वा सिध्यति चिरकालादुदयस्थं शुभग्रहं शुभः पश्यति चेत् तदाचैव लाभो भवति । उदये शुभे बलवत् पापदर्शने नश्यत इति वक्तव्यम् । लाभकालं पूर्वोक्तमेव ।

No. 13927. गौलीपतनाध्यायः.

GAULĪPATANĀDHYĀYAḤ.

Substance, palm-leaf. Size, 6⅝ × 1 inches. Pages, 20. Lines, 5 on a page. Character, Kanarese. Condition, fair. Appearance, old.

Begins on fol. 125*a*. The other works herein are Navagrahacintāmaṇi (Kanarese) 1*a*, Nārāyaṇaśakunāvali 114*a*.

Seems complete.

On the nature of the good or evil indicated by the fall of a lizard on the several limbs of the body or when it ascends or descends the body of a human being.

Beginning:

अथातस्सम्प्रवक्ष्यामि गौलीशाध्यायमुत्तमम् ।
गौल्याश्च पतने वापि आरोहाद्यवरोहणे ॥
शुभाशुभफलं वक्ष्ये सर्वेषां हितकारणम् ।
फलहं शिरसि स्थाने ब्रह्मस्थाने च मृत्युधा(भाक्) ॥

End:

मृत्युर्वधः श्रियश्चैव सुवार्ता विजयः शुभः ।
सन्तापः कलहश्चैव इत्येते गौलिलक्षणम् ॥

No. **13928.** गौलीवचनफलम्.

GAULĪVACANAPHALAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 66*a* of the MS. described under No. 13555.

Complete.

On certain predictions to be made from the direction in which the lizard makes its sound on each of the seven days of the week.

Beginning:

विप्रक्षत्रियविट्छूद्रब्रह्मविप्रान्त्यजातयः ।
वासराधीशवर्णाश्च क्रमात्स्युर्गौलिकाः स्मृताः ॥
अर्कवारादिगौलीनां दशदिक्षु ग्रहस्थितिः ।
अनुसारात् फलं दिक्षु विदिक्षु च समुच्यते ॥
प्राच्यादिदिक्षु सर्वासु तत्तद्वारानुसारतः ।
फलानि च ग्रहाणां च स्थितिरत्र विविच्यते ॥
राहुः केतुर्मङ्गलश्चन्द्रह्री(जा)तो मन्दश्चन्द्रो वाक्पतिर्भार्गवश्च ।
भानुश्चन्द्रो भानुवारे क्रमेण प्राच्याद्यष्टास्वन्तरिक्षे च भूमौ

रविवारफलम्—

दुर्भीतिर्दुष्टवार्ता मृतिरथ कलहः कार्यहानिश्चरा भू-
र्बन्ध्वाप्तिस्साधुभुक्तिः कलितकुशलवाक् भोग्यवस्तूनि वस्त्रम् ।
अर्थाप्तिः पुष्पलाभश्शुभवचनमलं सौरभं वापि चिन्ता
नानाकार्यप्रभूतप्रजय इति फलान्याहुरष्टादशात्र ॥

End:

बन्धुप्राप्तिर्मृत्युवार्तापि च स्याद्युद्धं दुःखस्योक्तिरत्यन्तभाग्यम् ।
एवं रूपं गौलिकायाः फलं स्यात् विज्ञातव्यं सूरिभिस्संप्रदायात् ॥

No. **13929.** गौलीशकुनम्.

GAULĪŚAKUNAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 8666.

Incomplete.

A treatise on omens believed to be indicated by the sound made by the lizard at the time when one starts on a business, etc.

Beginning :

आदित्यो विजयं रणे वितनुते वित्तस्य वृद्धिं चिरा-
द्यातस्यागमनं तुरङ्गमपशुप्राप्तिं प्रयाणे फलम् ।
रोगार्तस्य मृतिं सुतस्य जननं कार्यस्य सिद्धिं चिरात्
सङ्गं चैव परस्परं वितनुते भूतिं च भूयस्तराम् ॥
चन्द्रस्सस्यफलं करोति कलहं कुर्यो . . दुर्गमं
पुत्रीजन्मसमागतं च चरतो वर्षागतस्यागतिम् ।
वित्तं सिद्धमदार्थतां गतिरिति व्यापारसिद्धिं चिरा-
दुद्वाहादिषु सर्वकर्मफलकृद्वीर्यादितः शत्रुणा ॥

End :

केतुर्व्याधिविनाशमल्पविजयं पुत्रोपलब्धिस्तदा
व्याधिस्स्यात्स . . . . गतस्य मरणं नष्टस्य लाभं तथा ।
स्वामी दक्षणतत्फलं समजयं सङ्गं च रोगं वधू-
विस्तारालयविग्रहानतिभयं प्रक्षालनस्याधिकम्(?) ॥

No. 13930. चन्द्रषट्त्रिंशावस्था.

CANDRAṢAṬTRṀŚĀVASTHĀ.

Page, 1. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 13623.

Complete.

On certain predictions to be made with reference to the position of the moon which is found out by means of certain astrological calculations.

Beginning :

चन्द्रषट्त्रिंशावस्थाः—

इष्टराशिगतिर्नाड्यः चतुर्घ्नं तिथिभाजितम् ।
लब्धमिन्दोरवस्था च षड्वर्गफलमीरितम् ॥

शिरोरोगं, १. महाप्रीतिः, २. देवकार्यं, ३. सुखासनं, ४. नेत्ररोगं, ५. सुकर्मो च, ६. नारीक्रीडा, ७. महाज्वरं, ८. सुवर्णभूषणं, ९. वस्त्रं, १०. विषभुक्तं, ११. च सङ्गमम्, १२. कुक्षिरोगं, १३. जलक्रीडा, १४. हसितं, १५. चित्रलेखनं, १६.

End :

सुकर्म ३३. पापकर्मा च ३४. क्रूरकर्मा च ३५. हर्षणम् ३६. ॥
एतानि षंट्त्रिशच्चैव चन्द्रवेला मनीषिभिः ॥

No. 13931. ज्ञानप्रदीपिका.
JÑĀNAPRADĪPIKĀ.

Pages, 59. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 13694.

Breaks off in the 24th Kāṇḍa.

The subjects dealt with in the various Kāṇḍas are :—

१ उपोद्घातकाण्ड.
२. आरूढकाण्ड.
३. धातुकाण्ड.
४. मूलकाण्ड.
५. . . . . . .
६. मनुष्यकाण्ड.
७. चिन्ताकाण्ड.
८. चिन्ताकाण्ड.
९. आरूढकाण्ड.
१०. उदयकाण्ड.
११. नष्टकाण्ड.
१२. लाभकाण्ड.
१३. रोगकाण्ड.
१४. रोगकाण्ड.
१५ भोजनकाण्ड.
१६. स्वप्नकाण्ड.
१७. निमित्तकाण्ड.
१८. विवाहकाण्ड.
१९. कामकाण्ड.
२०. गर्भकाण्ड.
२१. पुरुषकाण्ड.
२२. सुतारिष्टकाण्ड.
२३. क्षुरिकाकाण्ड.

Same work as that described under R. No. 981(*g*) of the Triennial Catalogue of MSS., Vol. II, Part I-A, wherein see for the beginning.

End :

इति क्षुरिकाकाण्डस्त्रयोविंशतिः ।
शल्यप्रश्ने तु तत्काले पादच्छायानुनेत्रयेत् ।
अर्कभारतस्य . . . . . वशेषाणां फलमेव च ॥
कपाल इष्टका लोष्टकाष्टादैवतभूतयः ।
गवाङ्गशशधान्यानि धनपाषाणदुर्धराः ॥
गोष्टे श्वा च पिशाचश्च राजशल्यानि षोडश ।
एषु शल्येषु मन्दूढस्वर्णं गोस्थे च धान्यकम् (?) ॥

* * * *

शुक्रेन्दुजीवसौम्यास्तु केन्द्रस्थानगता यदि ।
तत्रैव पश्यते शल्यं सितामात्रं वदेत्सुधीः ।
केन्द्रे बुधेन्दुसंयुक्ते बुधनक्षत्रकोष्ठके ।
स्वशल्यं विध्यते तत्र केन्द्रशुक्रेन्दुसंयुते ॥

No. 13932. ज्ञानप्रदीपिका.
JÑĀNAPRADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 37. Lines, 7 on a page. Character, Grantha. Condition, very much injured. Appearance, new.

Begins on fol. 25*a*. The other work herein is Jyautiṣaviṣaya 1*a*.

Contains the following Kāṇḍas, the last of which is incomplete :—

१. उपोद्घातकाण्ड.	१०. छत्रकाण्ड.
२. आरूढकाण्ड.	११. चिन्ताकाण्ड.
३. मूलकाण्ड.	१२. नष्टकाण्ड.
४. पञ्चभूतकाण्ड.	१३. लाभकाण्ड.
५. चिन्ताकाण्ड.	१४. रोगकाण्ड.
६. मनुष्यकाण्ड.	१५. मरणकाण्ड.
७. चिन्ताकाण्ड.	१६. भोजनकाण्ड.
८. धातुचिन्ताकाण्ड.	१७. स्वप्नकाण्ड.
९. आरूढकाण्ड.	१८. निमित्तकाण्ड.

Same work as the above.

No. 13933. ज्ञानप्रदीपिका.
JÑĀNAPRADĪPIKĀ.

Pages, 16. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13699.

Contains the Upōdghāta (incomplete), Naṣṭakāṇḍa (wants the beginning), Udayakāṇḍa, Bhōjanapraśna, Svapnapraśna and Cintāpraśna.

Same work as the above.

No. 13934. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 12. Lines, 6 on a page.
Begins on fol. 6*a* of the MS. described under No. 11335.
Incomplete.
On the divination of certain things as based on the time when the questions are put to the astrologer.
The last five pages contain also meaning in Tamil.

Beginning:

कन्या च कार्मुकं मीनं मिथुनं गर्भराशयः ।
तुला च मृगकर्की च मेषश्च द्वारराशयः ॥
वृषवृश्चिकसिंहाश्च घटो वा बाह्यराशयः ।
आगमिष्यते बाह्ये तु द्वारराशौ तु गमिष्यति ॥
गर्भे तिष्ठति तत्रैव सुखी भवति निश्चयः ।
गर्भभे जीवचिन्ता च बाह्यभे मूलकं स्मृतम् ॥

End:

मासादक्षिरथाङ्गजातपवनं सूर्योदयनाडीं शुभां
सङ्ग्रामव्यवहारमैथुनभयस्नानाङ्गभङ्गादिषु ।
नाडिन्यः शशिनः शुभेव गमनाळङ्कारपा . . . .
क्षेत्राद्येषु यदंशवायुचलनम्.

No. 13935. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 22. Lines, 6 on a page.
Begins on fol. 66*a* of the MS. described under No. 13561.
Incomplete.
Similar to the above.

Beginning:

अर्कः पञ्चदिनं शशी त्रिघटिका भौमोऽष्ट मे वासराः
सप्ताहं भृगुजश्च सोमतनयो मासद्वयं मे गुरुः ।
षण्मासं कुरुते च सूर्यतनयो राहुस्त्रिमासं तथा
केतुश्चैव तथा भवन्ति सततं गन्तव्यराशेः फलम् ॥
दिनकरकुलि(सु)तौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ ।
हिमकररविजौ विनिर्गमे स्याच्छशितनयः फलितस्तु सार्वकालम् ॥

शूद्रे मन्दबलं नृपस्य भुविजो विप्रस्य देवो गुरुः
नानाजाति शशी बुधश्च वणिजामर्कस्य(श्च) गोपालकम् ।
स्त्रीणां शुक्रबलं वदन्ति मुनयो जारस्य केतुर्बलं
राहुश्चोरबलं प्रधानफलदं चोद्वाहभानुर्गुरुम् ॥
अजवृषभचापकन्यकाद्ये भुजङ्गो झषमकरकुलीरवृश्चिकान्ते वराहः ।
तुलमिथुनघटसिंहे मध्यदेशेषु गृध्रस्सकलमुनिमहष्टः सर्वकार्येषु नष्टः ॥

षट्त्रिदशस्थो भानुः षड्दशत्रिजन्मसु सशांशुः । गुरुरुद्राद्रिद्विपञ्चमे नवमे शुभफलदाः ।

End :

राहुर्जन्मगतो भयं च कलहं सौभाग्यमानक्षयं
वित्तभ्रंशमहत्सुखं रिपुभयं चार्थक्षयं यच्छति ।
सन्तापं मरणं च वित्तमधिकं शीघ्रं विनाशं नृणां
केतुः स्थः फलमेव राशिमाखिलं शंसन्ति गार्ग्यादयः ॥

* * * *

वायुश्चन्द्रोपरागोत्थपीडामत्र व्यपोहतु ॥
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ।
चन्द्रोपरागकलुषं विनाशय घनाधिप ॥

No. 13936. ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Substance, palm-leaf. Size, 13 × 1⅛ inches. Pages, 4. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 10*a*. The other works herein are Ulūkaśyēnakapōtagrahapravēśaśānti 4, Jyautiṣaviṣaya 5*a*, Gaurīpañcāṅga 9*a*.

Incomplete.

Deals with the casting of a horoscope in cases where the moment of birth is not known, by means of certain astrological calculations. At the end there are two pages in Telugu.

Beginning :

आरूढराश्या[त्] उदयात्रिगुणं नक्षत्रहत्या परिहृत्य शषम् ।
अश्व्यादिमूलादिमखादिभानां तज्जन्मनक्षत्रमिति ब्रुवन्ति ॥

वृश्चिकस्य भवेल्लग्नं चतुर्घ्नं नाडिकायुतम् ।
चरेषु पञ्चसंयुक्तं स्थिरेषु दशसंयुतम् ॥

End:

श्रेणीप्रश्नाक्षराणां तदपि च गुणितं अ(चा)न्त्यवर्गेण युक्ता
दन्तोष्ठान् लोकपालान् रविधृतिमुनिभिर्विंशतिर्मूर्छनाभिः ।
वर्षान्मासर्तुपक्षा तिथिरुडुभवनावारराशिक्रमेण
लब्धं तु तत्र पूर्वं तदपि च गुणिते जातके नष्टसंज्ञाः (?) ॥

No. 13937. दिव्यचूडामणिः (केरलप्रश्नः).

DIVYACŪḌĀMAṆIḤ (KĒRALAPRAŚNAḤ.)

Substance, paper. Size, 9½ × 4¼ inches. Pages, 18. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new. Begins on fol. 1*a*. The other work herein is Mānasōllāsa 9*a*. Complete.

A treatise on divination presumably based on the astrological system obtaining in the Kērala country.

It is stated in the end that this MS. was lithographed at Benares in Saṁvat 1731.

Beginning:

साक्षात्त्रैलोक्यबोधाय प्रश्नकेरलभाषितम् ।
त्रिकालविषयं प्रोक्तं तस्मै केरलये नमः ॥
ज्ञानदीपकमासाद्य वर्तिं कृत्वा सदक्षरैः ।
स्वरस्नेहेन संयोज्य ज्वलयेदुत्तरेन्धनैः ॥
यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्राप्तिम् ।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥
लोकस्यैव हितार्थाय दिव्यचूडामणिर्मया ।
वक्ष्यते विबुधार्थानां शृणु त्वं स्थिरचेतसा ॥
चित्ते यत्नं धातुबद्धं शरीरं नष्टे चित्ते धातवो यान्ति नाशम् ।
तस्माच्चित्तं यत्नतो रक्षणीयं स्वस्थे चित्ते बुद्धयस्सम्भवन्ति ॥
नैतद्देयं दुर्विनीताय जातु ज्ञानं गुप्तं तद्धि सम्यक्फलाय ।
अस्थाने हि स्थाप्यमानेव वाचां देवी कोपान्निर्दहेन्नो चिराय ॥

विनयावनताय दीयमाना प्रभवेत्कल्पलतेव सत्फलाय ।
उपकृत्यनुचिन्तकानि शास्त्राण्युपरस्यपदं हि साधुरेव ॥
अनर्थे चाप्यविश्वासे चानाशे फलवर्जिते ।
भक्त्या विवर्जिते जीवे न च (तत्) फलति शास्त्रकम् ॥

अथ प्रश्नं वक्ष्ये—

पृच्छकस्य वाक्याक्षराणि अकारादिस्वरसंयुक्तानि ग्राह्याणि । यदि चेदक्षराणि अधिकानि भवन्ति तदा ब्राह्मणप्रश्ने ब्राह्मणं प्रति वदेत्त्वं श्वेतपुष्पाणां मध्ये किमपि पुष्पं कथय । क्षत्रियं प्रति वदेत्त्वं स्त्रीसंज्ञिका या नद्यस्सन्ति तासां मध्ये कामपि नदीं कथय । वैश्यं प्रति वदेत् त्वं देवालये देवाः सन्ति तेषां मध्ये कमपि देवं वद ।

* * * *

अथ जीवधातुमूलज्ञाननष्टद्रव्यस्थानबन्धमोक्षणजीवितमरणजयपराजयलाभालाभगमनागमनत्रिकालज्ञानप्रश्नान् प्रकाशयतीदं शास्त्रं नान्यथा ।

ऊर्ध्वदृष्ट्या भवेज्जीवः अधोदृष्ट्या च मूलकम् ।
समदृष्ट्या भवेद्धातुर्मूलदेवेन भाषितम् ॥

End:

पिण्डद्वादशभागशेषेणैकेन फाल्गुनम् । द्वाभ्यां चैत्रः त्रिभिः कार्तिकः । चतुर्भिर्मार्गशीर्षः । पञ्चभिः पौषः षड्भिर्माघः । सप्तभिर्वैशाखः । अष्टभिर्ज्येष्ठः । नवभिराषाढः । दशभिः श्रावणः एकादशभिः भाद्रपदः । द्वादशभिर्माघः । इदानीं लग्नं पिण्डस्य द्वादशभागः । एकेन मेषः । द्वाभ्यां वृषः त्रिभिर्मिथुनः । चतुर्भिः कर्कः । पञ्चभिः सिंहः । षड्भिः कन्या । सप्तभिस्तुला । अष्टभिर्वृश्चिकः । नवभिर्धनुः । दशभिर्मकरः । एकादशभिः कुम्भः । द्वादशभिर्मीनः ॥

Colophon:

इति केरलप्रश्नं समाप्तम् ।

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ।
काशीसंस्कृतमुद्रायामङ्कितोऽयं शिलाक्षरैः ॥

मार्गशीर्षकृष्णभृगुवासरे समाप्तोऽयं ग्रन्थः ॥ संवत्सर 1731 गणेशपन्तेन लिखितम् ॥

No. 13938. नरपतिजयचर्या, आन्ध्रटीकासहितः.

NARAPATIJAYACARYĀ WITH TELUGU MEANING.

Pages, 91. Lines, 7 on a page.

Begins on fol. 108*a* of the MS. described under No. 13490.

Contains 1 to 4 Adhyāyas.

Same work as that described under No. 40 of M. Seshagiri Śāstri's Report No. 2, pages 244 to 246, with introductory stanzas in the beginning.

Beginning:

श्रीशारदाविष्णुविनायकं च ब्रह्माणमीशं वृहसुन्दरं च ।
नत्वान्ध्रभाषां प्रकरोति धेकां दैवज्ञतानो जयचर्यमाख्यम् (?) ॥
मत्स्यान्वयस्समेधूत(समुद्भूत)स्सिंहाख्यः सिंहाविक्रमः ।
तस्य देशपिता धेका जयचर्याश्च संज्ञके (?) ॥

No. 13939. नरपतिजयचर्या.

NARAPATIJAYACARYĀ.

Pages, 5. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 2398.

Contains 50 stanzas in the second Adhyāya.

Same work as the above.

No. 13940. नारायणशकुनावलिः.

NĀRĀYAṆAŚAKUNĀVALIḤ.

Substance, paper. Size, 8¾ × 5½ inches. Pages, 16. Lines, 9 on a page. Character, Telugu and Grantha. Condition, good. Appearance, new.

Begins on fol. 39*a*. The other work herein is Svarāvadhāna 1*a*.

Complete; as found in the Skāndapurāṇa.

On the divination of certain events by knowing the combination of the letters obtained by casting three times a piece of Tulasī stick which is engraved in its four sides with the four syllables comprising the word Nārāyaṇa. The work is said to have been based on the teachings of Jñānadēva.

Beginning:

अथातः संप्रवक्ष्यामि प्रश्नानां शकुनावलिम् ।
ज्ञानदेवेन कथिता या स्वयं भक्तसंनिधौ ॥
तुलसीकाष्ठजं पादचतुष्कोणेषु चिह्नितम् ।
नारायणेति वर्णैश्च कृत्वा भूमौ विनिक्षिपेत् ॥

हरिं संपूज्य विधिवत् त्रिवारं निक्षिपेत् क्षितौ ।
शुभं वाप्यशुभं वापि फलं कर्मानुसारतः ॥
संसूचयति तन्नूनं नात्र कार्या विचारणा ।
संशयं कुरुते यस्तु ब्रह्मघ्नोऽसौ न संशयः ॥

प्रथमाङ्क——नानाना ।

त्वया विचिन्तितं चित्ते कार्यं मानव तत्र च ।
ईश्वरः सानुकूलोऽस्ति कार्यसिद्धिर्भविष्यति ॥

End:

णराण । आयासेन विना सर्वं निधिं यास्यसि सिद्धिदम् ।
कृपया वासुदेवस्य चिन्ता नैव कदाचन ॥

Colophon:

इति चतुर्थाङ्कः समाप्तः ॥ इति स्कान्दपुराणे ज्ञानदेवयोगीश्वरप्रोक्त-नारायणशकुनावलिः समाप्ता ॥

No. 13941. नारायणशकुनावलिः.
NĀRĀYAṆAŚAKUNĀVALIḤ.

Pages, 22. Lines, 5 on a page.

Begins on fol. 114*a* of the MS. described under No. 13927.
Complete, but wants the beginning.
Similar to the above.

Beginning:

संमते त्वयि विश्वेशश्चक्षुषा वीक्ष्यते स्वयम् ।
तेन ते सर्वकार्याणि भविष्यन्ति न संशयः ॥
त्वया यच्चिन्तितं चित्ते कार्यं निष्फलमेव तत् ।
ईश्वरो नानुकूलोऽस्ति वृथा क्लेशो भविष्यति ॥

End:

आयासेन विना सर्वं सिद्धिं यास्यसि चिन्तितम् ।
कृपया वासुदेवस्य चिन्ता नैव कदाचन ॥

Colophon:

इति तुरीयप्रकरणं समाप्तम् ॥

No. 13942. पञ्चपक्षिशकुनम्, आन्ध्रटीकासहितम्.
PAÑCAPAKṢIŚAKUNAM WITH TELUGU MEANING.

Pages, 7. Lines, 25 on a page.

Begins on fol. 114*a* of the MS. described under No. 5764.

Complete.

Similar to the work described under R. No. 164(*b*) of the Triennial Catalogue of MSS., Vol. II, Part 2, Tamil.

Beginning :

लकारे चात्र माहेयः यकारे चन्द्रचन्द्रजौ ।
उकारे च भवेज्जीवं यो भृगोर्वै शनैश्चरः(?) ॥
* * * *
मन्दचन्द्रमयूरश्च भानुर्भौमे च कुक्कुटः ।
बुधकाकमि(केति)शीघ्रोक्ताः पिङ्गलगुरुरेव हि(?) ॥
भृगुश्येनमिति प्रोक्ताः पक्षिणां दिवसाः क्रमात् ।
* * * *
भोजनं गमनं राज्यं निद्रा मरणमेव च ॥
* * * *
नमस्तुभ्यं महादेव गुरुशास्त्रविशारद[म्] ।
भविष्येदं महादेवं वक्ष्येऽहं पञ्चपक्षिण(णा)म् ॥
* * * *
आरूढप्रश्नलग्नेन प्रथमाक्षरतोऽपि वा ।
ज्ञातव्यं च प्रयत्नेन खगानां बुद्धिमत्तरैः ॥
* * * *
तंत्रणाथ कर्षेण कामरादिं च विन्यसेत् ।
प्रत्येकमेव वर्णाद्यः पञ्चपक्षिषु कारयेत्(?) ॥

End :

चतुष्पात् पिङ्गलो भूयात् द्विपादौ श्येनवायसौ ।
ताम्रचूडस्तथा शृङ्गी शिखण्डी पक्षिचिह्नगः(?) ॥

Colophon :

इति पञ्चपक्षिशकुनं सम्पूर्णम् ॥

No. 13943. पञ्चपक्षिशकुनम्.
PAÑCAPAKṢIŚAKUNAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 11835.

Complete.
Slightly different from the above.

Beginning :

अभिवन्द्य महादेवं सर्वशास्त्रविशारदम् ।
भविष्यद्भूतमाव्यर्थान् वक्ष्येऽहं पञ्चपक्षिषु ॥
अनेकशास्त्रसारेण लोके कालत्रयावधि ।
शकुनानां प्रमागत्य(।) दूतयुद्धं जयाजयम् ॥
आगतं पृच्छकं दृष्ट्वा दैवज्ञस्सावगाहनः (धानतः) ।
येये(यद्यत्) करोति कर्माणि तस्मात्सर्वं विचारयेत् ॥
अक्षरं पक्षिरूपं च दिग्देवता दिनानि च ।
कालो वर्णबलं मैत्रं धातुलिङ्गादयः क्रमात् ॥
आरूढप्रश्नलग्नाद्वा प्रथमाक्षरतोऽपि वा ।
ज्ञातव्यं चेष्टयश्चेति खगानां बुद्धिविस्तरैः ॥

End :

अजीर्णस्य विचारं च उपवासं विषूचिक(म्) ।
ज्वरभोगकफरोगं मृतपक्षि विचारयेत् ॥
श्येनो योजनकुब्जस्तु त्रिपादं वायसस्तथा ।
अर्धपादस्ताम्रचूडः पादखण्डस्समीपतः ॥
अन्त्यादिक्रमशुक्लेऽह्नि द्वितीयादिक्रमो निशि ।
तृतीयादिक्रमः कृष्णे चतुर्थाद्यास्तु तन्निशि ॥

Colophon :

सम्पूर्णम् ॥

No. 13944. पञ्चपक्षिशकुनम्, आन्ध्रटीकासहितम्.
PAÑCAPAKṢIŚAKUNAM WITH TELUGU MEANING.

Pages, 24. Lines, 5 on a page.

Begins on fol. 17*a* and 28*a* of the MS. described under No. 13700.
Incomplete.
Same work as the above, but with slight difference and in duplicate.

No. 13945. पञ्चपक्षिशकुनम् , आन्ध्रटीकासहितम्.
PAÑCAPAKṢIŚAKUNAM WITH TELUGU MEANING.

Pages, 5. Lines, 9 on a page.
Begins on fol. 61*b* of the MS. described under No. 13618.
Complete.
Same work as the above.

No. 13946. पञ्चपक्षिशकुनम्.
PAÑCAPAKṢIŚAKUNAM.

Substance, paper. Size, 7½ × 4 inches. Pages, 7. **Lines, 15 on a page.**
Character, Telugu. Condition, good. Appearance, old.

Complete. At the end there is a table of Lagnagrahātṣaṣṭhyaṁśa.
Similar to the above : said to have been taught by God Mahādēva.

Beginning :

अभिगम्य महादेवं सर्वशास्त्रविशारदम् ।
भविष्यदर्थबोधाय पप्रच्छुर्मुनयो मुदा ॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः ।
त्रिकालज्ञानबोधार्थं पञ्चपक्षी प्रकाश्यते ॥
अनेन(क) शास्त्रसारेण लोकैः कालत्रयम्प्रति ।
बलाबलानि दृश्यन्ते सर्वकार्येषु निश्चितम् ॥
आगतं पृच्छकं दृष्ट्वा दैवज्ञस्सावधानतः ।
यद्यत्करोति कर्माणि तस्मात्सर्वं विचारयेत् ॥
अक्षरं पक्षिभूतश्च दिग्दैवतदिनानि च ।
कालं वर्णं बलं मित्रं धातुलिङ्गादिकं क्रमात् ॥
प्रश्नादिजातिवर्णं च देहसञ्चलनादिभिः ।
चिन्तितान्यपि सर्वाणि वक्ष्यन्ते वर्णकैः क्रमात् ॥
*　　*　　*　　*
पृच्छकस्य वचः श्रुत्वा ग्राह्यो वर्णस्वरस्तथा ।
स्वरेण कल्पयेद्वारं वारात्पक्षः प्रजायते ॥

End :

आदित्यभौमयोः श्येनः पिङ्गलश्चन्द्रचन्द्रभे ॥
वायसो देवपूज्ये च कुक्कुटो भार्गवेऽपि च ।
मयूरस्सूर्यपुत्रे च शुक्लपक्षक्रमादिति ॥

अथ वाक्यानि—

अवान्तरे भोगो । करिपुरं एकोनविष्णुः । उपेन्द्रो हरिः । विष्णुस्ते लोकः । अथ रात्रिवाक्यानि—अनुमोदिते । उमोदितेन । मोदितेनउ । दितेनउमो । तेनउमोदि ।

इत्युक्तं पक्षिणां भोगं लाभालाभं शुभाशुभम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावद्गर्जन्ति शास्त्रेण शकुनानामनेकशः ।
यावन्न लक्ष्यते पक्षिशकुनं शङ्करोदितम् ॥

Colophon:

इति श्रीमहादेवविरचितं पञ्चपक्षिशकुनं समाप्तम् ॥

No. 13947. पञ्चपक्षिशकुनम्.
PAÑCAPAKṢIŚAKUNAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 7. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Praśnāmṛta 5*a*.
Incomplete.
Similar to the above.

Beginning:

अकारः श्येन आख्यातः इकारः पिङ्गलस्तथा ।
उकारो वायसः प्रोक्तः एकारस्ताम्रशेखरः ॥
ओकारो नीलकण्ठश्च स्वराणां पक्षिणः क्रमात् ॥

शुक्लपक्ष वारपक्षी—

श्येनोऽर्कभौमा(वृ)षिरब्जसौम्ये काको गुरुः कुक्कुटको भृगुश्च ।
मन्दो मयूरस्तपनादयश्च भुक्तौ च षट्षट् घटिकास्तु शुक्ले ॥

पक्षिक्रमम्—

श्येनो भुक्तस्तथा कुब्जः पन्थाः काको जनेश्वरः ।
ताम्रचूडस्तथा सुप्तो मयूरो मरणं गतः ॥

End:

भुक्तौ सद्यः फलं द्रव्यं राज्ये तु चिरकालतः ।
वार्तामात्रं तु गमने मृतौ सुप्तौ भवेत् क्षयः ॥

श्येनो खेलङ्गशः काको नारदस्सारसश्शिखी ।
अकारादिक्रमेणैव स्वराणां पक्षिणादिभिः (?) ॥

No. 13948. पिङ्गलामतसङ्ग्रहः, कर्णाटकटीकासहितः.
PIṄGALĀMATASAṄGRAHAḤ WITH KANARESE MEANING.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 66. Lines, 6 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Incomplete.

Deals with the following topics :—

स्वराधिकार.	विवाहप्रकरण.
सङ्ग्रामाधिकार.	विवाहाद्यष्टगर्भाधिकार.
गमनाधिकार.	व्याधिप्रकरण.
द्यूतादिप्रकरण.	शङ्कितलब्धिशङ्कितप्रक्षेपलोभाधिकार.
तस्करयात्रा.	
नष्टान्वेषणयात्रा.	सस्यकोधि.

A treatise on prognostication made by observing the sound, the movements, etc., of certain birds. The work is also called in the colophon Rēcirājīya.

Beginning:

सायाह्ने पार्थिवं श्रुत्वा आप्यां वायव्यमेव च ।
करोत्यर्थस्य संसिद्धिः प्रोक्ता वा . . . . . ॥

* * * *

सायाह्ने शिवनामान्यं सर्वथा फलसाधनम् ।
अयमेव पुनः प्रोक्तं वि . . . . ॥

* * * *

अपराह्णे यदा जीवः प्रातर्जीवस्तु जायते ।
कुर्याद्भवति तत्रैव तत्फलं समुदाहृतम् ॥

* * * *

सायं सती यदा जाता प्रातर्निशि स्वरोदया ।
फलं च न भवेत्तत्र आशामात्रफलप्रदा ॥

* * * *

सायं मौनिस्खगो यत्र उपरोधस्सदा सदाशजः ।
निस्सन्दिग्धफलं तत्र जायते नात्र संशयः ॥

* * * *

Colophon :

इति रेचिराजीये पिङ्गलामतसङ्ग्रहे स्वराधिकारं नवमः ॥

End :

आरोहणमहिभागा वीक्षणं देहजृम्भणम् ।
अर्घस्य अधिमाचष्टे अधः कण्डूयनादपि ॥

* * * *

आरोहणं ततो भागा प्रेक्षणादपि वर्धते ।
क्षीयते च ततोऽप्यस्य सुस्वरादिषु वर्धते ॥
मुदितेऽस्मिन् दया नास्ति नश्वरे खरगेहयोः ।
दुर्भिक्षमस्तवत्कुम्भं शुभाशुभपरीक्षणम् ॥

No. 13949. प्रश्नग्रहरत्नमालिका.

PRAŚNAGRAHARATNAMĀLIKĀ.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 72. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new. Begins on fol. 1*a*. The other work herein is Praśnaviṣaya 37*a*. Complete.

A work in divination dealing with the undermentioned topics: by Varadācārya, son of Vēṅkaṭācārya and disciple of Śrīnīvāsaguru who is spoken of as having received knowledge through the grace of the teacher that was born as an incarnation of the bell on the Vṛṣagiri (Vēdāntadēśika). The author salutes the teachers residing in Mahīsāra (Tirumaliśai ?).

१. जीवकाण्ड.
२. मनुष्यकाण्ड.
३. मृतिकाल.
४. भुक्तिप्रश्न.
५. स्वप्नप्रश्न.
६. गर्भप्रश्न.
७. प्रसवकालोपाय.
८. क्षुरिकाप्रश्न.

Beginning :

वागीशानस्मदाचार्यान्नत्वा भूसारवासिनः ।
प्रश्नशास्त्रपयोराशेरुद्धृता रत्नमालिका ॥
. . . . लितैश्चाङ्कितं शिरः ।
दृष्टाश्च लीलाश्रीजानेः प्राप्या यत्त्वरते मनः ॥
तथापि कौतुकादेषा न्यस्ता श्रीशपदाब्ज(योः) ।
. . . . हृद्यां विदुषां कण्ठभूषणम् ॥

स्वर्क्षोच्चमित्रनीचर्क्षशत्रुक्षेत्राणि पञ्चधा ।
लग्नं चतुर्थकेन्द्रं च सप्तमं केन्द्रमेव च ॥
. . . . चतुष्केन्द्रमुदाहृतम् ।
आरूढमुदयं छत्रं स्त्रीपुम्भेदांस्तथैव च ॥
द्विपदादिप्रभेदांश्च धातुमूलादिकं तथा ।
परीक्ष्य कथयेत्सम्यग्ग्रहाणां च बलाबलम् ॥
मेषवृश्चिकयोरीश अङ्गारक उदाहृतः ।
तुलावृषभयोश्शुक्रः कन्यामिथुनयोर्बुधः ॥
कर्कटस्य निशानाथस्सिंहस्य रविरीश्वरः ।
चापपाठीनयोर्मन्त्री शनिर्मकरकुम्भयोः ॥
मेषो वृषो मृगः कन्या कर्किमीनतुलाधराः ।
रव्यादीनां क्रमेणैव कथितास्तुङ्गराशयः ॥
स्वोच्चात्तु सप्तमं राशिं नीचमाहुर्विपश्चितः ।

* * * *

Colophon :

देशिकानां महीसारपुरे लक्ष्म्या विराजिताम् ।
शासनाद्रत्नमालायां रचितः प्रथमस्वरः ॥

End :

एकस्वरे भयं चैव द्वितीये फलमुत्तमम् ।
तृतीये गमनं चैव चतुर्थे . . . . मः ॥
पञ्चमे च विवादस्स्यात् षष्ठे कलहमेव च ।
सप्तमे राजसम्मानमष्टमे मरणं ध्रुवम् ॥

Colophon :

इति प्रश्नरत्नमालिकायां . . . . सम्पूर्णम् ॥

श्रीशपदाम्बुजयुगलीतुलसीदलगन्धबन्धुसखबन्धा ।
भूषयतु कण्ठदेशं विदुषां ग्रहरत्नमालिकाभिनवा ॥

Colophon :

इति श्रीवृषगिरिनाथघण्टावतारगुरुप्रसादलब्धसमस्तविद्यासाम्राज्यविभवस्य श्रीनिवासगुरोरन्तेवासिना वेङ्कटाचार्यपुत्रेण वरद . . . रचिता ग्रहरत्नमालिका नाम त्रयोदशी कृतिः ॥

No. 13950. प्रश्नफलप्राप्तिकालनिर्णयः.
PRAŚNAPHALAPRĀPTIKĀLANIRṆAYAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 13606.

Complete.

Deals with the duration of the time which should elapse before certain events, which have been predicted by an astrologer on being questioned about them, actually happen. The treatise is said to have been written by a disciple of Kṛṣṇācārya through his grace.

Beginning:

कृष्णाचार्यमतं सम्यक् पर्यालोच्य पुनः पुनः ।
प्रष्टुः प्रश्नानुसारेण फलं वाच्यं विपश्चिता ॥
अथ प्रश्नफलप्राप्तेः कथ्यते कालनिर्णयः ।
यो ग्रहो यस्य योगस्य कर्ता लग्नात्स यावती ॥
तावन्तो वत्सरा मासाः दिवसा वा यथोचितम् ।
यदि पृच्छेत्फलप्राप्तिं कतिभिर्वत्सरैरिति ॥
वत्सरैरेव तद्ब्रूयादेवं मासदिनादिभिः ।
अथ वर्षफलं पृच्छेत् मासस्याऽथ दिनस्य वा ॥

End:

यावन्तः किल तावन्तः वर्षमासदिनादयः ।
नष्टजातकमार्गेण ग्रहचारेण वा क्वचित् ॥
दशायाश्च यथायोग्यं संवादात्फलमीरयेत् ।
अंशानपि ततः पृच्छेत् नात्र कार्या विचारणा ॥
कृष्णाचार्यस्य शिष्येण होराणामुपपादिता ।
कृष्णाचार्यप्रसादेन प्रसादाच्च विवस्वतः ॥
कृष्णाचार्योपदिष्टार्थः येषां मनसि वर्तते ।
अव्याहतमतिस्तेषां फलभागे प्रवर्तते ॥

No. 13951. प्रश्नफलनिर्णयः.
PRAŚNAPHALANIRṆAYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 37*a* of the MS. described under No. 9537.

Incomplete.

Similar to the above; the concluding stanzas deal with 'Pañcakam'.

Beginning:

स्वदशां स्वदशैर्हन्यात् दशस्थानादिमासकम् ।
एकस्थानत्रिभिर्गुण्यमन्तर्दश यथाक्रमम् ॥
अन्तर्दशादिनान् कृत्वा परमायुर्विभाजितम् ।
लब्धं महादशैर्हन्यात् विदशानां यथाक्रमः ॥
दिनश्च वारऋक्षाणि तिथिर्यामक्रमेव च ।
राशिं कृत्वा विजानीयादष्टभागाः प्रकीर्तिताः ॥
न दृश्यते द्विरष्टेन्दुचतुर्षष्टित्रिदृश्यते ।
दूरवार्ताप्रसक्ते तु पञ्चकेक्षत्वतक्षणात् (?) ॥
शिरो रविर्मुखे चन्द्रः हृदि भौमकटुर्बुधः ।
करौ गुरौ सिते पृष्ठे शनिपादप्रयोजनम् ॥
भानुना नैव सिद्धिश्च सोमे सिद्धिर्न संशयः ।

End:

एको मृत्युर्द्वयोर्वह्निश्चत्वारो नृपतिस्तथा ।
षट्चोर वसुरोगाश्च पञ्चकं तानि वर्जयेत् ॥
रोगं चोरं त्यजेद्रात्रौ दिवा राजाग्निमेव च ।
अहोरात्रं त्यजेन्मृत्युः पञ्चकं तानि वर्जयेत ॥

No. 13952. प्रश्नमणिदर्पणम्, आन्ध्रटीकासहितम्.

PRASNAMANIDARPANAM WITH TELUGU MEANING.

Pages, 23. Lines, 4 on a page.

Begins on fol. 75*a* of the MS. described under No. 6470.

Complete.

A treatise setting forth the method of predicting certain events by means of the knowledge derived from the existence of certain astrological circumstances.

Beginning:

दिवाकरं नमस्कृत्य वक्ष्येऽहं मणिदर्पणम् ।
होरातन्त्रविबोधार्थं परहृद्यप्रदर्शनम् ॥

* * * *

आदौ लग्नविवेकेन दिग्ग्रहेण द्वितीयकम् ।
प्रहरेण तृतीयेन चतुर्थे वापि खेचरैः ॥

* * * *

मेषादिमीनपर्यन्तं प्राच्यादिपरिवेष्टितम् ।

* * * *

ईशादिमेषराशिस्थे विंशोत्तरशतं ध्रुवम् ॥

* * * *

प्रश्नकालोदये लग्ने नवांशपतयः क्रमात् ।
बलानस्तोदया(न्) पश्च पश्यन्तौ कुजभास्करौ ॥

* * * *

धातुचिन्तां वदेद्धीमान् नवमं पश्चमं तथा ।
द्वितीयं च तृतीयं च यदि पश्यति भास्करः ॥

End :

रहस्यमेतदासेस्मिन्? प्रयत्नेनैव शोधयेत् ।
पुरन्दरं च जीवेन कथितः प्रश्नसङ्ग्रहः ॥
राशीषु लग्नजो यस्तु तत्कालच्छायः? ।
सप्तोद्धतविशेषन्तु गुणकैर्गुणयेत्ततः ॥
बालप्रकृति मन्वङ्करत्रिक सूरिभिः (?) ।
पुनस्सप्त विभक्तेऽस्मिन् ग्रहैः फलसमन्वितम् ॥

* * *

Colophon :

इति श्रीमणिदर्पणं सम्पूर्णम् ॥

No. 13953. प्रश्नमहोदधिः.
PRAŚNAMAHŌDADHIḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 119*a* of the MS. described under No. 6470.

Contains the Adhyāyas 1 to 7 complete, the topics dealt with therein being as follow :—

१. सङ्क्षेपहोरा.
२. गमागमः.
३. जयापजयः.
४. शुभाशुभलक्षणम्.
५. प्रवासाचिन्ता.
६. नष्टप्राप्ति.
७. प्रकीर्णकाध्याय.

Same text as that described under R. No. 1288(*b*) of the Triennial Catalogue of MSS., Vol. II, Part I-A, but the first two stanzas are different. The work is also called Ṣaṭpañcāśaddhōrā or Ṣaṭpañcāśikā or Cappana.

Beginning :

प्रणम्य लोककर्तारं नारायणं जगत्प्रभुम् ।
वक्ष्यामि पृच्छकफलं सङ्क्षेपेण समुच्चयम् ।
च्युतिर्विलग्नाद्धिबुकाच्च वृद्धिः मध्यप्रवासोऽस्तमयस्य वृत्तिः ।
वाच्यं ग्रहप्रश्नविलग्नकाले ग्रहे प्रविष्टो हिबुके प्रवासी ॥
यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्पश्यतस्साभिवृद्धिः ।
पापैरेवं तस्य भावस्य हानिः निर्देष्टव्या पृच्छतो जन्मतो वा ॥
सौम्यैर्विलग्ने यदि वा स्ववर्गे शीर्षोदये सिद्धिमुपैति कार्यम् ।
अतो विपर्यस्तमसिद्धिहेतुः कृच्छ्रेण संसिद्धिकरं विमिश्रम् ॥

End :

अस्ते रविशितवक्रः परजायां स्वां गुरौ वेश्याम् ।
चन्द्रे चैवं सौरे तथान्त्यजात्यां वयश्शशिवत् ॥
मन्दपापनवमे(सप्तम) तो लग्नान्नवमे शुभैरयुतदृष्टाः ।
रोगार्तः परदेशे चाष्टमगे मृत्युमाप्नोति ॥
सौम्ययुतोऽर्कस्सौम्यैस्सन्दृष्टश्चाष्टमर्क्षसंस्थश्च ।
तस्माद्देशादन्यं गतो न वाच्यः पिता तस्य ॥
अंशपात् ज्ञायते द्रव्यं द्रेक्काणैस्तस्कराः स्मृताः ।
शशिभ्यः कालदिग्देशा द्वयोर्जातिश्च लग्नपात ॥

Colophon :

इति षट्पञ्चाशद्धोरायां प्रकीर्णकाध्यायस्सप्तमः ॥ चप्पन्नं सम्पूर्णम् ॥

No. 13954. प्रश्नमहोदधिः.
PRAŚNAMAHŌDADHIḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 13794.

Complete.

Same work as the above, but the first stanza which is different is given below. According to it the author is Pṛthuyaśas, son of Varāhamihira.

प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा ।
प्रश्नकृतार्थगहना परार्थमुद्दिश्य हृषयशसा ॥

अथ नष्टलाभज्ञानमाह—

(मू.) होरास्थितः पूर्णतनुश्शशाङ्कः जीवेन दृष्टो यदि वा सितेन ।
क्षिप्रं प्रणष्टस्य करोति लाभं लाभोपयातो बलवान् शुभश्च ॥

(टी.) शुक्लदशम्यारभ्य कृष्णपक्षम्यन्तं चन्द्रः पूर्णः । तादृशचन्द्रः लग्ने स्थितः जीवेन सितेन वा दृष्टश्चेत्प्रणष्टस्य शीघ्रं लाभो भवति ।

अथ मुष्टिचिन्तानां धातुमूलपरिज्ञानमाह—

(मू.) स्वांशे विलग्ने यदि वा त्रिकोणे स्वांशस्थितः पश्यति धातुचिन्ता ।
परांशकस्थश्च करोति जीवं मूलं परांशोपगतः परांशम् ॥

(टी.) * * * *

कटकमकरमीना जलजाः । अन्ये स्थलजाः ।

इति भट्टोत्पलेन व्याख्यातम् ॥

* * * *

Colophon :

इति प्रश्नाध्यायः प्रथमः ॥

* * * *

इति नष्टाध्यायः षष्ठः ॥

अथ मिश्रकाध्यायो व्याख्यास्यते—गर्भिण्या पुत्रदुहितृज्ञानं वरस्य कन्या लाभज्ञानं चाह—

वृषस्थितेऽर्कपुत्रे सु(त)जन्माङ्गनायास्तु लभ्या वरस्य ।

End :

(टी.) अथ द्रव्यस्वरूपतस्करकालदेशानां ज्ञानं तस्य वयोजातिज्ञानं चाह—

(मू.) अंशकाज्ज्ञायते द्रव्यात्(व्यं) द्रेकाणैस्तस्करास्स्मृताः ।
राशिभ्यः कालदिग्देशवयोजातिश्च लग्नभात् ॥

[टी.) अंशकात् तत्काललग्नस्य नवमभागात् द्रव्यं हृतं धातुमूलादिद्रव्यं ज्ञायते तत्पूर्वमेव प्रदर्शितः । स्वांशे विलग्न इत्यादिना धातुमूलजीव इत्यादीनां वर्णस्तु नवांशराशितुल्यो वाच्यः । स तु बृहज्जातके रक्तश्वेत इत्यादिना उक्तः ।

* * * *

इति षड्राश्यराशयः—

एतेषामन्यतमे लग्ने रात्रौ हृतमिति ज्ञेयम् । शिष्टेषु दिनराशिषु दिन इति लग्नराश्युक्तदिक् ज्ञेया दोषस्तु मेषलग्ने रात्रिराशौ यदा पृष्टे ॥

No. 13961. प्रश्नमहोदधिः, सव्याख्यः

PRAŚNAMAHŌDADHIḤ WITH COMMENTARY.

Pages, 14. Lines, 5 on a page.

Begins on fol. 57*a* of the MS. described under No. 13555.

Complete.

Same work as the above.

No. 13962. प्रश्नमहोदधिः, सव्याख्यः.

PRAŚNAMAHŌDADHIḤ WITH COMMENTARY.

Pages, 3. Lines, 3 on a page.

Begins on fol. 54*b* of the MS. described under No. 13618.

Contains the Adhyāyas 1 to 6 only.

Same work as the above. The end runs thus :—

यत्कटाक्षसुधासिन्धौ मज्जता पुण्यपाकतः ।
मया ज्ञानमणिर्लब्धः तमानन्दगुरुं भजे ॥
यस्य प्रसादादहमेव विष्णुः मयैव सर्वं परिकल्पितश्च ।
इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

Colophon :

इति नष्टचिन्ताध्यायः षष्ठः ॥

No. 13963. प्रश्नमहोदधिः, सव्याख्यः.

PRAŚNAMAHŌDADHIḤ WITH COMMENTARY.

Pages, 12. Lines, 8 on a page.

Begins on fol. 24*a* of the MS. described under No. 13705.

Contains Adhyāyas 1 to 4, but wants the beginning in the first Adhyāya and the end in the 4th Adhyāya.

Same work as the above.

Colophon :

इति भट्टोत्पलविरचितायां षट्पञ्चाशद्धोरवृत्तौ संक्षेपहोराध्यायः ॥

No. 13964. प्रश्नमहोदधिः—लघुवृत्तिसहितः.

PRAŚNAMAHŌDADHIḤ WITH LAGHUVṚTTI.

Substance, palm-leaf. Size, 16⅝ × 1⅛ inches. Pages, 36. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

692

Same text as that described above with the commentary called Laghuvṛtti, apparently attributed to Paramēśvara. The colophon at the end of the 1st Adhyāya is slightly different.

Beginning:

नमस्कृत्य गणेशानं वाग्देवीं सर्वखेचरान् ।
मया षट्पञ्चाशिकायाः क्रियते वृत्तिरल्पका ॥

तत्र प्रथमं केन्द्रचतुष्कस्य सङ्क्षेपाद्विषयभेदमाह.

च्युतिर्विलग्नाद्धिबुकाच्च वृद्धिः मध्यात्प्रवासोऽस्तमयान्निवृत्तिः ।
वाच्यं ग्रहैः प्रश्नविलग्नकालाद्गृहं प्रविष्टो हिबुके प्रवासी ॥

च्युतिः स्थानात्प्रच्युतिः प्रष्टा च्युत्यादिकं पृच्छति चेत् च्युतिर्भवति पुनर्न वेति तद्विलग्नादुदयलग्नात् ज्ञेयम् ।

* * * *

Colophon:

इति पारमेश्वरीयां(यां) षट्पञ्चाशिकावृत्त्यामर्थाध्यायः प्रथमः ॥

End:

सौरेऽतीव वृद्धाः सप्तत्यब्दाधिकाः । जातिः ब्राह्मणादितं वक्ष्यति जीवसितौच विप्रौ क्षत्रियस्यारौष्णौ विशां चन्द्रः श . . . . तमस्सङ्करभावानाम् ॥

Colophon:

इति पारमेश्वरीयां(यां) षट्पञ्चाशिकावृत्त्यां मिश्रिकाध्यायस्सप्तमः । षट्पञ्चाशिका समाप्ता ॥

No. **13965.** प्रश्नविषयः.

PRAŚNAVIṢAYAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 13606.

Similar to the above. According to the method of divination explained herein, the questioner is in the first place directed to touch one of the Rāśis (figures) in a diagram.

Beginning:

अथ लग्ननवांशानां लिखेदष्टोत्तरं शतम् ।
प्रष्टा स्पृश्यति यं राशिं कन्यामध्ये बुधस्स्मृतः ॥
वृश्चिकादौ तु शुक्रस्स्यात् धनुर्मध्ये शनिः स्मृतः ।
कुम्भादौ चन्द्रमा ज्ञेयो राहुर्मीने च मध्यगः ॥

* * * *

एते पृष्टा दिशामीशौ जातकेष्विव दीव्यते ।
अर्कभौमादिवारन्तु प्रश्नगौरयान्तु चिन्तयेत् ॥
अथारूढोदयं ज्ञात्वा तयोः षड्वर्गमेव च ।
शीर्षोदयादिभेदश्च ग्रहयोगनिरीक्षणे ॥
वक्ष्यमाणप्रकारेण फलं ब्रूयाद्विचक्षणः ।
आरूढं प्रबलं कश्चिद्दीक्षितैस्तत्र तिष्ठति ॥

End:

ओजे धात्वादयोंशास्स्युः युग्मे जीवादयस्तुते ॥
राशिमंशश्च नक्षत्रं ग्रहयोगेक्षणे तथा ।
परीक्ष्यैव बुधः कुर्यात् धातुमूलादिनिर्णयम् ॥

No. 13966. प्रश्नविषयः.
PRAŚNAVIṢAYAḤ.

Pages, 12. Lines, 9 on a page.

Begins on fol. 21*a* of the MS. described under No. 13946.

Incomplete.

Similar to the work described above

Beginning:

अथ रोगचिन्ता——

लग्नं मूर्धोदयश्चेच्छुभपतिसहितं वीक्षितं वाखिलानां
दीर्घायुष्यप्रदस्स्यान्निधनमपि तथैवान्यभावाद्विचिन्त्यम् ।
लग्नेशो रन्ध्रपो वा यदि बलसहितश्चानयोर्वाधिमैत्री
ह्यारूढश्चोर्ध्ववक्त्रः सशुभजलसमृद्धः स मूर्धोदयाख्यः ॥
लग्नारूढनिशाकरादय इमेऽन्योन्यत्रिकोणाश्रिताः
प्रत्येकं यदि वा शुभग्रहयुता दृष्टाः त्रिकोणास्ततैः ।
केन्द्रस्थाः बलिनश्शुभाश्शुभखगैः दृष्टाश्च दद्युस्तरा-
मायुष्यश्च सुखश्च रोगशमनं स्त्रीणां नराणामपि ॥

End:

रूढे लग्नाष्टमर्क्षे रवियुजि दशमे रूढभाकुस्वोर्थगेशे
मृत्युर्जन्माष्टरूढे रवियुजि धिषणे सोऽर्थगे सप्तमानात् ।

पूर्वयोगे दशाहान्मृत्युः ।

लग्नादारूढभाद्वा सहजसहितयोः पश्यतोर्वै . . . . ।

मृत्युश्चासप्तमाद्वादथ सुखमृतिगौ मन्दभूजौ परेद्युः ॥

सद्योमृत्युः शशाङ्के निधनरिपुयुतेतापदष्टेऽष्टवर्षैः सौम्ये.

No. 13967. प्रश्नविषयः.

PRAŚNAVIṢAYAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 139*a* of the MS. described under No. 2824.

Similar to the above.

Beginning :

प्रश्नशास्त्रं प्रवक्ष्यामि गुह्यं द्वादशराशिभिः ।

मूर्ध्नि चास्य गले स्कंन्धे हृदये पृष्ठभागतः ॥

गुह्योरू जानुनी जङ्घे पादौ मेषादयः क्रमात् ।

मेषे द्विपादचिन्ता च ऋषभे च चतुष्पदः ॥

मिथुने गर्भचिन्ता च कर्कटे व्यवहारिकाः ।

राज्यचिन्ता भवेत् सिंहे कन्याचिन्ता वराङ्गना ॥

End :

क्रूराङ्गार्कजहानिः स्यात् कालारोराहुबन्धनम् ।

रोगाल्ब्धे मरणं केतुरित्येते ग्रहलक्षणम् ॥

No. 13968. प्रश्नविषयः.

PRAŚNAVIṢAYAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 56*a* of the MS. described under No. 13794.

Incomplete.

Deals with the divination of events by an astrologer on being questioned about them by an interested person

Beginning :

कटकस्सविता सिद्धिः प्रियङ्गुः शशिभिस्सुखम् ।

शीरुद्रो भूमिजो नाशं गोपुरञ्जसुखं भवेत् ॥

लाङ्गले वाक्पतं राज्यं गोत्रायसितमुत्तमम् ।

क्रूराङ्गार्कजहानिस्स्यात् कालारोराहुबन्धनम् ॥

रोगाल्बो(ल्ये) मरणं केतुग्रहोदयफलं लभेत् ।

End:

तत्तद्भावात्त्रिकोणेसुखमदनभे चास्पदे सौम्ययुक्ते
पापानां दृष्टिहीने भवनपसहिते पापखेटेरयुक्ते ।
भावानां पुष्टिमाहुः सकलशुभकरैरन्यथाचेत्प्रणष्टम् ॥

No. 13969. प्रश्नविषयः, आन्ध्रटीकासहितः.

PRAŚNAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 3. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13956.
Incomplete.
Similar to the work described above.

Beginning:

श्रेणिः प्रश्नाक्षराणां तदपि च गुणितं अन्त्यवर्णेन युक्तं
दन्ताष्टालोकपाला रविधृतिमुनिभिर्विंशतिर्मूर्च्छनाभिः ।
लब्धान्ते तत्र पूर्वोक्तमपिच गुणितं अ(चा)न्त्यवर्णेन युक्तं
वर्षो मासाश्च पक्षास्तिथिभवनलग्ना वारताराक्रमेण ॥

* * * *

प्रश्नाक्षरं द्विगुणितं सप्तभिर्भागमाहरेत् ।
अस्ति नास्ति मृतेर्लाभं सफलं स्यातिनिष्फलम् ॥

End:

वाहनश्च कटेर्देशे गुह्ये वाराङ्गनागमः ।
ऊरुयुग्मे वस्त्रसंप्राप्तिः पादयोर्भ्रमणं भवेत् ॥

No. 13970. प्रश्नविषयः.

PRAŚNAVIṢAYAḤ.

Pages, 32. Lines, 7 on a page.

Begins on fol. 37*a* of the MS. described under No. 13949.
Incomplete.
Similar to the above.

Beginning:

उदयारूढयोः पापाः (यदि नीचारि)राशिगाः ।
यदि बात्राहि शीतांशुः क्षुरिकाभङ्गमादिशेत् ॥

उदयारूढयोः पापदृष्टियोगे क्षतिं वदेत् ।
क्षुरि(काघार)णं सौ(म्य)दृष्टियोगे शुभं भवेत् ॥

End:

समानभूषणाद्याप्तिश्चन्द्रे क्षीरफलागमः ।
कुजे तु तरुणाः केचिदायान्ति . . . . . ॥

No. 13971. प्रश्नविषयः.
PRAŚNAVIṢAYAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 16*b* of the MS. described under No. 6470. Incomplete.
Similar to the work described above.

Beginning:

आदिश्याहनि नामानि लिखितं तस्य चाक्षरम् ।
पुनर्द्वादशसंयुक्तं जनैर्भक्तं च शेषकम् ॥
शकितं जनसङ्ख्यानां वस्तुनामाक्षरं तथा ।
आरूढप्रश्नलग्नेन संयुक्तं द्विगुणं भवेत् ॥
तत्र युक्तं जनैर्भक्तं तच्छेषं चोरनामकम् ।
कृत्तिकादीनि ऋक्षं च चतुर्भिर्गुणितं ध्रुवम् ॥
सप्तभिर्हरते भागं शेषन्तु प्रश्नलक्षणम् ।
स्वग्रामे प्रथमे चैव द्वितीये शीघ्रमागतम् ॥
तृतीये निर्गमस्थश्च चतुर्थे गृहमागतः ।

End:

आसनस्थौ भवेल्लाभं स्थिरे सौख्यं शुभावहम् ।
यात्रायां द्रव्यहानिस्स्याच्छयने च मृतप्रदम् ॥

No. 13972. प्रश्नविषयः.
PRAŚNAVIṢAYAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 139:?
Incomplete.
Similar to the above.

Beginning:

कन्यामिथुनमीने च धन्विकं गर्भमेव च ।
तुला मकरकर्की च मेषश्च द्वार उच्यते ॥

वृषभे वृश्चिके सिंहे कुम्भे बाह्या इति स्मृताः ।

मुष्टिप्रश्नाः—

मुष्टिचिन्तनवेलायां गर्भे द्वारे तु दक्षिणे ।
बाह्यभे वामहस्ते च वस्तु तिष्ठति निश्चयम् ॥

End :

एकैकश्च यते वार्ता द्वितीये तत्र तिष्ठति ।
तृतीये मार्गमध्ये तु चतुर्थे सुखदर्शनम् ॥
पञ्चमे प्रतिगन्तव्यं षष्ठे रोगश्च पीडितम् ।
सप्तमे राज्यपूज्यं च इत्येते प्रश्नलक्षणम् ॥

No. 13973. प्रश्नशास्त्रम्.
PRAŚNAŚĀSTRAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 58*b* of the MS. described under No. 13618.
Complete from Āgamanapraśna.
Similar to the above.

Beginning :

अथागमनप्रश्नः—

ग्रहे विलग्नाद्यदिमे ग्रहे तु तेनाहतं द्वादशराशयश्च ।
तावद्दिनान्यागमनस्य विद्यान्निवर्तनं वक्रगतैर्ग्रहेन्द्रः ॥
तिथिप्रहरसंयुक्तं तारकावारमिश्रितम् ।
सप्तभिर्हरते भागं शेषश्चैव शुभाशुभम् ॥
प्रथमे संस्थितस्तत्र द्वाभ्यामागमनं शुभम् ।
तृतीये चार्धमार्गस्थः चतुर्थे ग्राममादिशेत् ॥
पञ्चमे पुनरावृत्तिः षष्ठे व्याधिं समादिशेत् ।
शून्ये शून्यं विजानीयात् शारदावचनं यथा ॥

End :

लग्नश्च तिथिवारश्च नक्षत्रं वह्निसंयुतम् ।
पञ्चभिर्हरते भागं तत्त्वाः पञ्च प्रकीर्तिताः ॥
पृथिव्यामादिभूते च जले च जलसंस्थितः ।
तेजोमनुष्यहस्ते च वायुश्चैव ग्रहान्तरे ॥
आकाशे मूर्ध्निभागे च इति शास्त्रेषु गोपितम् ।
एकः पृथ्वीहच्छूत्वाद्भिः कामानवाप्नुयात् ॥

तेजसा कुरुते राज्यं वायौ भ्रमणमेव च ।
आकाशो मरणं प्रोक्तमिति दैवविदो जगुः ॥

Colophon :

इति प्रश्नशास्त्रं संपूर्णम् ॥

No. 13974. प्रश्नादिविषयः.
PRAŚNĀDIVIṢAYAḤ.

Substance, palm-leaf. Size, $9\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 12. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 24*a*. The other works herein are Sāmudrikanirūpaṇa 1*a*, Jyautiṣaviṣaya 14*b*, Vaidyaviṣaya 18*a*.

Similar to the above.

Beginning :

आरूढप्रश्नलग्नाद्वा तत्कोणे केन्द्रसंस्थितः ।
बुधश्शुक्रो गुरुश्चन्द्रः स प्रश्नस्सफलो भवेत् ॥
प्रश्नलग्नाधिपे केन्द्रे कार्यस्थानगतेऽपि वा ।
भार्गवेण च सन्दृष्टे कार्यसिद्धिर्न संशयः ॥
प्रश्नलग्नाधिपे लाभे कार्येशे केन्द्रसंस्थिते ।
गुरुणा चैव सन्दृष्टे कार्यसिद्धिर्न संशयः ॥

End :

जीर्णं श्यामलरक्तशुभ्रमलिनं काषायचित्रं च तत्
वस्त्रं धातुमयं च पृच्छकवशात्प्राच्यादिकाष्ठाफलम् ॥
* * * *
जाते जातदिनादिरादशदिनात्तज्जातकर्मात्मजे
कुर्याद्रुद्रदिनेऽथवा . . . . मैत्रोडुषु ॥

No. 13975. प्रश्नामृतम्, सटिप्पणम्.
PRAŚNĀMṚTAM WITH MEANING.

Pages, 33. Lines, 8 on a page.

Begins on fol. 5*a* of the MS. described under No. 13947.

Contains 1 to 11 Rasas.

Similar to the above.

By Jambūnātha of the Cōla country. There is found a colophon relating to the fourth Adhyāya of the Jātakasarvasvasaṅgraha which is attributed to the same author.

Beginning :

अस्तोकस्तानविन्यस्तनिस्तुलस्तुत्यगोस्तनम् ।
हस्तन्यस्तशुकं वस्तु ध्वस्तांहस्स्तोममस्तु नः ॥
कृष्णीयार्णवचन्द्रभूषणमहा . . . . ली
प्रश्नाब्धीन् स्वधिया विमृश्य बहुशस्तेभ्यः किमप्युद्धृतम् ।
जम्बूनाथसमाह्वयेन विदुषा श्रीचोलधात्रीभुवा
नैका . . . मल्पशब्दमधुरं प्रश्नामृतं तायते ॥

अधीत्य किञ्चनाप्यतो न कश्चनाप्यकिञ्चनः
विपश्चितामपश्चिमः पुरः स्थितः पुरोधसाम् ।

मूर्त्यर्थकीर्तिजयभुक्तिसुखोत्तमाङ्गद्वारास्थितिच्युतिनदीघनकूपतोयम् ।
भर्तव्यकोशमुखदक्षिणनेत्रविद्यावाकृत्यमत्र वरपूर्वधनं द्वितीयात् ॥
गलोरसी दक्षिणकर्णसोत्थमूलादिभक्ष्यं सुखशौर्ययोधाः ।
हस्तस्कन्धशय्यासनबन्धुमातृगेहाम्बुवृद्धी सुखवाहदुग्धम् ॥
भोज्यमन्त्रहृदयोदयपुत्रा बुद्धिभोजयितृभावविवेकाः ।
चोरविघ्नरिपुवीक्षितनाभिक्लेशषड्समथोप्युपदंशाः ॥

* * * *

अङ्गाल्लग्नादारभ्य क्रमेण व्ययान्तभावार्थाश्चिन्त्या इत्यर्थः ।
भावेशाक्रान्त ६, केन्द्रे ७, भावाधीशे च ८.

यद्भावेशा रन्ध्ररिष्फारियाता यद्भावस्था रन्ध्ररिष्फारिनाथाः ।
तत्तद्भावा व्याधिमृत्युव्ययादीन् कुर्युस्सौम्यस्वामिदृष्टा न चेत्ते ॥

* * * *

Colophon :

इति जम्बूनाथविरचिते प्रश्नामृते प्रथमो रसः ॥

* * * *

पौनर्भवादियोगाश्चास्मदुक्तप्रश्नसारसमुद्रे द्रष्टव्याः ।

Colophon :

इति जम्बूनाथविरचिते प्रश्नामृते अष्टमो रसः ।

* * * *

Colophon :

इति जातकसर्वस्वसङ्ग्रहे जम्बूनाथविरचिते सटीके चतुर्थोऽध्यायः ॥

End :

लग्ने चन्द्रे गुरौ वापि जीवप्रश्न इतीरितः ।
भौमोऽर्को वोदये रन्ध्रे मन्दे वान्त्येऽष्टमे हृतिः ॥

चोरहृतिः चोरप्रश्न इत्यर्थः ।

कार्यचिन्ताखे बुधेवशुक्रे लाभेऽर्थगे गुरौ ।
पुंराशौ बुधचन्द्रौ वा चन्द्रेज्यौ वा रवौ खगे ॥

Colophon :

इति जम्बूनाथविरचिते प्रश्नामृते एकादशो रसः ॥

No. 13976. प्रश्नार्णवप्लवः.
PRAŚNĀRṆAVAPLAVAḤ.

Pages, 34. Lines, 8 on a page.

Begins on fol. 64*a* of the MS. described under No. 13618.

Breaks off in the 10th Adhyāya.

A treatise on divination. The author is Nārāyaṇadāsa, son of Bṛahmadāsa of Agastyagōtra, and a devotee of Lord Kṛṣṇa. The anthor says that he wrote this work after consulting Tājika, and the works of Varāhamihira and Mukunda. This work is also known as Vaiṣṇavaśāstra. The different subjects dealt with in the work are given below.

१. शुभाशुभकार्यसिद्धिः.
२. धनराज्यनृपदर्शनलाभप्रश्नः.
३. दिग्विजयप्रश्नः.
४. जयपराजयप्रश्नः.
५. संघट्टचक्रराजाभिषेकः.
६. उत्पातफलशुभाशुभसस्यजातकम्.
७. परचक्रागमनदुर्गप्रश्नकोटाचक्रम्.
८. गमनागमनदूरप्रश्नः.
९. विवाहादिप्रश्नः.
१०. भ्रातृस्थानादि व्ययस्थानान्तरोगप्रश्नः.
११. स्वामिभृत्यादिप्रश्नः.
१२. बन्धमोक्षप्रश्नः.
१३. लेखादिप्रश्नः.
१४. भाजनादिप्रश्नः.
१५. धातुमूलजीवचिन्ताद्यधिकारः.

Beginning:

नारायणं परमपूरुषमादिदेवं ज्योतिर्मयं शुभकरञ्च चराचराणाम् ।
शान्तं प्रणम्य शिरसा द्विजपुङ्गवानां प्रश्नार्णवप्लवमिदं प्रकरोति शास्त्रम् ॥
श्रीब्रह्मदासनयजातनयः सुविद्वान् श्रीमानगस्त्यकुलजो यदुनाथभक्तः ।
वाराहताजिकमुकुन्दमतं समीक्ष्य नारायणः परमशास्त्रमिदं चकार ॥
प्रष्टा प्रणम्य हरिमिन्द्रककुन्मुखस्थो ज्योतिर्विदं सकलशास्त्रकलाविदग्धम् ।
आहूय सद्भुवि हितं फलपुष्पहस्तः शान्तं प्रसन्नवचनैः सकृदेव पृच्छेत् ॥
लग्ने चरे न हृतलाभऋणास्पदार्थनाशो गदक्षयगमागमबन्धमोक्षाः ।
प्रष्टुर्भवन्ति परचक्रमुपैति शीघ्रं कल्याणवृद्धिकलहोपशमाश्च न स्युः ॥

* * * *

मया निदेशाद्रचितं सुशास्त्रं त्रैलोक्यनाथस्य जनार्दनस्य ।
स्वयं मुकुन्देन च सत्यमुक्तं तस्मादिदं वैष्णवसंज्ञमासीत् ॥

Colophon:

इति श्रीब्रह्मदासपुत्रनारायणदासविरचिते वैष्णवशास्त्रे शुभाशुभकार्यसिद्धिर्नाम प्रथमोऽध्यायः ॥

See under the next number for the end.

No. 13977. प्रश्नार्णवप्लवः.

PRAŚNARṆAVAPLAVAḤ.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 12. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in the 15th Adhyāya.

Same work as the above.

See under the previous number for the beginning.

End:

अथ दृष्टिः—

स्वात्पञ्चमर्क्षं नवमं तृतीयं लाभं ग्रहः पश्यति मित्रदृष्ट्या ।
कार्यस्य सिद्ध्यै खलु पृच्छकानां शुभस्सुहृद्व्योमचरो विशेषात् ॥
निजात्कलत्रं दशमं चतुर्थसंस्थानभं पश्यति शत्रुदृष्ट्या ।
पापो रिपुर्व्योमचरो विशेषात्कार्यार्थनाशाय सपृच्छकानाम् ॥

Colophon:

इति श्रीवैष्णवशास्त्रे चतुर्दशोऽध्यायः ॥

सर्यास्पृजीभूमिजराहुमन्दचन्द्रज्ञजीवाः पतयो दिशां स्युः ।
मेषो वृषः स्यान्मिथुनं कुलीरः प्राच्याधिपाद्भिः परिवर्तनेन ॥

* * * *

धातोश्च मूलस्य च जङ्गमस्य चिन्तौजराशौक्रमतश्च मेषात् ।
नवांशकैः युग्मग्रहे प्रतीयाद्वाच्यावन्धैस्त्रिः परिवर्तनेन ॥
स्याद्धातुचिन्ताकुजभास्कराभ्यां बुधार्कजाभ्यामपि मूलचिन्ता ।
ज्ञेया च दैत्येन सितेन्दुजीवैः केन्द्रस्थितैरर्हति जीवचिन्ता ॥

* * * *

अथ ग्रहदृष्टिसाधनम्——तथा च नीलकण्ठ्याम्——
दृष्टिस्स्यान्नवपञ्चमी बलवती प्रत्यक्षतस्त्वेहदा
पादोनाखिलकार्यसाधनकरी मेला . . . . ।

No. 13978. भुवनप्रदीपिकासङ्ग्रहः, आन्ध्रटीकासहितः.

BHUVANAPRADĪPIKĀSAṄGRAHAḤ WITH TELUGU MEANING.

Pages, 16. Lines, 4 on a page.

Begins on fol. 64*a* of the MS. described under No. 6470.

Complete.

A treatise dealing with divination of various kinds made with the aid of certain astrological conclusions or theories.

Beginning:

भुवनप्रदीपाख्ये ग्रन्थे

* * * *

मेषवृश्चिकयोर्भौम इति राश्याधिपा उक्ताः ॥
रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्की च कन्यामीनौ बुधस्य च ॥
जीवस्य कर्की मकरौ मीनकन्ये सितस्य च ।
तुलामेषौ तु मन्दस्य उच्चनीचावुदाहृतौ ॥

* * * *

शुक्रे चन्द्रे भवेद्रौप्यं बुधे स्वर्णमुदाहृतम् ।
गुरौ रत्नयुतं हेमसूर्ये मौक्तिकमुच्यते ॥
भौमे त्रपु शनौ लोहं राहावस्थीनि संवदेत् ।
इति धातुनिश्चयः ।

* * * *

गुवाकुजश्शिशुस्सौम्यः शशिशुक्रौ च मध्यमौ ।
मन्दमार्ताण्डदेवेज्यफणिनः स्थविरा ग्रहाः ॥

इति नष्टाधिकारः ॥

End:

चन्द्रो लग्नपतिर्वापि यदि केन्द्रे शुभान्वितः ।
विवादश्च तदा सद्यः जायते नात्र संशयः ॥

* * * *

चतुर्थे दशमे वापि यदि सौम्यग्रहाभवन् ।
तदा न गमनं क्रूरास्तत्रैव गमनं भवेत् ॥

* * * *

लग्नपः कार्यपश्चापि कार्ये स्यातामुभौ यदि ।
स्थितौ[वा]द्रेक्काण एकस्मिन् कार्यसिद्धिर्भवेद्ध्रुवम् ॥
लग्नपो मृत्युपश्चापि लग्ने स्यातामुभौ यदि ।
स्थितौ[वा]द्रेक्काण एकस्मिन् व्याधिर्नास्तीति तं वदेत् ।
नीचो वास्तमितो वा मृत्युपतिर्नवमगो रिपुक्षेत्रे वा ।
नीचस्थानपयुक्तो व्यवहारगतः पुरुषो नष्टः ॥

Colophon:

इति प्रश्नचारकृतभुवनप्रदीपिकासङ्ग्रहः ॥

No. 13979. मेघमालामञ्जरी.

MEGHAMĀLĀMAÑJARĪ.

Substance, paper. Size, 8 × 6⅝ inches. Pages, 34. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Similar to the work described under No. 3137 on page 1127 of the India Office Library Catalogue, Part V.

Contains the following subjects :—

१. मेघलक्षणमेघवर्णमासफलगर्भलक्षणविद्युल्लक्षणग्रहकूटलक्षणानि.
२. वातोद्भवलक्षणम्.
३. मेघफलम्.
४. प्रतिसूर्यलक्षणम्.
५. परिवेषलक्षणम्.
६. धारालक्षणम्.

७. इन्द्रचापलक्षणम्.
८. विद्युद्दर्शनम्.
९. गर्जितनिर्घातोत्पत्तिफलम्.
१०. मेघगुणितलक्षणम्.
११. खेटग्रहफलम्.
१२. वर्षकसूचकनिर्णयः.
१३. वर्षप्रश्नवर्षयोगफलम्.

Beginning :

कैलासशिखरे रम्ये प्रणम्य परमेश्वरम् ।
पप्रच्छ श्रीमहादेवी पार्वती परमेश्वरी ॥
केनोपायेन भगवन् जीवेयुस्सकलाः प्रजाः ।
तन्मे संक्षिप्य सर्वेश ब्रूह्युपायमनुत्तमम् ॥

ईश्वर उवाच—

सस्यानि सर्वभूतानां जीवनं परमं स्मृतम् ।
सस्यान्यमृतरूपाणि देवाद्या भुञ्जते प्रजाः ॥
तेषान्तु कारणं वृष्टिर्वृष्टेर्मेघास्तु कारणम् ।
सर्वलोकहितार्थाय दिव्यः प्रश्नः कृतो महान् ॥

देव्युवाच—

उत्पत्तिं वसतिं वर्णं संचारं नाम विग्रहम् ।
आश्रयं च बलं चैव कालं ब्रूहि महेश्वर ॥

ईश्वर उवाच—

काश्यपस्तपसा जातः लोकानां हितकाम्यया ।
मेघरूपी च भगवान् विष्णुर्लोकैकनायकः ॥
अवताराद्यथा विष्णुर्लोकानुग्रहकाङ्क्षया ।
स करोति तथा तद्वन्मेघरूपं तथैव च ॥
असौ संसत्पदेष्वेषु त्रैलोक्येऽपि च सङ्ग्रहः ।
ग्रहयोगेषु दृश्यन्ते वक्रे नश्यन्ति वारिदाः ॥
उमाख्यातं त्रिलोकेषु वृष्टिसंहारकारणम् ।
मेघाश्च कीदृशा देवाः कृपया स्वप्रजायते ॥

* * * *

मेघमालामृतं वक्ष्ये तदा वर्षस्य लक्षणम् ।
मेघानां निश्चयं माता कृषिरारभ्यते यथा ॥
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
तं दृष्ट्वा सौम्यवदनं पार्वती पृच्छते तथा ॥

Colophon :

इति मेघमालामञ्जरीसंहितायां मेघलक्षणमेघवर्णमासफलगर्भलक्षणविद्युल्लक्षण-ग्रहकूटलक्षणाः समाप्ताः ॥

* * * *

इति मेघमालामञ्जरीसंहितायांमुमामहेश्वरसंवादे परिवेषलक्षणं नामाष्टमः पटलः ॥

End :

तुषारवृष्टीरतिवृष्टिगोकुलं वायुश्च वृष्टीरतिवृष्टिदाहकम् ।
अनर्घतां वृष्टिविनाशनं च ऋक्षेषु विचारणं स्यात् ॥

Colophon :

इति मेघमालामञ्जर्यामुमामहेश्वरसंवादे ईश्वरप्रोक्ते वर्षप्रश्नवर्षयोगफलं समाप्तम् ॥

* * * *

तुलादिमासत्रयमन्दवारे यद्यस्तमश्चन्द्रमदर्शनं च ।
तदा परेद्युस्सवितुः प्रभाते आसप्तरात्रात् प्रभवन्ति वर्षम् ॥

No. 13980. मेघमालामञ्जरी.

MEGHAMĀLĀMAÑJARĪ.

Pages, 37. Lines, 15 on a page.

Begins on fol. 212*a* of the MS. described under No. 1197.

Contains the मेघलक्षणमेघवर्णमासफलगर्भलक्षणविद्युल्लक्षणग्रहकूटलक्षण complete.

Same work as the above wherein see for the beginning.

End :

देवब्राह्मणपूजा च दानमन्त्रजपादयः ।
अस्मिन् देशे प्रवर्तन्ते तत्र वृष्टिर्भविष्यति ॥

Colophon :

इति मेघमालायां योगन्यायः समाप्तः ॥

आषाढं कथितं देवि श्रावणं शृणु पार्वति ।
श्रावणे शुक्लसप्तम्यां मध्यं याति दिवाकरे ॥

* * * *

सर्वं विचार्य मतिमान् शास्त्रं शास्त्रविदो विदुः ।
एतस्य लक्षणं ज्ञेयं मासस्य प्रतिवर्षिणम् ॥

Colophon:

इति श्रीमेघमालामञ्जरी समाप्ता ॥

No. **13981.** मेघमालामञ्जरी.

MĒGHAMĀLĀMAÑJARĪ.

Pages, 52. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13489.

Contains from the beginning to the end of the Pratisūryalakṣaṇa.

Same work as the above but with the following stanza in the beginning.

यस्य केशेषु जीमूतास्सरित्सर्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥

No. **13982.** लम्पाकम्.

LAMPĀKAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13705.

Complete.

Same work as that described under R. No. 218 (*a*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, but with slight difference in the end. By Padmanābha.

End:

कवर्गे वर्गचिन्ता च अवर्गे स्त्रीषु चिन्तनम् ।
सुस्थिरं चैव वार्तानां तेनाद्विक्षरसंभवम् ॥
गते चिरं सुवार्ता च इत्येवं मनुरब्रवीत् ।
पृच्छकस्य वचः श्रुत्वा गुणाद्विगुणषड्गुणाः ॥
अष्टसंख्या भवेल्लब्धिं द्रव्यसङ्ख्यायनिश्चयम् ।
मेषादिमीनपर्यन्तं लम्पाके कृतनिश्चयः ॥
आदित्येधिव्रणश्चैव अर्कनक्षत्रणं तथा ।
. . . . . . प्रश्नाकर्णश्रृङ्गाटकस्थितिः ॥
त्रिकोणाकारकं भौमे सौम्ये च चतुराकृतिः ।
अयं पुरुषाकारं भवेदर्की राहुकेतुखगाकृतिः ॥

Colophon:

इति लम्पाकं संपूर्णम् ॥

No. 13983. लम्पाकम्.
LAMPĀKAM.

Pages, 47. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 13677.
Complete in five Adhyāyas containing 62 stanzas.
Slightly different from the above, but by the same author.

Beginning:

नमस्ते शूलहस्ताय चन्द्रार्धकृतशेखर ।
त्वत्प्रसादात् प्रवक्ष्यामि लम्पाकं लोकहर्षणम् ॥

तत्रादौ शास्त्रसाधनमपि स्पर्शवशाद्राशिभेदज्ञानोपायमाह—

बीजाङ्घ्रिकुक्षिवक्षोदोःशिरांशुत्वा(रस्सूक्षा)दि दक्षिणे ।
क्रमाद्वामे च कूर्पादि व्युत्क्रमात्तान्विनिर्दिशेत् ॥

पुरुषस्य दक्षिणपार्श्वे बीजपादकुक्षिवक्षोदोःशिरस्सु क्रमात् वृषभादिराशीन् विनिर्दिशेत् । वामे तु व्युत्क्रमेण शिरोबाहुवक्षःकुक्षिपादबीजेषु वृश्चिकादिषड्राशीन् विजानीयात् । एतेषु प्रष्टा यत् स्थानं स्पृशति तत्तदङ्गं सूचयति राशिमारूढमिति जानीयात् । चतुर्ष्वङ्गुलिषु यामङ्गुलिं स्पृशति तया कनिष्ठिकामुख्यया पादं जानीयात् । आरूढज्ञानमेवम् ।

* * * *

Colophon:

इति लम्पाके प्रथमः ॥

* * * *

इति लम्पाके जातकप्रश्नो नाम द्वितीयाध्यायः ॥

End:

आरूढपादादुपरि तद्राशिस्थैश्च पादपैः ।
नष्टदि(द्र)व्यादिपार्श्वस्थदि(द्र)व्यादिकमुदाहरेत् ॥

आरूढपादस्यानन्तरराशिस्थं पादचतुष्टयाधिपतिना द्रव्यादिकं नष्टद्रव्यं समीपस्थं द्रव्यमिति वदेत् । शास्त्रकृत्प्रयोजनशङ्कां निरूपयति—

पद्मनाभकृतं शास्त्रं शिष्याणां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

Colophon:

इति पञ्चमोऽध्यायः ॥

693

No. 13984. लम्पाकम्.
LAMPĀKAM.

Substance, paper. Size, 8¾ × 7¼ inches. Pages, 20. Lines, 24 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants the beginning in the first Adhyāya and breaks off in the fourth Adhyāya.

Same work as the above.

No. 13985. लम्पाकम्, कर्णाटकटीकासहितम्.
LAMPĀKAM WITH KANARESE COMMENTARY.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 86. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, new.

Wants the beginning and the end in the Saṁjñikādhyāya.

Same work as the above.

No. 13986. लम्पाकम्, द्राविडटीकासहितम्.
LAMPĀKAM WITH TAMIL COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 9⅜ × 2 inches. Pages, 22. Lines, 14 on a page. Character, Grantha and Tamil. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mantrakalpa with Kanarese meaning 12*a*.

Contains the first Adhyāya complete.

Same text as that described under No. 13989, but with difference in the beginning as given below.

Beginning :

नमश्श्रीवर्धमानाय निर्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥
त्वत्प्रसादात्प्रवक्ष्यामि लम्पाकं लोकभूषणम् ।
मण्डलं चतुरश्रं वा लिखित्वान्तः प्रकल्पयेत् ॥
मेषो वृषो नृयुग्मश्च कर्कटस्सिंहयोषितः ।
तुलावृश्चिकचापाश्च मकरः कुम्भमीनकाः ॥
सपर्याया इमे शब्दाः द्वादशानां दलात्मनाम् ।
नामधेयानि विद्वद्भिः कथितं पूर्वसूरिभिः ॥

No. **13987.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Pages, 68. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13502.

Complete in the following five Adhyāyas.

१. संज्ञाविधिः.
२. जातकविधिः.
३. आयुर्दायान्तर्दशाविधिः.
४. लाभालाभाध्यायः.
५. नष्टमुष्ट्यध्यायः.

Similar to the work described above and with a commentary.

Beginning:

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

अत्रादौ शास्त्रसाधनमङ्गदर्शनवशादारूढराशिज्ञानोपायश्च कनिष्ठादिक्रमा दङ्गुलीदर्शनवशादत्र आरूढराशौ पादज्ञानश्चाह—

अण्डाङ्घ्रिकुक्षिवक्षोदोःशिरांस्युक्तादिदक्षिणे ।
क्रमाद्वामे च कौर्प्यादीन् व्युत्क्रमात्तान् विनिर्दिशेत् ॥
आरूढराशौ पादस्तु कनिष्ठादि क्रमाद्भवेत् ।
एकाङ्गुल्याङ्गसंस्पर्शादेवं पादा भवन्ति हि ॥
अत्रादौ प्रश्नवक्ता दैवज्ञः पृच्छकं प्रति एवं वदेत्—

हे पृच्छक त्वं तावत् तव अङ्गेषु अङ्गुष्ठं विना कनिष्ठिकादि चतसृष्वङ्गुलीषु तव सम्मतया एकया यया कयाचिदङ्गुल्या तव संमतमङ्गकं संस्पर्श(स्पृश) इति वदेत् । अनन्तरं पृच्छकः यया अङ्गुल्या यदङ्गं स्पृशति तदङ्गदर्शनवशात् राशिज्ञानं ज्ञात्वा तदङ्गुलीदर्शनवशात् पादज्ञानञ्च ज्ञात्वा तत्पादवशात् प्रश्नं वदेत् । पुरुषस्य दक्षिणपार्श्वे अण्डं वृषभः । अङ्घ्रिः मिथुनम् । कुक्षिः कटकं । वक्षः सिंहम् । दोः कन्या । शिरः तुला । पुरुषस्य वामपार्श्वे शिरः वृश्चिकम् । दोः धनुः । वक्षः मकरम् । कुक्षिः कुम्भम् । अङ्घ्रिः मीनम् । अण्डम् मेषम् । इति जानीयात् ॥

* * * *

Colophon:

इति लम्पाकशास्त्रे प्रश्नशास्त्रे संज्ञाविधिर्नाम प्रथमोऽध्यायः ॥

End:

आरूढलग्ने चत्वारः पादाः । तेष्वेकतमः पादः प्रश्नकाले उदयति । तं पादं विना इतरे त्रयः पादाः वर्तन्ते । तेषु यः आरूढपादाधिपस्य अनन्तरपादाधिपो भवति स पादाधिपः तस्करस्य स्वरूपवाचके दृष्टिराशौ स्थितश्चेत् तस्करः समीपत एव वर्तते । द्रव्यमपि समीपत एव वर्तेत इति भावः । अथ शास्त्रकृत्पद्मनाभसूरिणा प्रतिज्ञातग्रन्थसंख्यानिरूपणमाह—

पद्मनाभकृतं शास्त्रं शास्त्राणामुत्तमं हितम् ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥'

Colophon:

इति पद्मनाभाख्यसूरिणा समस्तज्योतिश्शास्त्रार्थान् संगृह्य हितं प्रत्यक्षफलतया सन्तोषकरमुत्तममितरशास्त्रापेक्षया अनायासेन बोधजनकं द्विषष्टिश्लोकसंक्षिप्तं बहुसहस्रग्रन्थैर्वाच्यार्थं संकुचिततया प्रोक्तं लोकेषु अलङ्कारं सर्वोत्तमं लम्पाकाख्यं प्रश्नशास्त्रं [पद्मनाभसूरिणा] कृतं संपूर्णम् ॥

अस्मिन् शास्त्रे अनुच्यमानार्थमविदितार्थं किंचिदपि नास्तीति भावः ॥

यस्य संपर्कपुण्येन नारीरत्नमभूच्छिला ।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये ॥

The scribe writes :—

श्रीशैलवेदकोटीररामावरजनामकः ।
लिखित्वेदं प्रश्नशास्त्रमर्पयेऽहं श्रियः पतौ ॥

No. **13988.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Pages, 20. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13680.

Complete.

Same work as the above but without the introductory stanzas and with a different end

End:

शास्त्रकृत्प्रतिज्ञातग्रन्थसंख्यां निरूपयति —

पद्मनाभकृतं शास्त्रं शस्त्रा(छात्रा)णां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

Colophon:

इति श्रीमल्लम्पाके प्रश्नशास्त्रे नष्टमुष्टिनिरूपणं नाम पञ्चमोऽध्यायः

The scribe gives the date of the MS. :—

कालयुक्त्यामूर्जेशुक्ले चतुर्दश्यां स्थिरे शुभे ।
रामनाथेन लिखितं लम्पाकं लोकभूषणम् ॥

No. 13989. लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Substance, palm-leaf Size, 13⅛ × 1¼ inches. Pages, 50. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new. Complete.

Similar to the work described above. The commentary is different.

Beginning:

सिद्धासीनं महादेवं महेशानं प्रियात्मजम् ।
विघ्नराजं नमस्कृत्य वक्ष्ये लम्पाकमादरात् ॥
नमस्ते शूलहस्ताय चन्द्रार्धकृतमौलये ।
प्रश्नशास्त्रं प्रवक्ष्यामि लम्पाकं लोकभूषणम् ॥

अस्य लम्पाकशास्त्रस्याधिपतिः स्वाभिमतदेवता च सदाशिव एवेति प्रकटीकर्तुं नमश्शब्द इतिपूर्वकम् । शूलहस्तायेति शूलं हस्ते यस्येति शूलहस्तः, तस्मै तुभ्यं नमः । चन्द्रार्धेन कृतः मौलिः यस्य चन्द्रार्धकृतमौलिः, तस्मै इति पूर्वेणान्वयः । त्वत्प्रसादात्[1] त्वत्कृपावशात् । लोकभूषणं सर्वजनहर्षकम् । लम्पाकाख्यं प्रश्नशास्त्रं प्रकटीकरोमि । तत्रादौ शास्त्रसाधनमङ्गस्पर्शवशात् तज्ज्ञानोपायश्च तत्साधनराशिलक्षणश्चाह—

मण्डलं चतुरश्रं वा लिखित्वान्तः प्रवातयेत् ।
चतुर्दिक्षु चतुस्सूत्रं दिक्प्रपञ्चक्रमाल्लिखेत् ॥
मेषो वृषो नृयुग्मं च कर्कटास्सिंहयोषिता(तौ) ।
तुलावृश्चिकधन्वानि मकरः कुम्भमीनका:(कौ) ॥
सत्पद्ममयिमेराशिद्वादशानां दलात्मनाम् ।
नामधेयानि विद्भिः कथ्यते(न्ते) पूर्ववित्तमैः ॥

End:

पद्मनाभकृतं शास्त्रं शिष्याणां हितकाम्यया ।
द्विषष्टिश्लोकसंक्षिप्तं लम्पाकं लोकभूषणम् ॥

---

1. त्वत्प्रसादात् - पाठान्तरम्.

शिष्याणां हितकाम्यया पद्मनाभनाम्ना विंशत्यधिकशतश्लोकसंमितं लोकभूषणं लम्पाकशास्त्रं पद्मनाभकृतम् ॥

Colophon :

श्रीमल्लम्पाके प्रश्नशास्त्रे पञ्चमोऽध्यायस्समाप्तः ॥

No. **13990.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 46. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. **13991.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Pages, 35. Lines, 7 on a page.

Begins on fol. 16*b* of the MS. described under No. 13673.

Contains the first two Adhyāyas. The colophon at the end of the first Adhyāya apparently wrongly states that it is the third Adhyāya; and a small portion of the fourth Adhyāya is found before the second Adhyāya.

Same work as the above.

No **13992.** लम्पाकम्, सव्याख्यानम्.

LAMPĀKAM WITH COMMENTARY.

Pages, 84. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 13534

Complete.

Same work as the above.

No. **13993.** लम्पाकसारः.

LAMPĀKASĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 13680.

Incomplete.

This treatise purports to give the essence of what is contained in the Lampāka which work has been described under the previous numbers.

Beginning:

उमासुतं नमस्कृत्य गुरुमुख्यांस्तथा परान् ।
लम्पाकसारं संगृह्य बालानामल्पमेधसाम् ॥

वक्ष्यामि सुखबोधार्थं सारसङ्ग्रहमुत्तमम् ।
रवेर्मेषं स्वोच्चगेहं तुला नीचगृहं स्मृतम् ॥
केसरी स्वगृहश्चैव मित्रक्षेत्री धनुर्झषौ ।
जीवो मित्रो भूमिजगोभूतशालोष्टपादपः ॥

End:

असितस्य तुला तुङ्गमजा नीच इति स्मृतः ।
नक्रकुम्भौ स्वभश्चैव नारीयुगलमेव च ॥
चापमत्स्योऽथ बृषभः जूकं . . यस्मृतम् ।
बुधवाक्पतिशुक्रौ च मित्रो भूगृह एव च ॥
भूतो नवपदाधीनः मुनीन्द्रैरुदितं पुरा ।
धात्वादि द्विपदादीनि पञ्चमब्राह्मणोदयः ॥
तथा कृष्णादिपुरुषः त्रिसंख्या रश्मिरेव च ।
कृष्णवर्णं समाख्यातः धनुराकृतिरेव च ॥

No. 13994. विद्वज्जनवल्लभा.

VIDVAJJANAVALLABHĀ.

Substance, palm-leaf. Size, 17⅝ × 1⅜ inches. Pages, 18. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the ninth Adhyāya.

A work in Praśnaśāstra (divination) dealing with the undermentioned topics.

१. लाभालाभनिर्णयः.
२. शत्रुसमागमः.
३. गमागमाध्यायः.
४. प्रोषितागमनम्.
५ यात्रा.
६. जयपराजयः.
७. सन्धिविग्रहनिर्णयः.
८. बन्धमोक्षः.
९. शुभाशुभनिर्णयः.

Incomplete.

Beginning:

भूतं च भाव्यपि च यच्च भवत्स्वरूपं वेत्त्येव यः करतलामलकक्रमेण ।
देवं तमिन्दुकलिकाकलितावतंसमत्यद्भुतैकविभवं विभुमानतोऽस्मि ॥
अथाभिदध्मः परिपृच्छतां स्फुटं शुभाशुभं प्रश्नविलग्नतो नृणाम् ।
ग्रहैश्शरीराधिकभावसंश्रितैः गमागमाद्याखिलकार्यगौरवम् ॥

यथा दुष्टफलाः क्रूराः सौम्याश्शुभफलप्रदाः ।
क्रूरयुक्तास्तथा क्रूराः सौम्याः क्रूरफलप्रदाः ॥

Colophon:

इति सर्वतोभद्रचक्रे देवपामात्यसूरिविरचिते आन्ध्रभाषायां चक्रोद्धार नाम प्रथमः परिच्छेदः ॥

End:

प्रथमं चक्रमुद्धारं द्वितीयं ग्रहमेधनम् ।
उपग्रहस्तृतीयं तु लत्ताघातं चतुर्थकम् ॥
पञ्चग्रहं तु पञ्चानामृक्षषट्कन्तु षट्ककम् ।
उपग्रहसमायोगे मृत्युर्भवति नान्यथा ॥

* * * *

दीपो यथा गृहस्यान्ते खद्योता(उद्योत)यति सर्वदा ।
तथैव सर्वतोभद्रं सत्यं सत्यं न संशयः ॥

Colophon:

इति सर्वतोभद्रचक्रं संपूर्णम् ॥

No. **13997.** सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

SARVATŌBHADRACAKRAM WITH TELUGU MEANING.

Pages, 26. Lines, 18 on a page.

Begins on fol. 69*b* of the MS. described under No. 5764.

Breaks off in the fifth Paricchēda.

Same work as the above.

No. **13998.** सर्वतोभद्रचक्रम्.

SARVATŌBHADRACAKRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 62*a* of the MS. described under No. 13561.

Contains the first Paricchēda incomplete.

Same work as the above.

No. **13999.** सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.

SARVATŌBHADRACAKRAM WITH TELUGU MEANING.

Pages, 8. Lines, 25 on a page.

Begins on fol. 27*a* of the MS. described under No. 13387.

Contains the first Paricchēda incomplete.

Slightly different from the above.

No. 14000. सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.
SARVATŌBHADRACAKRAM WITH TELUGU MEANING.
Pages, 30. Lines, 6 on a page.
Begins on fol. 18*a* of the MS. described under No. 13556.
Breaks off in the second Paricchēda.
Same work as that described above.

No. 14001. सर्वतोभद्रचक्रम्, आन्ध्रटीकासहितम्.
SARVATŌBHADRACAKRAM WITH TELUGU MEANING.
Pages, 64. Lines, 5 on a page.
Begins on fol. 16*a* of the MS. described under No. 13449.
Complete.
Slightly different from the above and the work is not divided into Paricchēdas.

Beginning:

अथातस्संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ।
विख्यातं सर्वतोभद्रं सद्यः प्रत्ययकारणम् ॥
त्रिविधं सर्वतोभद्रं खण्डाखण्डोभयात्मकम् ।
चतुष्षष्टिपदं खण्ड एकाशीतिमखण्डकम् ॥
शङ्कुमार्गादिचन्द्रस्य खण्डाखण्डोभयात्मकम् ।
उर्ध्वगा दश विन्यस्य तिर्यग्रेखास्तथा दश ॥
एकाशीतिपदं चक्रं जायते नात्र संशयः ।
अकारादिस्वरान् कोष्ठानीशादिविदिशि क्रमात् ॥
सृष्टिमार्गेण दातव्यं षोडशान्तं प्रयत्नतः ।
कृत्तिकादीनि धिष्ण्यानि पूर्वेशादि लिखेत्ततः ॥

End:

सूक्ष्मस्थूलमिदं द्वयोः प्रवसनं नाशं मृताख्यं जयं
हास्यं कीर्तितनामकं प्रियरतिं सुसिद्धकुभुक्तिज्वरम् ।
कम्पं सुस्थिरतां नृनामसदृशं चेन्दोरवस्थाफलं
यात्रायुद्धविवाहवास्तुजननक्षेत्रप्रवेशादिषु ॥

No. 14002. सर्वतोभद्रचक्रश्लोकाः.
SARVATŌBHADRACAKRA ŚLŌKĀḤ.
Pages, 9. Lines, 5 on a page.
Begins on fol. 48*a* of the MS. described under No. 13449.

Complete.

Stanzas from the Sarvatōbhadracakra, especially those which deal with the वधा of the planets and constellations.

Beginning :

नामद्वितीयात्सौदन्तिवेधाफलं वक्ष्यते । कृत्तिका—

भरण्याकारवृषभं नन्दा भद्रा तुलाच्च तम् ।

विशाखा श्रवणं पापविद्धेत्याग्नेयसंस्थितः ॥

रोहिणी—

वायुग्मे दान्तदा कन्या रेफं स्वाति उकारकः ।

अश्विनी रोहिणीसंस्थे अभिजिद्धन्ति पापगः ॥

End :

अश्विनी—

व मीन आकार्मुकं च ये ज्येष्ठा पूर्वे अग्रतः ।

पापग्रहे संस्थितेऽश्वी उकारं रोहिणी तथा ॥

भरणी—

लकारं मेषरिक्ता च जयः कार्पिनमैत्रभम् ।

कृत्तिकाभरणीपापसंस्थितं वितृमद्गतः ॥

Colophon :

इति सर्वतोभद्रचक्रे चौदन्तिश्लोकाः समाप्ताः ॥

No. **14003.** सामुद्रिकनिरूपणम्.

SĀMUDRIKANIRŪPAṆAM.

Pages, 27. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13974.

Incomplete; found in the Nāradīya.

Similar to the work described under R. No. 1248(*a*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

Beginning :

अथातस्सम्प्रवक्ष्यामि सामुद्रिकनिरूपणम् ।

केशादिपादपर्यन्तं द्वात्रिंशल्लक्षणान्वितम् ॥

शिरो मूर्धा ललाटश्च चक्षुः कर्णश्च वक्त्रकम् ।

ग्रीवा प्रजननं पृष्ठं नखं केशश्च वर्णकम् ॥

दन्तजिह्वाधरोष्ठं च भुजग्रीवा उरस्तथा ।
बाहुहस्तौ पादजङ्घे ऊरुनाभिश्च गुल्फकम् ॥
स्वरं सत्वश्च गमनं द्वात्रिंशल्लक्षणं क्रमात ॥
शिरोमध्ये द्विभागश्च गजमस्त[क]समन्तु वा ।
गजवाहनसम्पन्नो गाम्भीर्यो भोगवान् भवेत् ॥

End:

तदूर्ध्वे व्याघ्रगण्डश्च तत्पार्श्वे राजगण्डयोः ।
रेखा द्वित्रि च दृश्यन्ते तद्गण्डश्च विवारणम् ॥
करपार्श्वे सन्ततिः स्यात् अङ्गुल्यग्रेषु भर्तृषु ।
रेखाप्रमाणं वक्तव्यं तत्सङ्ख्या भ्रातृपुत्रयोः ॥

Colophon:

इति नारदीये स्त्रीपुरुषदेहहस्तपादतत्फलनियमप्रवर्तने सामुद्रिकलक्षणं समाप्तम् ॥

No. 14004. सामुद्रिकशास्त्रम्.
SĀMUDRIKAŚĀSTRAM.

Pages, 24. Lines, 32 on a page.

Begins on fol. 65*a* of the MS. described under No. 27.

Incomplete. The MS. is irregularly bound.

Similar to the above. Said to have been revealed by God Viṣṇu to Nārada.

Beginning:

ब्रूहि लक्षणसङ्क्षेपं मनुष्याणां यथाक्रमम् ।
एवं स पृष्टो भगवान् नारदेन महात्मना ॥
केशवः प्रत्युवाचेदं देहलक्षणकोविदः ।
कर्मणा प्राकृतेनाथ नराणां भागधेयशः ॥
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां तु लक्षणैः किं प्रयोजनम् ॥
वेद्येष्वायुः पूर्ववेद्यं ततो लक्षणमादिशेत् ।
वामभागे तु नारीणां दक्षिणे पुरुषस्य तु ॥
निर्दिष्टं लक्षणं तेषां सामुद्रिकवचःक्रमात् ।
आयुर्निदानभूताया रोहिण्याः साधुलक्षणम् ॥

रोहिणी मणिबन्धात्तु तलमूलस्य मध्यतः ॥
आतर्जन्यन्तगा रेखा तत्समावर्ण एव वा ।
तद्वाम्नरः शतायुः स्यात् यत्र यत्रान्तरान्तरा ॥"

End :

कनिष्ठाङ्गुलिमूले तु ऊर्ध्वा रेखाधिगच्छति ।
जलगण्डमवाप्नोति नदीतीरे महद्भयम् ॥
तन्मध्ये रेखदृष्ट्या च विषशस्त्राग्निबाधतः ।
तर्जन्यङ्गुलिमूले तु विद्यारेखा स्वनामतः ॥
मध्यमाङ्गुलिमूले तु ऊर्ध्वरेखाधिगच्छति ।
ज्वरग्रन्थिप्रमेहाश्च विचिरङ्गमवाप्नुयात् ॥
तन्मध्यरेखा दृष्टा चेत् श्वानमर्कटमूषकाः ।
तार्जन्यङ्गुलिमूले तु ऊर्ध्वरेखाधिगच्छति ॥
परस्त्रीभिर्मनोभीतिः राजदण्डादिबन्धनम् ।
सव्यरेखाविच्छिद्रं स्यात् सर्पदष्टमहद्भयम् ॥

No. 14005. सामुद्रिकशास्त्रम्.
SĀMUDRIKAŚĀSTRAM.

Substance, palm-leaf. Size, 12⅞ × 1⅞ inches. Pages, 20. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Incomplete.

Similar to the work described above.

Beginning :

शृणु सङ्क्षिप्य वक्ष्यामि पूर्वं पुरुषलक्षणम् ।
पूर्वमायुःपरीक्षार्थं कलयेन्मानमन्दिरे ॥
आनीय सूत्रव्यामे च तनौ मानं प्रकल्पयेत् ।
समं चेदस्य योगः स्यात् विषमं चेद्दरिद्रता ॥
माने कृते यदि भवेत् पादेष्टौ च शताङ्गुलम् ।
दीर्घायुर्धरणीपालः षण्णवत्यङ्गुलं भवेत् ॥
अशीतिवर्षजीवी च स भवेदिन्द्रसम्मतः ।
मानेऽप्यशीत्यङ्गुलं चेन्मध्यमायुरकिञ्चनः ॥

End:

गण्डयोः कूर्पका यस्या असत्यास्तान्तु नोद्वहेत् ।
पाटले वर्तुलस्निग्धरेखाभूषितमध्यमा ॥
सीमन्ति(नी)नामधरो महिषीलाञ्छनं भवेत् ।
कुशब्दलम्बस्फुटितो रूक्षो दौर्भाग्यसूचकः ॥
श्यामस्थूलाधरोष्ठा स्यात् वैधव्यकलहप्रदा ।
गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाश्शुभाः ॥
पीता श्यामाश्च दशनाः स्थूला दीर्घा द्विपङ्क्तयः ।
शुक्त्याकाराश्च विरलाः दुःखदौर्भाग्यसूचकाः ॥

No. 14006. सामुद्रिकशास्त्रम्.
SĀMUDRIKAŚĀSTRAM.

Pages, 23. Lines, 30 on a page.

Begins on fol. 37*a* of the MS. described under No. 2699.
Complete.
Similar to the work described above.

Beginning:

अथाहं नरनारीणां लक्षणञ्च शुभाशुभम् ।
आलोक्य सर्वशास्त्राणि कथयामि यथा तथा ॥
मांसवर्णै नखैर्भूपः पद्मताम्रोपमैर्धनी ।
रक्तवर्णे तु मन्त्री च श्वेतवर्णैस्तु दुःखितः ।
श्वेतैर्नखैर्विरूपैश्च दुःखजीवी भवेन्नरः ।
शूर्पाग्रैः स्फुटितैर्वक्रैः नरो दारिद्र्यभाग्भवेत् ॥
दुराचारस्तु कुनखी ब्रह्महा च हरिन्नखैः ।
बन्धुक्षयकरो युक्तो नखाश्चात्यन्तलोहिताः ॥

* * * *

Colophon:

इति पुंलक्षणसङ्ग्रहः समाप्तः ॥

End:

आद्यपर्वणि तर्जन्या रेखा पार्श्वोन्मुखी शुनिः ।
आरोग्यकान्तिसौभाग्यधनलाभादितत्फलम् ॥
सैषा दारिद्र्यरोगादिदुःखानां मोचनान्मुनिः ।
असिघ्नी तर्जिनीमूलादूर्ध्वमत्यन्तसन्निधौ ॥

तिर्यग्गता फलं मृत्युः अष्टाविंशे तु वत्सरे ।
असिन्नी त्वसिना नामहननस्य प्रसङ्गतः ॥
ऊर्ध्वे त्वसिन्यास्तुरुचिः तिर्यक्सा पुरुषाकृतिः ।
अकालमृत्युदा नाम शोभनाङ्गत्वसूचनात् ॥
द्वितीया या तु तर्जन्या संश्लिष्टा सन्धिरेखया ।

Colophon :

इति सामुद्रिकं सम्पूर्णम् ॥

The scribe adds—

प्रभवनामसंवत्सरभाद्रपदबहुळस्थिरवासरे पूर्तिमगमत् ॥

No. 14007. सामुद्रिकशास्त्रम्.
SÂMUDRIKAŚÂSTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 12*a* of the MS. described under No. 13465.

Contains the following Adhyâyas :—

१. स्त्रीपुरुषायुषलक्षणम्.
२. अङ्गुलिलक्षणम्.
३. नासालक्षणम्.
४. पार्ष्णिजङ्घालक्षणम्.
५. गतिलक्षणम्.
६. जानुलक्षणम्.
७. गन्धलक्षणम.

Similar to the work described above.

Beginning :

प्रणम्य शिरसा देवं चन्द्रज्वलनशोभितम् ।
सर्वज्ञं सर्वद्रष्टारं सर्वस्य जगतः पतिम् ॥
पुरुषाणां तथा स्त्रीणां लक्षणं च समग्रतः ।
अधमोत्तममध्यानां यथा प्राह पयोनिधिः ॥

ईश्वर उवाच—

शोभने हस्तनक्षत्रे सौम्ये वारे शुभे रवौ ।
पूर्वाह्णे ब्राह्मणैर्युक्तः परीक्षेत विचक्षणः ॥
ब्राह्मणानां पृथग्ज्ञेयं तथा सर्वाङ्गलक्षणम् ।
दन्तकेशनखश्मश्रुगन्धवर्णस्वरादिभिः ॥

पुरुष(पूर्व)मायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
हीनायुषां तथा स्त्रीणां लक्षणैः किं प्रयोजनम् ॥
अधमो नवतिः प्रोक्तो मध्यमस्तु शताङ्गुलिः ।
अष्टोत्तरशतं यस्तु सोत्तमः परिकीर्तितः ॥

Colophon:

इति सामुद्रिकायां प्रथमोऽध्यायः ॥

End:

ऊरुभ्यां विकटाभ्यां च भवेत् स्त्रीषु स वल्लभः ।
स्थूलाग्रं मध्यनिम्नं च ते नरा दुःखभागिनः ॥

Colophon:

इति सामुद्रिके जानुलक्षणो(नाम)षष्ठोऽध्यायः ॥
दक्षिणावर्तलिङ्गेन पुत्रवान् स भवेन्नरः ।
वामावर्तेन लिङ्गेन नरः कन्याप्रजो भवेत् ॥

* * * *

हालागन्धेन नृपतिः पद्मगन्धेन भूपतिः ।
लाक्षागन्धो भवेन्नीचो मांसगन्धेन तस्करः ॥

No. 14008. सामुद्रिकशास्त्रम्, सव्याख्यानम्.

SĀMUDRIKAŚĀSTRAM WITH COMMENTARY.

Pages, 116. Lines, 7 on a page.

Begins on fol. 26a of the MS. described under No. 12572.

Incomplete. Wants the beginning.

Similar to the work described above and together with a commentary thereon.

Beginning:

तथा च समुद्रः—शूर्पाकारैस्स्तम्भनैर्वक्रैश्शुष्कैस्सिराततैस्स . . . . .
रूक्षश्चरणैरतिदुःखिताः । मार्गायोत्कटकाविति— उत्कटकापद . . . .

* * * *

अथ जङ्घयोर्लोम . . लक्षणमाह—
रोमैकैकं कूपके पार्थिवानां द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
त्र्याद्यैर्निस्स्वा मानवा दुःखभाजः केशाश्चैवं निन्दिताः पूजिताश्च ॥

एकैकं रोम । कूपके रोमकूपके पार्थिवानां राज्ञां भवति ॥

End :

यस्याः पाणितले रेखाप्रकारास्तोरणास्तथा ।
अपि दासकुले जाता भूपतेर्महिषी भवेत् ॥

Colophon :

इति कन्यालक्षणं समाप्तम् ॥

* * * *

इत्यष्टौ स्वरलक्षणम् ॥

No. **14009.** सामुद्रिकशास्त्रम्, सव्याख्यानम्.

SĀMUDRIKAŚĀSTRAM WITH COMMENTARY.

Pages, 30. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5082.

Incomplete.

A treatise on fortune-telling based on the color, the proportion, etc., of the various parts of the body as well as the lines in the palm and in the foot. The commentary here is called Lakṣaṇadīpikā and is said to have been written by a son of Mārkaṇḍēśvara of Kauṇḍinyagōtra and possessing a knowledge of the Śrīkaṇṭha religion.

Beginning :

विघ्नेशषण्मुखयुतं विधिविष्णुवन्द्यं
वेदान्तवेद्यममलं गिरिजासहायम् ।
सम्प्रार्थये सकलवाञ्छितवस्तुसिद्ध्यै
सम्यक् प्रणम्य भुवनेशमहागिरीशम् ॥

कौण्डिन्यान्वयदुग्धसागरशशी श्रीकण्ठवित्ताग्रणीः
त्र्य्यन्तादिसमस्तशास्त्रचतुरस्त्रैलोक्यविद्यु(द्व)न्मणिः ।
मार्कण्डेश्वरसूनुरेतदखिलं चक्रे सतां प्रीतये
(सत्)सामुद्रिकशास्त्र . . . . मुदा ॥

यद्गार्ग्यनारदनदीश्वरशास्त्रसिद्धं सङ्क्षिप्य विस्तरमनेकमतं बुधेन्द्राः ।
तत्तत्त्वयुक्तिस . . . सकलप्रकाशं गृह्णन्तु मद्गदितमत्र नृलक्ष्मदीपम् ॥
सत्पात्रस्नेहसंसक्तदशा लोकतमोपहा ।
दीपिकेवं विभात्ये(षा) . . . लक्षणदीपिका ॥

*　　*　　*　　*

(मू.) उन्मानमानपुरसंहतिवर्णकान्तिः स्नेहस्वरप्रकृतिसत्त्वमनूकसारम् ।
यानं च गर्गमुनिनारदसागरादिशा . . . . नुजलक्ष्म . . . मि सारम् ॥

(व्या.) उन्मानं . . . . . . ादि । मानं जलादिमेयं श . . . दि । पुरं शरीरम् । "पुरं पुरशरीरयोः" इति विश्वः ।

पादादिकेशान्तं . . . शरीरम् । संहतिरङ्गासोम . . . ष्टता । वर्णः कृष्णाद्यः । कान्तिः पञ्चभूतकृच्छाया वा सा स्यात् सातपे कान्तौ प्रतिबि . . . . यादवः । स्नेहः दर्शनस्पर्शनयोरस्पृष्टत्वमपुरुषत्वम् । स्वरः कण्ठध्वनिः । प्रकृतिः पार्थिवादिस्वभावः । सत्त्वं नाम चित्त . . . . . . थवा कामतन्त्रोक्त देवदा . . . दिस्वभावः । अनूकमतीतजन्मवृत्तान्तम् ।

*　　*　　*　　*

उन्मानादित्रयोदशविधं स्थानं गर्गनारदमुनिसागरादिकृतेभ्यः शास्त्रेभ्यः क्षीरसागरादमृतमिव सारमादाय मनुजलक्ष्म वदामीति . . . . शानन्तरं लक्षणं लक्षयति—

(मू.) अष्टोत्तरशतं पुंसां षण्णवत्यङ्गुलान्तरः ।
स्वाङ्गुलीनां तु मानेन अशीतिचतुरन्तरम् ॥
श्रेष्ठो मध्यमहीनानामे . . . . . धीयते ।

*　　*　　*　　*

जजाप विष्टपादाग्रमारभ्य शिरसा विधिः ॥
परिप्रसारितं नाममेयान्तस्याङ्गुलेः क्रमात् ।

*　　*　　*　　*

उत्तमत्वादिता सा तु वक्ष्यमाणैश्च लक्षयेत् ॥
रेखाद्यं लक्षणैस्सम्यग्रेखास्थानं च वक्ष्यते ।
दक्षिणे . . . . पुंसां वामे तु योषिताम् ॥

अथ पुरुषलक्षणमाह—

अथ पुरुषलक्षणं लक्षयितुं तदुपोद्धातत्वेन नृणां जीवितं . . . ।
आयुषो निर्णयं कृत्वा पश्चाल्लक्ष्म वदेन्नृणाम् ।
आयुर्हीने तु तेषां तु लक्षणैः किं प्रयोजनम् ।
उक्तं च शिव . . . . . . —

* * * *

तस्माद्वक्ष्यामि सर्वेषामायुर्लक्षणमादितः ।
तत्रापि कथयिष्यामि नृणां स्त्रीणां ततः क्रमात् ॥

* * * *

स्निग्धारुणनखैर्यस्तु सप्तत्यायुस्स जीवति ।
अतीव शीतनयनो दीर्घमैथुनत्रिंशतौ ॥
अत्युन्नताच्छनेत्रोऽपि . . . . रर्धवृषणोऽपि
अतीव पीतवर्णो यः देवब्राह्मणनिन्दकः ।
तस्य षोडशवर्षासु मृतिरष्टादशेऽपि वा ॥

End :

छायाक्रमेण कुजलाग्न्यनिलाम्बरार्थौः ।
केचिद्वदन्ति तत्समासाः ॥

Colophon :

इति पञ्चदशच्छायालक्षणम् ।
केचित् दशच्छायां प्राहुः इत्थम्—
गणयेच्छुद्धसूत्रेण नाभिमापादतः क्रमात् ।
तदर्धं गुणितं कृत्वा सप्त स्थानानि लक्षयेत् ।
चुबुकं प्रथम पश्येत् मुखनासाभ्रुवोर्द्वयम् ।
ललाटं ब्रह्मरन्ध्रं च सप्त स्थानान्यशेषतः ॥
पौराणि शास्त्रमन्त्रं च.

No. 14010. स्वप्नाध्यायः.
SVAPNĀDHYĀYAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 5858.

Complete.

Herein it is stated what kinds of predictive inferences may be drawn from particular kinds of dreams, and what period of time must elapse before they are actually realized.

Beginning :

स्वप्नाध्यायं प्रवक्ष्यामि नानास्वप्नसमुच्चयम् ।
स्वप्नस्तु प्रथमे यामे संवत्सरविपाकतः ॥
द्वितीये चाष्टभिर्मासैः त्रिभिर्मासैः त्रियामके ।
अरुणोदयवेलायां दशाहेन फलं लभेत् ॥

गोविसर्जनवेलायां सद्य एव फलं लभेत् ।
अत ऊर्ध्वं प्रवक्ष्यामि पुण्यात्पुण्यफलं शृणु ॥
यस्तु पश्यति स्वप्नान्ते राजानं कुञ्जरं हयम् ।
सुवर्णं वृषभं गाश्च कुटुम्बं तस्य वर्धते ॥

End:

शुष्कं कण्टकिनं वृक्षमेकाकी यः प्ररोहति ।
तत्र तस्य विबुध्येत मृत्युं शीघ्रमवाप्नुयात् ॥
स्वप्नाध्यायमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
दुस्स्वप्नं नश्यते तस्य सुस्वप्नफलमाप्नुयात् ॥

Colophon:

स्वप्नाध्यायस्समाप्तः ॥

No. **14011.** स्वप्नाध्यायः.

SVAPNĀDHYĀYAḤ.

Pages, 3. Lines, 13 on a page.

Begins on fol. 144*a* of the MS. described under No. 4338.

Contains the Adhyāyas 1 and 2 complete.

Similar to the above.

See under the previous number for the beginning.

End:

स्वप्नाध्यायामद पुण्यं प्रातरुत्थाय यः पठेत् ।
आयुरारोग्यमैश्वर्यं बृहस्पतिरुवाच ह ॥
प्रातः स्नात्वा . . . . . . सुखी भवेत् ।

Colophon:

इति स्वप्नाध्याये प्रथमोऽध्यायः ॥
आरुह्य नावं प्रतिगृह्य वीणां
भुक्त्वा च विद्याधिकहृद्यलाभम् ।

End:

कारागृहाद्विमुच्येत महत्सुखमवाप्नुयात् ।
नियतं भवति स्वप्ने स्त्रीसङ्गवसतिस्तथा ॥

No. 14012. स्वप्नाध्यायः.
SVAPNĀDHYĀYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 13699.
Incomplete.
Same work as the above.

No. 14013. स्वप्नाध्यायः.
SVAPNĀDHYĀYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 4059.
Incomplete.
Same work as the above.

No. 14014. स्वरचिन्तामणिः, आन्ध्रटीकासहितः.
SVARACINTĀMAṆIḤ WITH TELUGU MEANING.

Pages, 152. Lines, 22 on a page.

Begins on fol. 89*a* of the MS. described under No. 22.
Contains the following 24 Adhyāyas :—

१. प्रशंसानुक्रमणिका.	१३. भोजनाध्यायः.
२. पिण्डोत्पत्तिः.	१४ ताम्बूलाध्यायः.
३. स्वरोत्पत्तिः.	१५. सम्भोगाध्यायः.
४ कालप्रमाणसंख्या.	१६. रोगनिरूपणम्.
५. नाडीसन्दीपनप्राणायामाध्यायः	१७. युद्धाध्यायः
६. स्वरकर्माध्यायः.	१८. वृष्टिः.
७. आकस्मिकस्वराध्यायः.	१९. धान्याध्यायः.
८. शाकुनाध्यायः.	२०. आखेटाध्यायः.
९. तत्त्वाध्यायः.	२१. पौषकालविचाराध्यायः.
१०. मूलस्वराध्यायः.	२२. छायाध्यायः.
११. मूलचिन्ताध्यायः.	२३. दुस्स्वप्नाध्यायः.
१२. जलप्रचाराध्यायः.	२४. अरिष्टाध्यायः,

A treatise dealing with the prognostication of events made by observing the nature and characteristics of respiration at particular times. The work is in the form of a dialogue between Pārvatī and Śaṅkara. The stanzas are accompanied by Telugu meaning.

The copyist Venkaṭakṛṣṇa Rao gives the date: Tuesday, the 5th of Āni of the Dundubhi year corresponding to 17th June 1869.

Beginning :

सर्वेशं सर्वगं सर्वं सर्वभूतहृदि स्थितम् ।
सर्वकार्यकरं नीत्या स्वरज्ञानमुदीरयेत् ॥

* * * *

यस्मादुत्पद्यते विश्वं पुनर्यस्मिन्विलीयते ।
तमहं शाश्वतं वन्दे समीरणपदानुगम् ॥

* * * *

अव्यक्तमव्ययं शान्तं नितान्तं योगिनां प्रियम् ।
सर्वज्ञानस्वरूपं यत् तद्वन्दे ब्रह्म सर्वगम् ॥

* * * *

अभयं देवदेवेशं लोकनाथं जगत्पतिम् ।
सर्वज्ञं तं नमस्कृत्य देवी वचनमब्रवीत् ॥

* * * *

कारणस्य च रागस्य कालस्य गुलिकस्य च ।
अलातपातदिग्दाहहोराणां वासरस्य च ॥
यन्त्रमन्त्रग्रहादीनां सर्वेषां सर्वकर्मणाम् ।
सर्वसिद्धिकरं ज्ञानं कथयस्व मम प्रभो ॥

* * * *

श्रीभगवान् शङ्कर उवाच—

साधु साधु महाभागे सर्वज्ञे चारुभाषिणि ।
रहस्यं कथ्यते देवि हे पार्वति तव प्रियम् ॥
यस्य विज्ञानमात्रेण ज्ञास्यसे भुवनत्रयम् ।
चिन्तामणिरिति ख्यातं चिन्तनीयं सुरासुरैः ॥

* * * *

कारणस्य च रागस्य कालस्य गुलिकस्य च ।
अलातपातदिग्दाहा यस्मिन्नभ्युदिते स्वरे ॥
यन्त्रमन्त्रसमूहैश्च सग्रहौषधिभिस्तथा ।
भिद्यते रिपुसङ्घाश्च सुस्वरेण यथासुखम् ॥

* * * *

स्वरे च देव(वेद)शास्त्राणि स्वरे गान्धर्वमुत्तमम् ।
स्वरे च वर्तते लोकः स्वर आत्मनिरूपकः ॥

* * * *

यावद्विषमतामेति स्वरस्तावत्तनोः स्थितिः ।
यदा स्वरस्समं याति देहपातस्तदा भवेत् ॥

* * * *

प्रशंसा प्रथमाध्याये पिण्डोत्पत्तिर्द्वितीयके ।
तृतीये तु स्वरोत्पत्तिरध्याये कथयिष्यते ॥

* * * *

Colophon :

इति स्वरचिन्तामणौ प्रशंसानुक्रमणिका(नाम) प्रथमोऽध्यायः ॥

End :

पक्षे कृष्णसितादिके सितपटस्नानान्वितस्सुस्थले
रात्रौ शम्भुमुपास्य भक्तिसहितो मृत्युञ्जयं भावयेत् ।
लिम्पेद्यावकमेव पादयुगले प्रोत्थाय तस्मिन् शितौ
श्वेतत्वे सहजे मृतिं रुजमगात्प्राणी सुखं शेरते ॥

Colophon :

इत्यरिष्टाध्यायश्चतुर्विंशतिस्समाप्तः ॥

No. 14015. स्वरचिन्तामणिः.
SVARACINTĀMAṆIḤ

Pages, 24. Lines, 6 on a page.

Begins on fol. 100*a* of the MS. described under No. 13609.

Breaks off in the sixth Adhyāya

Same work as the above.

No. 14016. स्वरचिन्तामणिः आन्ध्रटीकासहितः.
SVARACINTĀMAṆIḤ WITH TELUGU COMMENTARY.

Pages, 144. Lines, 16 on a page.

Begins on fol. 19*a* of the MS. described under No. 4389.

Breaks off in the ninth Ādhyāya.

Same work as the above but with Telugu explanation of the stanzas.

No. 14017. स्वरशास्त्रप्रश्नः.

SVARAŚĀSTRAPRAŚNAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 13705

Wants the beginning and the end.

Similar to the above.

Beginning:

यतः (इडा)स्यादुत्तरं नाडी पिङ्गला दक्षिणा स्मृता ।
सुषुम्ना मध्यमायां तु यत्र सङ्क्रमते स्वगः ॥
* * * *
मरणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशम् ।
प्रेरणाकर्षणं क्षोभं भानुनानु(ज्यु)दयंकरः ॥
विग्रहे द्यूतयुद्धे च स्नानभोजनसङ्गमे ।
व्यवहारे भये भङ्गे भानुनाडी प्रशस्यते ॥

End:

अकारोकारजीवे च ओकारौकारसौम्यभिः ।
एकारे भृगुइन्दुभ्यामित्युक्तं स्वरयामले ॥

D. SUPPLEMENTAL.

No. 14018. अङ्कनिघण्टुः.

AṄKANIGHAṆṬUḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 13792.

Incomplete.

Similar to the work described under No. 13601 *ante*.

Beginning:

प्रथममेकस्थानं द्वितीयं दशसंज्ञिकम् ।
तृतीयं शतमित्येतच्चतुर्थं तु सहस्रकम् ॥
पञ्चमं दशसाहस्रमयुतं तु विगीयते ।
षष्ठं शतसहस्रं तु लक्षं नियुतमेव च ॥

End:

महामृतं त्रयस्त्रिंशद्भूरिवेदाभिसंज्ञिकम् ।
पञ्चत्रिंशमहाभूरि षट्त्रिंशायुतभूरि च ॥
सप्तत्रिंशन्नियुतभूरिः प्रयुतभूर्यष्टकीत्रिकम् ।

End:

लग्नाद्भाग्याधिपे यस्य चन्द्राद्भाग्यगतो यदि ।
भाग्यस्थानं गते शुक्रे भद्रयोग इतीरितः ॥
परनृपवन्दितपादो भूपालः पुण्यकृत्सदा योगी ।
श्रीमद्रयोगे जातो पश्चाशदब्दात्परम् ॥
पञ्चाब्दम्.

No. 14024. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 13621.

Contains the fifth Adhyāya complete.

Same work as that described under No. 13519 *ante*.

No. 14025. कालप्रकाशिका.
KĀLAPRAKĀŚIKĀ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 62*a* of the MS. described under No. 13694.

Contains the fifth Adhyāya incomplete.

Same work as the above.

No. 14026. केरलचन्द्रिका.
KĒRALACANDRIKĀ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 13700.

Imperfect.

A treatise on horoscopy according to the system prevailing in the Kērala country. The portion contained in this MS. deals with the horoscopy relating to twins, etc.

Beginning:

अथातो सर्वफलपद्धतिं वक्ष्यमाणः यवनजातकयमलजातकमादौ वक्ष्यामि—
जन्मलग्नात्तृतीयेशश्चन्द्रलग्नाधिपान्वितः ।
नित्य उच्चान्वितो दृष्टो जायते यमलौ तथा ॥
विलग्नचन्द्रलग्नेशौ पुरुषौ चेदुभौ यदि ।
पुंयुग्मं जायते तत्र तावुभौ स्त्रीग्रहौ यदि ॥
स्त्रीयुग्मं जायतेऽवश्यं शास्त्रे केरलदीपिके ।

* * * *

चतुर्थसप्तमाधीशौ सम्पूर्णबलसंयुतौ ।
कनकान्दोलिकासंस्था श्वेतचामरवान भवेत् ॥

Colophon :

केरलचन्द्रिकायां पूर्वभागस्समाप्तः ॥

End :

एतेषां चतुर्णां . . . . वाक्योद्भव उच्यते ।
तत्तत् . . . . लग्नस्थान . . . . रात्रिजन्मनः ॥
तत्तत्सप्तमलग्नस्था भविष्यन्ति न संशयः ।

Colophon :

करणं सम्पूर्णम् ॥

No. **14027.** केरलज्यौतिषम्
KĒRALAJYAUTIṢAM.

Pages, 10. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 13909.
Incomplete.
Slightly different from that described under No. 13614 *ante*.

Beginning :

आयुर्दायविचारः—

आयुस्स्थानाधिपः पापैः षड्व्ययाष्टगतो यदि ।
अल्पायुर्देवमात्रस्य अत्यल्पं भवति ध्रुवम् ॥
स्वस्थाने वाष्टमे वापि स्थितश्चेद्दीर्घमाप्नुयात् ।
देहाष्टमाधिपौ षष्ठे व्यये वा समतिष्ठति ।

* * * *

लाभाधिपे पञ्चमस्थे राज्याधिपसमन्विते ।
पूर्वज्ञानलाभं च इति केरलनिश्चयः ॥

End :

द्वितीयकेन्द्रसहितो मन्त्री वक्रस्तथैव च ।
. . . . . सङ्गेन इति केरलनिश्चयः ॥
अष्टमस्थे यथा शुक्रे राहुणा वीक्ष्यते यथा ।
बुधेन संयुते वा.

No. 14028. कोटिचक्रयुद्धयात्रायोगफलम्.
KOṬICAKRAYUDDHAYĀTRĀYŌGAPHALAM.

Pages, 22. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13781.

Incomplete.

Same work as that described under No. 13646 *ante*.

No. 14029. ग्रहणनिर्णयः, द्राविडटीकासहितः.
GRAHAṆANIRṆAYAḤ WITH TAMIL MEANING.

Pages, 4. Lines, 8 on a page.

Begins on fol. 46*a* of the MS. described under No. 13502.

Incomplete.

Deals with the time of the occurrence of eclipses in each year and other particulars connected with them.

Beginning :

षण्णिघ्नं स्फुटपर्वभागसहितात्तिग्मद्युतेस्सायनात्

नालांशै रहितास्तु दोग्रहगतैः निद्राव्यतद्धीनवैः ।

नामघ्नाक्षभयाव्यहीन . . . या साम्ये युतिव्यत्यया

शोद्धया स्पष्टनतिर्भवेदधिगतौ दिश्यान्त्यसौम्यैः क्रमात् ॥

End :

उत्तरशतधारा च अष्टादशमिदं शृणु ।

आर्द्रायां पट्टपुत्रस्स्यात् हस्ते रुद्रपरात्परम् ॥

निरृत्या नरतन्मानमेते द्विविषतारकाः ।

No. 14030. ग्रहनिघण्टुः.
GRAHANIGHAṆṬUḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 13612.

Complete.

Same work as that described under No. 13654.

No. 14031. ग्रहनिघण्टुः.
GRAHANIGHAṆṬUḤ.

Pages, 2. Lines, 3 on a page.

Begins on fol. 2*a* of the MS. described under No. 13858.

Complete.

Same work as the above.

No. 14032. ग्रहभाष्यम्, आन्ध्रटीकासहितम्.

GRAHABHĀṢYAM WITH TELUGU MEANING.

Pages, 7. Lines, 21 on a page.

Begins on fol. 10*b* of the MS. described under No. 13822.
Contains the eighth Adhyāya only.

Similar to the work described under No. 13416. The portion contained here deals with divination (Praśna).

Beginning :

वन्देऽहं स(र्व)गीर्वाणवल्लभं परमेश्वरम् ।
अनादिनाथसर्वेशपुराणपुरुषोत्तमम् ॥
प्रश्नशास्त्रं प्रवक्ष्यामि सर्वेशानहितोपमम् ।
षाडशस्थ(श्व)कला(भागं)चन्द्राणां मध्य गोप्यते ? ॥
ग्रहभाष्यंप्रमाणेन स्कन्दाचार्यमनोदितम् ।
समस्तफलदं रम्यं महाशास्त्रनिदर्शनम् ॥
कलानां षोडशं भागं सुधा नाम सुमूर्तिकम् ।
* * * *
जीवनिर्जीविकाधातुमूलप्रश्नानुचिन्तनम् ॥
भोजनं व्यवहारं च वर्षावर्षं च चिन्तनम् ।
एतत्सर्वफलारम्भं लाभालाभनिदर्शनम् ॥

End :

कर्कट्यो हिमकण्ठां च राशीनां विधुनायकाः ।
तद्राशीशो गौरवर्णे रामवर्णनिरूपणम् ॥

Colophon :

इदं वा श्रीग्रहभाष्यं महाशास्त्रे सकलप्रश्नग्रहचारयोगे षोडशचन्द्रयोगे महागोप्यमष्टमोऽध्यायः ॥

No. 14033. चन्द्रार्किसूत्रम्.

CANDRĀRKISŪTRAM.

Substance, paper. Size, 13 × 6⅞ inches. Pages, 38. Lines, 11 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Complete.

An astronomical treatise, with tables of calculation, for finding out from the positions of the sun and the moon the required details for the

determination of Tithi, Vāra, Nakṣatra, Karaṇa, Yōga, Tridinaspṛk, Avamā, etc. The work is said to have been composed by Mōṭa Dinakara of Kauśikagōtra and an inhabitant of Jñā-vāra village (Budwarpet, Poona ?).

Beginning:

सूर्यं चन्द्रं सद्गुरुं भक्तिपूर्वं नत्वा वक्ष्ये सूर्यचन्द्रोद्भवं च ।
पत्रं पञ्चाङ्गाभिधं बुद्धिमद्भिः ग्राह्यं तज्ज्ञैर्युक्तिमेतन्मयोक्तम् ॥ १ ॥

चन्द्रो १, घस्रा १५, क्रमयो ३१, ऽत्यष्टि १७, त्यष्टि १७, रुद्रा ११, रामा ३. रामबाणा ५३, श्विदस्रा २२ । शैला ८, श्राब्ध्य ४०, श्राग्नि ३०. वेदाब्धयश्च ४४, वर्षेशादेस्युर्गणा ब्रह्मपक्षे ॥ २ ॥

मही १, कृताक्षीण २४, नगेषव(श्च) ५७, सूर्या १२, खराम ३० श्च समेश्वरस्य । क्षेपो द्विदस्रा २२, नवचन्द्र १९. तुल्या कृताग्नयो ३४ दि १०, ग्गगनं ०, च शुद्धे ॥ ३ ॥

एकाधिका विंशति २१ दस्रबाणा ५२ नृपा १६ शराक्षा ५५ गगनं ० च केन्द्रे ॥

. . . विहीने गगनाश्रघस्र १५०० र्निघ्नो गुणैः क्षेपयुतो ध्रुवस्स्यात् ॥
व . . . सप्तभिः ७ शेषे शुद्धिकेन्द्रे च त्रिंशतः ३० ।
अर्क १२ घ्नः शुद्धिकेन्द्रे च लवाद्यैः चन्द्रकेन्द्रके ॥
स्वदेशान्तरयोजनैश्च चतुर्थांशेन वर्जितैः ।
वर्षेशस्य विनाडीषु स्वमृणं पूर्वपश्चिमे ॥
तस्य नाड्या गतिर्निघ्ना तरणेर्निजकोष्ठजा ।
षष्ट्या ६० लब्धं फलं सूर्ये ऋणं सूर्योदये रविः ॥

* * * *

गत्या विभक्ते खरसाद्धि किश्चित्संमार्जनीयं खरसाधिकं तत् ।
लोपो यदि स्याद्गणिते प्यलभ्यस्तस्मात् प्रवक्ष्ये गणितानुसारात ।
खनेत्रशैलाकलिकास्तिथेश्च खपूर्णनाग ८०० श्च युताः क्रमेण ।
लोपस्य सिद्ध्यै विभजेत् स्वगत्यावमं दिनं तत् कथितं ग्रहज्ञैः ॥

* * *

वारेशाख्ये वसन् ग्रामे चक्रे दिनकरो मुदा ।
जात(ः) कौसि(शि)कसे(स) गोत्रे मोटज्ञातिसमुद्भवः ॥

Colophon:

. . इति चन्द्रार्कसूत्रं संपूर्णम् ॥

गतेष्टनाडीगुणिते खखाष्टौ ८०० सर्वर्क्षनाडीविहृतं कलाद्यम् ।
भुक्तर्क्षयुक्तं सकलाः खगाः स्युः षष्ठ्या ६० हृते अष्टशतेषु भुक्तिः ॥

नवाद्रीन्दुरामै३१७९र्युतः शाककालः कलिर्यातवर्षाब्धिवेदाभ्ररामैः ३०४४ ।
विहीनो भवेद्विक्रमादित्यकालः शरामीन्दु१३५हीनाः शकः शालिवाहः ।
इति कलिगताब्दसंवत्सराः शकश्च ।

End :

31	32	33	34	35	36	37	38	39	40	41	42	43	44	45
9	2	2	2	2	2	8	8	8	8	9	9	9	9	9
58	1	14	28	41	54	2	20	33	41	0	13	26	39	52
28	39	49	0	10	21	32	42	53	3	14	24	35	46	56
6	6	2	2	2	2	8	8	8	8	8	9	9	9	9
45	58	11	24	37	50	3	16	29	42	55	8	21	34	47
1	5	8	13	16	20	25	28	32	6	40	43	48	52	55

46	47	48	49	50	51	52	53	54	55	56	57	58	59	60	
10	10	10	10	10	11	11	11	11	12	12	12	12	12	13	अं.
6	19	32	45	58	12	25	38	51	4	17	31	44	57	10	क.
7	17	28	39	49	0	10	21	31	42	53	3	14	24	25	वि.
10	10	10	10	10	11	11	11	11	11	12	12	12	12	13	अं.
1	14	27	40	53	6	19	32	45	58	11	24	37	50	3	क.
0	3	7	12	15	10	22	27	30	38	34	42	46	50	54	वि.

Colophon :

इति घटीफलानि(लं) संपूर्णम् ॥

695

No. 14034. ज्यौतिषदर्पणम्.
JYAUTIṢADARPAṆAM.

Substance, palm-leaf. Size, 16⅛ × 1⅛ inches. Pages, 269. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in the 16th Adhyāya.

A work in horoscopy by Kañcam Yallayārya, son of Nārayārya and Vīramāmbā. The topics dealt with herein are evident from the headings of the Adhyāyas given below :—

१. संज्ञावताराध्याय.
२. वर्षर्तुमासनिर्णयाध्याय.
३. तिथ्यादिपञ्चाङ्गनिर्णयाध्याय.
४. राजादिनिर्णयाध्याय.
५. संवत्सरराजादिफलाध्याय.
६. ग्रहचारग्रहणभूगोलग्रहयुद्ध-समागमाध्याय.
७. त्रिविधोत्पातलक्षणम्.
८. कालशुद्धिनिरूपणाध्याय.
९. दोषनिरूपणाध्याय.
१०. सङ्क्रान्तिलक्षणाध्याय.
११. गोचारादिबलनिर्णयाध्याय.
१२. प्रथमार्तवाध्याय.
१३. पुंसवनाध्याय.
१४. सीमन्ताध्याय.
१५. बालकृत्याध्याय.
१६. उपनयनक्रमः.
१७. विद्याभ्यासः.
१८. विवाह.
१९. वास्तुलक्षण.
२०. गृहस्थधर्माः
२१. देवतास्थापनादि.
२२. यात्रा.
२३. पैतृककर्म.
२४. मिश्राध्याय.

Beginning :

श्रियःपतिमुमाकान्तं भानुं वाणीं विनायकम् ।
नत्वा ग्रहान्नृषीन्सर्वान् ज्योतिश्शास्त्रप्रवर्तकान् ॥
कंचंयल्लप्रपश्चे कमलसुतहितारातिसिद्धान्तवेत्ता
वैरिंपं(?) चञ्चरीको नरगिरिनृहरे(ः) पादपङ्केरुहस्य ।
आकाङ्क्षि प्राश्रयेति(?) दधति मुकुरवद्यस्य पञ्चाङ्गमेकं
सोऽयं श्रीवीरमाम्बाजलधिसुरतरुर्नारयार्यस्य सूनुः ॥
नंकंचमेल्लयसुधीः कण्वशाखिसभाम्यन्तरे परम्(?) ।
आविधि किंनगोपुरे कोण्डपल्लि पुरे पुरे(?) ॥
सोऽहं करोमि बोधार्थं सम्यग्ज्यौतिषदर्पणम् ।
ज्योतिश्शास्त्रस्य सारं तदुज्ज्वलं रविबिम्बवत् ॥

मणिवन्निर्मलं शश्वत् स्वच्छं दा(त)द्विधुबिम्बवत् ।
हस्तामलकवन्नित्यमस्तु दैवविदां मुदे ॥
तत्रादौ शास्त्रसंज्ञाथ वर्षमासर्तुनिर्णयः ।
तिथिवारर्क्षयोगादि पञ्चाङ्गविनिरूपणम् ॥
राजादिनिर्णयं चैव संवत्सरफलं ततः ।
ग्रहचारश्च तदनु त्रिविधोत्पातलक्षणम् ॥
कालशुद्धिर्महादोषलक्ष्म सङ्क्रान्तिनिर्णयः ।
गोचाराख्यं बलं सम्यक् प्रथमार्तवलक्षणम् ॥
आधानपुंसि सीमन्तकर्मजातकलक्षणम् ।
नामादि बालकृत्यं च तथोपनयनक्रमः ॥
विद्याभ्यासो विवाहश्च वास्तुलक्षणमुत्तमम् ।
गृहस्थधर्मान् सर्वांश्च देवतास्थापनादिकम् ॥
यात्रा च पैतृकं कर्म मिश्रकाध्याय एव च ।
यथाक्रमेण लिख्यन्ते शास्त्राणि सुसमीक्ष्य च ॥
ज्योतिश्शास्त्रं करोमीति न मे गर्वो विचार्यताम् ।
यत्र सञ्चरते भानुः खद्योतस्तत्र पुष्करे ॥
शोधयन्तु प्रबन्धे मे गुणदोषौ विपश्चितः ।
हंसानामधिकारो हि क्षीरनीरविवेचने ॥
प्रभवो विभवः शुक्लः प्रमोदूतः प्रजापतिः ।

* * * *

Colophon:

इति ज्योतिषदर्पणे संज्ञावतारः प्रथमः ॥

End:

Colophon:

इति कश्यपल्लयविरचिते ज्योतिषदर्पणे बालकृत्यं नाम चतुर्द(पञ्चद)शो-ध्यायः ॥

चन्द्रस्य राशिं षट्त्रिंशद्भागान् कृत्वा फलं वदेत् ;
शिरोरोगं महाप्रीतिर्देवकार्यं सुखासनम् ॥
नेत्ररोगं च सत्कर्म नारीक्रीडा महाज्वरम् ।
सुवर्णं भूषणं वस्त्रं विषमुक्तं च मैथुनम् ॥

695A

* * * *

प्राजापत्यमश्लेन्द्राग्निश्रवणं च चतुष्टयम् ।
भगार्यमैन्द्राग्निमैत्रे च वसुवारणचार्द्रभम् ॥
एतत्ताराष्टकं चैव इन्दुभ्यामिव वीक्षते ।

No. 14035. ज्यौतिषदर्पणम्.
JYAUTIṢADARPAṆAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 103*a* of the MS. described under No. 13106.
Contains the seventh Adhyāya without the beginning.
Same work as the above.

No. 14036. ज्यौतिषदर्पणम्.
JYAUTIṢADARPAṆAM.

Pages, 31. Lines, 7 on a page.

Begins on fol. 167*a* of the MS. described under No. 13490
Contains the Vāstuprakaraṇa only.
Same MS. as that described under No. 42 on pages 89, 248, and 249 of M. Sēshagiri Śāstri's Report No. 2.

No. 14037. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 13859.
Incomplete, with Telugu notes.
Gives the astrologically proper time for the performance of certain ceremonies, for taking oil bath, etc.

Beginning:

मृगशिरास्वातिवैशाखे ज्येष्ठे चैव चतुर्दश ।
कृत्तिकामघरेवत्यां पुनर्वसूदशत्रिकम् ।
उत्तराषाढा च विंशतिः ।
आर्द्राहस्तनक्षत्रमेकविंशतिनाडिका
भरणी चोत्तराभाद्रा पूर्वाषाढ त्रियष्टकम् ।

End:

तैलाभ्यङ्गविधिं द्विधैव मुनयः शंसन्ति मन्देन्दुवि
द्वारे पर्वचतुर्दशीं प्रतिपदं षष्ठ्यष्टमीं द्वादशीम् ।

ज्येष्ठामुत्तरफल्गुनीपरिहरौ जन्मत्रयं सङ्क्रमं
हित्वा बालकवृद्धरोगधुषु याथाकालं न दोषावहम् ॥

No. 14038. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 1*a* of the MS described under No. 13661.

Deals with certain minor astrological matters usually found in a Hindu calendar.

Beginning:

ज्येष्ठमासे सिते पक्षे आर्द्रायां दशवृक्षके ।
सजला निर्जला मेघाः निर्जलं सजलं तथा ॥
चित्रास्वातिविशाखायां श्रवणे नातिवर्षति ।
सर्वरत्नं परित्यजेद्गतवद्धान्यसङ्ग्रहम् ॥

End:

इन्दौ शरगिरीड्ढस्तौ मन्दो वा भूमिनन्दनः ।
आयुर्वा परुषं वा भूलोकं भीकरं भयम् ॥

No. 14039. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13921.

Incomplete.

On the different Yōgas which are due to conjunctions of particular Vāra and Nakṣatra and on good or evil arising from making certain undertakings on such occasions, etc.

Beginning:

विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्य(वा)ट्
विघ्नव्यालकुलोपमर्दगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवः
विघ्नाघौघघनप्रचण्डपवनो विघ्नेश्वरः पातु माम् ॥

* * *

जन्मसम्पद्विपत्क्षेमप्रत्यक्साधननैधनम् ।
मैत्रं परममैत्रं च जन्मादीनां पुनः पुनः ॥
अशुभं जन्मतारा स्यात् सम्पत्तारा धनप्रदा ।
विपत्तारा विपत्तिं च क्षेमता(रा ?) क्षेमकारका ॥
प्रत्यरं वैरि सम्प्रोक्तं साधनं कार्यसाधनम् ।

End :

भानूत्तराषद्वितीये च द्वितीये चति उत्तरे ।
हस्ता मूला च सप्तम्यां तृप्यस्थातिप्रयाद . . (?) ॥
अमायां पञ्चमीयुक्ता अष्टमी रोहिणी तथा ।
इति जालमुखश्चेति सर्वकर्म विवर्जयेत् ॥

No. 14040. ज्यौतिषविषयः, आन्ध्रटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH TELUGU MEANING.

Pages, 25. Lines, 4 on a page.

Begins on fol. 31*b* of the MS. described under No. 13661.

Similar to the work described under No. 13558 but with Telugu meaning.

Beginning :

अग्निबाणपुरारन्ध्रवसुरत्नगजाः पुरा ।
आदित्यादिग्रहास्सर्वे नित्यग्रहफलं लभेत् ॥

* * * *

अध्वानं रविवासरे हिमकरे सम्भोगमैश्वर्यथा-
प्रीतिर्भूमिसुते प्रियं शशिसुते जीवे चम(तथा)र्थागमम् ।
सौभाग्यं भृगुवासरे च लभते मन्दे महारोगतां
जन्मर्क्षे रविवासरादिषु युतं शंसन्ति गार्ग्यादयः ॥

End :

नक्षत्रं गर्भिणिंनामधेयं तिथिं च ऋक्षं मुनिसंयुतं च ।
वारेण युक्तं नवभागशेषं समे(च)कन्या विषमे कुमारः ॥

No. 14041. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 123. Lines, 5 on a page.

Begins on fol. 23b of the MS. described under No. 12662.

Incomplete.

Deals with horoscopy. Gives the nature of the good or evil befalling to a person from planetary influences.

Beginning:

केन्द्रे श्रीभाग्यहानिस्स्यात् शुभो यदि न जातके ।
विवाहे वा प्रयाणे वा न तत्राहुः शुभं बुधाः ॥
स्वाधिमित्रोच्चराशिस्थः पापोऽपि शुभमिच्छति ।
शुभोऽप्यशुभदाता स्यादस्तनीचारिराशिगैः ॥
यस्य जन्मनि नीचस्थाः तस्योच्चाधिपतौ विधौ ।
तद्राशिपे वा केन्द्रस्थे भवेत्पार्थिवशेखरः ॥

End:

देहायासं मनःक्लेशं वित्तनाशं रिपोर्भयम् ।
स्वल्पसौख्यमवाप्नोति राहोरन्तर्गतश्शनिः ॥
अर्थनाशो देहपीडा कलहो बन्धुभिस्सह ।
देशत्यागो निवृत्तिश्च राहोरन्तर्गतश्शनिः ॥

No. 14042. ज्यौतिषविषयः, द्राविडटीकासहितः.
JYAUTIṢAVIṢAYAḤ WITH TAMIL MEANING.

Substance, palm-leaf. Size, 13 × $1\frac{1}{8}$ inches. Pages, 14. Lines, 6 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhagavadārādhanakrama 8*a*, Gāyatrīrāmāyaṇa 12*a*, Aṣṭākṣaramantranyāsa 16*a*.

Incomplete.

Similar to the work described under No. 14040. It is accompanied by meaning in Tamil.

Beginning:

न पूर्वे शनिसोमे च न गुरुर्दक्षिणस्तथा ।
न पश्चाद्भानुशुक्रे च नोत्तरे बुधभार्गवे ॥

अङ्गारपूर्वे गमने च लाभं सोमे शनिर्दक्षिणमर्थलाभम्(:) ।
बुधे गुरौ पश्चिमकार्यसिद्धिः रवौ भृगौ चोत्तरधान्यलाभः ॥

End:

हरिहरकरचित्तासौम्यपौष्णोत्तराया-
दितिवसु च घटाली सिंहवर्जे विलग्ने ।
शशिगुरुबुधकाव्या नन्दने पर्वरिक्ता-
रहिततिथिषु . . . . नैधने कर्णवेधः ॥

No. 14043. ज्यौतिषविषयः, द्राविडटीकासहितः.

JYAUTIṢAVIṢAYAḤ WITH TAMIL MEANING.

Pages, 10. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 13600. Incomplete.

Deals with certain astrological matters, such as the inauspicious period of time in each Nakṣatra, the auspicious days for travelling in particular directions, etc.

Beginning:

आदित्यादिग्रहास्सर्वे सनक्षत्रास्सराशयः ।
कुर्वन्तु मङ्गलं नित्यं यस्तेषां सूर्यशास्त्रयोः ॥

* * * *

नक्षत्रत्याज्यम्—

मृगशिरोस्वातिवैशाखे ज्येष्ठे चैव चतुर्दश ।
पुष्यपुब्बा च चित्रा च उत्तराषाढविंशतिः ॥

* * * *

प्रयाणवाराणि—

अङ्गारपूर्वे गमने च लाभः सोमे शनिर्दक्षिणमर्थलाभः ।
बुधे गुरौ पश्चिमकार्यसिद्धिः रवौ भृगौ चोत्तरधान्यलाभः ॥

End:

सूरे सौम्यसितावरी रविसुतौ मध्ये परे त्वन्यथा
सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ।
शुक्रज्ञौ सुहृदौ समस्सुरगुरुर्मन्दस्य चान्येऽरयो
ये प्रोक्तास्सुहृदस्त्रिकोणभवनार्थेऽमी मया कीर्तिताः ॥

No. 14044. ज्यौतिषविषयः.
JYAUTIṢAVIṢAYAḤ.

Pages, 21. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 13700.

Deals with the proper time for the performance of various ceremonies such as Upanayaṇa, marriage, consecration of divine images, etc.

Beginning:

माघफाल्गुनवैशाखज्येष्ठमासाश्शुभावहाः ।
मध्यमः कार्तिको मार्गशीर्षको निन्दितः परैः ॥
न मण्डनं मीनचैत्रे मुण्डनं तु विधीयते ।
मण्डनं मुण्डनं कार्यं . . . त्र विधीयते ॥
. . . . भानोरार्द्राप्रवेशनात् ।
विवाहो देवतानां च प्रतिष्ठा चोपनायनम् ॥

End:

चन्द्रादित्यौ शुभांशस्थौ बलाढ्यौ स्वोच्चगौ यथा ।
महादोषसमाख्याता दोषा भङ्गं ययुस्तथा ॥
तत्र दोषापवादविषये वृद्धाचारतो व्यवस्था द्रष्टव्या ॥

Colophon:

इति महादोषभङ्गं समाप्तम् ॥

No. 14045. ज्यौतिषविषयः, सटीकः.
JYAUTIṢAVIṢAYAḤ WITH MEANING.

Pages, 37. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 13982.

Wants the beginning.

Similar to the work described under No. 14041.

Beginning:

पुत्रस्थाने बुधक्षेत्रे मन्दक्षेत्रेऽथवा पुनः ।
मन्दमान्दियुते दृष्टे तदा दत्तादयस्सुताः ॥

अन्यबीजम्—

न लग्नमिन्दुं च गुरुर्निरीक्षते न वा शशाङ्को रविणा समागतः ।
स पापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयम् ॥

अस्यार्थः—लग्नचन्द्रलग्नयोः गुरुदृष्टिहीनश्चेत् अन्यबीजम् ।

End:

अथ ग्रहाणां भावस्फुटमुच्यते—

ग्रहस्फुटं विनिक्षिप्य भावस्फुटमुदक्षिते ।
यस्मिन् भावे गताः खेटा दिशेयुस्तत्फलानि वै ॥
भावचक्रवशादेव फलं दद्युः ग्रहास्स्मृताः ।

No. 14046. ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 109*a* of the MS. described under No. 13912.

Incomplete.

On the prediction of the fortunes of persons by a reference to the position of the planets at the time of the birth, etc.

Beginning:

कुजस्य सप्त वर्षाणि भृगोष्षोडश वत्सराः ।
बुधस्य नव वर्षाणि शीतरश्मेस्त्रिसप्तकम् ॥
आदित्ये पञ्चकं विद्यात् दश चैव गुरोरपि ।
सौरेश्चत्वारि वर्षाणि कालचक्रे विधीयते ॥
कालचक्रं प्रवक्ष्यामि संक्षिप्तं शृणु तत्त्वतः ।
शुभाशुभं मनुष्याणां हितमन्यमुनिश्रितम् ॥
लग्ने वा चन्द्रलग्ने वा प्रश्नलग्ने तथैव च ।
तद्दिनं नवपर्युक्तमायुष्यं परिकीर्तितम् ॥

End:

मेषे जीव इति स्मृतः कर्किदशा—௵ 2, மீ 5, நாள் 1.
सिंहदशा—மீ 9 நாள் 9.
कन्यादशा—௵ 1, நாள் 15.
तुलादशा—௵ 1, மீ 10, நாள் 10.

No. 14047. ताजकम्, सव्याख्यानम्.

TĀJAKAM WITH COMMENTARY.

Substance, paper. Size, 7¼ × 4½ inches. Pages, 114. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Same work as that described under No. 3045 of the India Office Library Catalogue. By Nīlakaṇṭha, son of Ananta. The commentator's name is not given.

The transcription of the MS. is said to have been commenced on Friday, the fifth of the dark fortnight of the Kārttikai month in the year Vibhava.

Beginning:

सटीका(क)सोदाहरणताजकम् ।

तदादौ प्रारभ्यमाणस्य ताजकनामकस्यास्य होराग्रन्थस्य निर्विघ्नपरिसमाप्तिं चिकीर्षुरादौ नमस्क्रियारूपं मङ्गलमाचरति दैवज्ञः—

प्रणम्य हेरम्बमथो दिवाकरं गुरोरनन्तस्य तथा पदाम्बुजम् ।
श्रीनीलकण्ठो विविनक्ति सूक्तिभिः तत्ताजकं सूरिमनःप्रसादकृत् ॥

श्रीनीलकण्ठः तत्पूर्वाचार्योक्तं ताजकं सूक्तिभिः सुयुक्तिभिः नानाच्छन्दोभिर्वा विविनक्ति प्रकटीकरोति । कथं भूतम्? सूरिमनःप्रसादकृत् सूरयः पण्डिताः तेषां मनः अन्तःकरणम्; तस्य प्रसादकृत्; एतद्ग्रन्थावलोकनेन पण्डितमनः प्रसन्नं भवतीत्यर्थः। किं कृत्वा? हेरम्बं गणपतिं प्रणम्य । पुनः किं कृत्वा? दिवाकरं सूर्यं प्रणम्य, पुनः किं कृत्वा? अनन्तदैवज्ञपदाम्बुजं प्रणम्य ।

अथ द्वादशराशिस्वरूपानाह—तत्रादौ मेषस्य यथा ।

पुमांश्चरोऽग्निस्सदृशश्चतुष्पात् रक्तोष्णपित्तोऽतिरवो द्विरूमः ।
पीतो दिनं प्राग्विषमोदयोऽल्पसङ्गप्रजो रूक्षनृपस्समोजः ॥

पुमान् पुरुषराशिः । चरः, चरसंज्ञकः, अग्निः, अग्निराशि ।

End:

हीनांशसाम्ये बलिनो दशाद्या बलस्य साम्येऽल्पगतेऽस्तपूर्वा ।
साम्ये विलग्नास्य खगेन चिन्त्या बलाधिका लग्नभवेर्विचिन्त्या ॥

द्वयोरंशैस्साम्ये समत्वे सति बलिनः पञ्चवर्गा बलाधिकस्य आदौ प्रथमा दशा स्यात् । अत्र शुद्धांशसाम्ये इत्यपरः पाठः । . . . . . तदा दशाप्रवेशः शुद्धः ।

अन्यथाशुद्धाः । उदाहरति, प्रस्तुतजातके शनिः.

No. 14048. ताजकसारः.

TĀJAKASĀRAḤ.

Pages, 44. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 6742.

Breaks off in the fifth Adhyāya.

Tājaka is said to be the name given to Persian treatises in astrology dealing generally with the predictions relating to the year, month, etc., with divination, etc. The work under notice purports to be a summary of treatises. They are usually divided into three parts, viz., Saṁjñātantra, Varṣatantra and Praśnatantra

Beginning:

सप्तविंशतिऋक्षाणि ग्रहास्सूर्यादया(यो)नव ।
अष्टोत्तरशतांशास्ते राशयो द्वादशैव हि ॥
तेषां भेदविकल्पेन सर्वेषाञ्च पृथक् पृथक् ।
प्रश्नतो जन्मसमयाद्वर्षचर्यानुरोधतः ॥
राशिस्वरूपं प्रथमं त्रैराशिकपति(विधि)स्ततः ।
सप्तानि कार्यरूपाणि ग्रहाणां धातुवर्गजम् ॥
ग्रहदृष्टिप्रभेदश्च पञ्चधा कथितं स्फुटम् ।

षोडात्र ।

दीप्तिभागश्च रव्यादेः भ्रमणं खचरस्य तु ॥
योगं षोडशकश्चैव हर्षस्थानानि यान्यपि ।
बहुवारिधिसस्यानि सहमानेव तान्यपि ॥
तथैव पञ्चवर्गेशान् ग्रहाणां बलचिन्तनम् ।
एतत्सामान्यतः प्रोक्तं बहुधा तद्विकल्पनम् ॥
राशिस्वरूपं मेषाद्य-स्त्रियाद्याश्चरादयः ।
चरस्थिरोभयाख्यस्तु क्रूरसौम्यक्रमेण च ॥
चापापरार्धं मेषोक्षमृगसिंहाश्चतुष्पदाः ।
बहुपादौ कुलीराली घटः पाद(वि)वर्जितौ ॥

End:

श्रीवेङ्कटेशकृपया वेङ्कटेश्वरशर्मणा ।
योगानां लक्षणाध्यायः चतुर्थोऽयं प्रकाशितः ॥

Colophon:

इति ताजि(ज)कसारे चतुर्थोऽध्यायः ।

वर्षादौ जनने वापि सहमाननिरीक्ष्य च ।
बहुवारिधिसस्यानि फलमूह्य विशेषतः ।

वर्षाधिपो विलग्नेशस्तत्रस्थो यदि वत्सरे ।
आत्मसौख्यं मनोल्लासं दारपुत्रार्थसम्पदः ॥

*　　*　　*　　*

शुभदृष्ट्या फलं सौम्यं पापदृष्ट्यां तथा फलम् ।
वर्षाधिपे सति भृगौ शुभयुक्ते क्षितौ यदि ॥
दुर्बलो राजदण्डस्स्यात् . . . . ।

No. 14049. द्वित्रिग्रहयोगाध्यायः.

DVITRIGRAHAYŌGĀDHYĀYAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 12524.

Incomplete.

